।।ॐ श्री परमात्मने नमः।।

महर्षिपतञ्जलिप्रणीतं

# योगदर्शनम्

## (प्रत्यक्षानुभूत व्याख्या)


व्याख्याकारः –

**परमहंस स्वामी श्रीअड़गड़ानन्दजी महाराजः**

श्री परमहंस आश्रम शक्तेषगढ़

ग्रा.पो.– शक्तेषगढ़, चुनार, मिर्जापुर (उ.प्र.)

फोन : (०५४४३) २३८०४०



प्रकाशकः

श्री परमहंस स्वामी अड़गड़ानन्दजी आश्रम ट्रस्ट

मुम्बई – ४०० ००७

सम्पर्क सूत्र :
श्री परमहंस स्वामी अड़गड़ानन्दजी आश्रम ट्रस्ट
29 ए, फ्रेन्च रोड (मर्चेण्ट क्लब के सामने)
चौपाटी, मुंम्बई – 400007
फोन – (022) 56555300
फैक्स – (091-22) 23643109
ईमेल – contact@yatharthgeeta.com
वेवसाइट – www.yatharthgeeta.com

© लेखक

अनन्तश्री विभूषित

योगिराजस्य, युगपितामहस्य

परमपूज्य श्रीस्वामी परमानन्दजी महाराजस्य

परमहंस आश्रम अनुसुइया, चित्रकूटस्य

परमपावन चरणेषु सादरं समर्पितम्

अन्तस्प्रेरणा

# गुरु-वन्दना

## ।। ॐ श्री सद्‌गुरुदेव भगवान् की जय ।।

जय सद्‌गुरुदेवं, परमानन्दं, अमर शरीरं अविकारी।
निर्गुण निर्मूलं, धरि स्थूलं, काटन शूलं भवभारी।।

सुरत निज सोहं, कलिमल खोहं, जनमन मोहन छविभारी।
अमरापुर वासी, सब सुख राशी, सदा एकरस निर्विकारी।।

अनुभव गम्भीरा, मति के धीरा, अलख फकीरा अवतारी।
योगी अद्वैष्टा, त्रिकाल द्रष्टा, केवल पद आनन्दकारी।।

चित्रकूटहिं आयो, अद्वैत लखायो, अनुसुइया आसन मारी।
श्रीपरमहंस स्वामी, अन्तर्यामी, हैं बड़नामी संसारी।।

हंसन हितकारी, जग पगुधारी, गर्व प्रहारी उपकारी।
सत्-पंथ चलायो, भरम मिटायो, रूप लखायो करतारी।।

यह शिष्य है तेरो, करत निहोरो, मोपर हेरो प्रणधारी।
जय सद्‌गुरु.........भारी।।

।। ॐ ।।




**श्री श्री १००८ श्री स्वामी परमानन्दजी महाराज ( परमहंसजी )**

जन्म : शुभ सम्वत् विक्रम १९६९ (सन् १९११ ई०)

महाप्रयाण : ज्येष्ठ शुक्ल ७, वि०सं० २०२६, दिनांक २३/०५/१९६९ ई०

परमहंस आश्रम अनुसुइया, चित्रकूट



श्री स्वामी अड़गड़ानन्दजी महाराज
(परमहंस महाराज का कृपा–प्रसाद)

# अनुक्रमणिका


| विषयः | पृष्ठ-संख्या |
| --- | --- |
| प्राक्कथनम् | (क-घ) |
| प्रथमोऽध्यायः – समाधिपादः | १-३० |
| द्वितीयोऽध्यायः – साधनपादः | ३१-६० |
| तृतीयोऽध्यायः – विभूतिपादः | ६१-९४ |
| चतुर्थोऽध्यायः – कैवल्यपादः | ९५-११६ |
| उपशमः | ११७-१४२ |
| एक भक्तस्य प्रश्नः | १४३-१४९ |


।। ॐ ।।

# प्राक्कथनम्

योगशब्दः 'युज्' धातुतः 'घञ्' प्रत्यय-विधानात् सुसिद्ध्यति। पाणिनीय व्याकरणानुसारेण युज् धातुर्गणत्रये पठितो विद्यते- १. युज् समाधौ दिवादिरात्मनेपदी, २. युजिर योगे रुधादिरुभयपदी, ३. युज् संयमने चुरादिः परस्मैपदी च। अनेन प्रकारेण योगस्यार्थः क्रमशः समाधिः, वस्तुमेलनम् संयमनञ्च निष्पद्यते।

संस्कृतगिरः प्रसिद्धे कोशप्रमुखेऽमरकोशे लिखितमस्ति- "**योगः सन्नहनोपायः ध्यानसंगति युक्तिषु**"- योगः सङ्गतिरस्ति ध्यानस्य, युक्तिरस्ति ध्यानस्य च। 'सन्नहनम्' तस्मिन् (परमात्मनः) ध्याने संघर्षशीला स्थितिवर्त्तनं वाऽस्ति योगः। आयुर्वेदीय चिकित्सा विधौ रोगापवारकोपायोऽपि योगः कथ्यते। ध्यानमाध्यमेन चलचेतसः संयमनमेकाग्रीकरणं वा योगः समुच्यते। एकाधिकद्रव्याणां संश्लेषो मेलनं वा योगः समुदीर्यते।

साधारणाः पुरुषा वारम्वारमावृत्तिपरकं तमभ्यासं योगं मन्यन्ते, येन योगेन काचिदलौकिकी सिद्धिर्भवेद्हस्तगता, यया सिद्ध्या चमत्कारकारकं तत् कार्यं सम्पद्येत्, यत् सामान्यजनस्य बुद्धितः शक्तितश्च कर्त्तुमशक्यं प्रतीयेत्।

ऋग्वेदीय पञ्चममण्डलस्थैकाशीतिसूक्तस्य प्रथमायां ऋच्यस्ति लिखितम्-

**युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य वृहतो विपश्चितः।**
**वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः।।**

विप्राः, अर्थात् ज्ञानीजना बुद्धिज्ञानयोः स्रोतसि परमात्मनि '**मनः युञ्जते**'- स्वमनः संयोजयन्ति, '**धियः युञ्जते**'- तस्मिन्नेव बुद्धिञ्च युञ्जन्ते। स एव '**एक इत देवः**' सर्वज्ञः, यशस्वी, तस्य स्तवनं महदस्ति।

अनया रीत्या वैदिक संहितासु परमात्मनि मनसो विनियोग एव योगस्याशयः परिलक्ष्यते।

अस्ति योगोऽनादिः। भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्यारम्भे समवोचि- '**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**" इममविनाशिनं योगमादावहं सूर्यमब्रवम्। "**स एवायं मया तेऽद्ययोगः प्रोक्तः**

**पुरातनः।''** ( ४/३ ) तदेव पुरातनो योगस्त्वदर्थं मयावर्णितः। इत्थं गीता योगशास्त्रमस्ति, यस्यां भगवान् श्रीकृष्णो योगबोधाय राजयोगसुरतियोगलययोग-हठयोगादीनामिव योगशब्दं विशेषणविरहितमेव योगशब्दं व्याख्यत् मात्र योगशब्दं सामस्त्येन सञ्जग्राह। **''यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।''** गीतायां श्रीकृष्णो महायोगेश्वराभिधानेनाभिहितोऽस्ति।

गीतायां भगवान् श्रीकृष्ण आह– हे कौन्तय! **''योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।''** ( ६/४७ ) योगिजनेष्वप्यसौ योगी मह्यं नितान्तं रोचते, य अन्तरात्मना मां भजति मयि चानवरतमासक्त मनाः सन्तिष्ठते। अर्थात् मनोवाक् कर्मभिरेकस्मिन् परमात्मनि संलग्नतायाः नाम योगोऽस्ति।

गीतायामब्रवीत् श्रीकृष्णः– '**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। ( ९/२२ )**' अनन्योऽर्थात् मत्तः परमन्यो न। मदतिरिक्तमपरं कमपि न भजमानो यः केवलं मामेव भजति, एवं भूतस्य मय्यासक्तभक्तस्य योगक्षेमयोर्भारमहं स्वयं वहामि। अर्थादनन्यभावेन भगवति संलग्नतायाः नामास्ति योगः।

गीतानुसारेण योगेसंलग्नतायाः को विधिः?–

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।**
**मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्।। ( ८/१२ )**

सर्वेषामिन्द्रियाणां द्वारं तत्तद् विषयेभ्यः परावर्त्त्य, मनो हृदयदेशे सुस्थिरं विधाय, सुरतं मस्तिष्के निरुध्य, '**ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। ( ८/१३ )**' 'ओम्' अलमेतावन्मात्रमेव तस्य परमतत्त्वस्य परमात्मनः परिचायकोऽस्ति, तस्य जपं विदधानो 'मामनुस्मरन्'– मम स्वरूपं ध्यायन् यो देहाध्यासं जहाति सः परमां गतिं प्राप्नोति। अर्थादेकस्मिन् परमात्मनि मिलनस्य नाम योगोऽस्ति। कदा भवान् मेलिष्यति?–

**अनन्यचेताः सततं यो मां स्मरति नित्यशः।**
**तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।। ( ८/१४ )**

अनन्यभावेनार्थादन्यकस्यापि देवीदेवस्य चिन्तनमकृत्वा यो निरन्तरं मां भजति, सदामय्यर्पितमनास्तस्य योगिनः कृतेऽहं सुलभोऽस्मि। अर्थात् भगवतोदर्शनं योगस्य परिणामोऽस्ति, न तु सिद्धिनां प्रदर्शनम्। किमस्ति योगः?–

**तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।**
**स निश्चयेन योक्तव्यो योगोऽनिर्विण्ण चेतसा।। (६/२३)**

संसारस्य संयोगवियोगाभ्यां यो विनिर्मुक्तः स एव योगनाम्ना प्रोच्यते। यदात्यन्तिकं सुखमस्ति, यत् परमतत्त्व परमात्मानं जानते बुधाः, तस्य मिलनस्य नामास्ति योगः।

वर्तमानकाले नानाविशेषणानामन्तराले योगः स्ववास्तवं मूलमुज्झाञ्चकार। जना ऐन्द्रजालिक प्रावीण्यमेव योगं कथयन्ति। मारणोच्चाटनवशीकरणादिषु प्रामुख्येनैव तेषां प्रचारका विशेषं ध्यानं ददन्ते। केचन योगिनः स्वकीयाभिरस्वाभाविकक्रियाभिस्तथायन्त्रमन्त्रतन्त्रबीजकवचादि माध्यमेन कर्मफलस्य खण्डनार्थं साधिकारं घोषणां कुर्वाणाः समवलोक्यन्ते। वास्तविक योगिन ईश्वरस्य चिन्तनार्थमियत्तन्मया भवन्ति स्म यत्ते स्वशरीरस्याऽपि ध्यानं धर्तुं न पारयन्ति स्म। शिरसः केशा जटायन्ते स्म, शरीरं रजोभिर्मृत्तिकाकणैश्च पिहितं भवति स्म, किन्त्विदानींतना जनाः कृत्रिमां जटां विरचयन्ति, मृत्तिकया शरीरं विलिम्पन्ति। ईश्वरः प्रेम्णश्चिन्तनस्य तथा विरहस्य च पन्थाः कथ्यते, किन्तु देशेविदेशे च 'योगा' नामव्याजेन मात्रासनानां प्रचारान्, कुण्डलिनीजागरणम्, ध्यानशिविराणि, प्राणायामप्रशिक्षण प्रचलनानि सन्निरीक्ष्य प्रतीयते, यदाधुनिकः समाजो योगदर्शनस्य प्रणेतु महर्षिपतञ्जलेर्योगदर्शनस्य मूलाशयात् परिवञ्चितो दृष्टिपथायते। एवंप्रकारिकासु विषमासु परिस्थितिषु सश्रद्धमाश्रमं गतागतं विदधतां भक्तजिज्ञासूनां तथाश्रमस्थ साधकानां योगदर्शन विषये पौनपौन्येन प्रश्नपरिप्रश्नाभ्यां प्रेरितः साधकान् समुपवेश्य महर्षिपतञ्जलेः सूत्रोपरि यः क्रमबद्धोपदेशः प्रदत्तः, तदेव प्रस्तुतकृतिरूपेण भवतां समक्षं प्रस्तूयते।

मौर्यवंशस्यान्तिमसम्राजः बृहद्रथस्य निधनानन्तरं तस्य ब्राह्मणसेना-पतिर्पुष्यमित्रशुङ्गस्य शासनकालः समायातः, येन भगवतो बुद्धस्य सिद्धान्तान् प्रविखण्ड्य जन्मोपरि निर्धारित ब्राह्मणानां पूज्यतोपरि निर्भराश्चातुवर्ण्य व्यवस्थायाः संस्थापना व्यधायि। अस्या नूतनव्यवस्थायाः परिपोषिकाः स्मृतयो धर्मशास्त्रनाम्ना तस्मिन् काले प्रतिष्ठामलभत्।

महर्षिपतञ्जलिः पुष्यमित्रस्यासीत् समकालीनः। तस्मिन् समये धर्मस्य नवनवाभिर्व्याख्याभि धर्मस्य व्याख्यादुर्दशां दृष्ट्वा सशङ्कस्तेन योगस्य कल्याणकारकं ज्ञानं संक्षिप्त सूत्रमाध्यमेन प्रस्तुतम्, येन भारतस्य परमप्राचीनतमा

विद्या मा विलुप्येत्। योगस्य सिद्धान्तानसौ सूत्ररूपेण व्यरचयत्, किन्तु स्पष्टैः शब्दैः संगुम्फितवान्। येन सुस्पष्टं प्रतीयते यच्छब्दानुशासन-व्याकरणोपरि तस्यासीदनितरसाधारणमधिकारः। लोकोक्तिरप्यस्ति यद्भगवान् पतञ्जलिर्मनोवाक्कायदोषनिवारणाय योगसूत्रस्य महाभाष्यस्य चरकसंहितायाश्च रचनाञ्चकार।

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलरानतोऽस्मि।।**

महर्षिपतञ्जलिर्योगमभिलक्ष्य न किमपि नूतनं लिलेख, प्रत्युत् गीतोक्तं योगसन्दर्भं सूत्रबद्धमकार्षीत्। चित्तवृत्तीनां निरोधो गीतायां वरीवर्ति, '**यत्रोपरमते चित्तं निरुद्धं योगसेवया।। ( ६/२० )**' यमेषु परिगणितोऽपरिग्रहः, गीताया '**एकाकी यतचित्तात्मा निराशीरपरिग्रहः।। ( ६/१० )**' श्लोकतो गृहीतोऽस्ति। '**स्थिरसुखमासनम्**' **( पातं. २/४६ )** इत्यस्यवर्णनं गीतायाः '**स्थिरमासनमात्मनः**' **( ६/११ )** श्लोकस्य पुनरुक्तिरस्ति। अभ्यासवैराग्याभ्यां मनसो निरोधः (गीतायाः ६/३५) श्लोकस्थ मतं पतञ्जलि मतं पुष्णाति। ओम्, इत्यस्य जपः, वीतरागसद्गुरोर्ध्यानम्, गुरुपदेशतो साधनायाः प्रजागृतिः, स्वरूपोपलब्धिः एतत् सर्वं महर्षेरस्ति गीतायाः रूपान्तरम्।

वर्तमानकाले योगस्योभे प्रमुखप्रणाल्यौ प्रचलितौ वर्त्तेते- एका तु सा या महर्षिपतञ्जलेर्योगसूत्रोपरि समाधारिता विद्यते, द्वितीया प्रणाली च हठयोगनाम्नाऽस्ति सुविख्याता। पातञ्जलयोगः 'चित्तानुशासनम्'- चित्तवृत्तीनामनुशासनोपरि समाश्रितोऽस्ति। यदातु हठयोगस्य सम्बन्धः शरीरसञ्चालनेन, स्वास्थ्येन रोगमुक्तया चास्ति। पतञ्जलिर्मनसः स्थैर्यं सुखपूर्वकोपवेशनमासनं मनुते, यत्र तु हठयोगस्य ग्रन्थाश्चतुरशीतः प्रारभ्य चतुरशीतिलक्षमितानि वर्णयन्ति श्रृंखलामासनानाम्। हठयोगे नेति, धौती, वस्ति, नौली, त्राटक, कपालभाति, महामुद्रा, खेचरी, जालन्धर, उड्डीयान, मूलबन्ध, बज्रोली, अमरोली तथा सहजोली सदृशाः क्रियाः प्रचलिता मिलन्ति, येषां विषये योगदर्शनं मौनं स्वीचकार। हठयोगप्रणाल्यां षट्चक्राणां भेदनं कुर्वन् कुण्डलिनीं ब्रह्मरन्ध्रं यावन्नयनं भवत्यावश्यकम्। तत्र योगस्याष्टाङ्गानां स्थाने षडङ्गानामिव चर्चाचर्चिता, यमनियमौ परित्यक्तौ स्तः। हठयोगः प्राणायाम विधौ श्वाससम्बद्धपूरककुम्भकरेचकेषु प्रामुख्येन दृष्टिं ददाति, यस्य उज्जायी,

भस्त्रिका, सूर्यभेदी, भ्रामरी, शीतलीत्यादीन्यनेकरूपाणि सन्ति। महर्षि पतञ्जलिः सिद्धिसमूहं ध्येयस्य प्राप्तौ व्यवधानं मनुते, यदाहि हठयोगिनः सिद्धिं योगस्य महत्वपूर्णामुपलब्धिं मन्वानास्तस्याः प्रदर्शनं कुर्वाणा वरीवर्त्तन्ते। नोदीरितुमर्हः प्रसङ्गोऽयं यत् योगस्यनामोपरि प्रणालीद्वय मिश्रणेनानेकभ्रान्तधारणानामभवत् प्रादुर्भावः। अथवा कथनमेत् समीचीनं भविष्यति यच्छारीरिक क्रियाभ्यो योगसंज्ञया सभाजनेन विकृतिवर्धनाय प्रोत्साहनं मिलति मिलितश्च। कल्याणकारको योगविधिः स एव यस्य परम्परा वेदेभ्यः समारभ्य गीतां यावदस्त्यक्षुण्णः, शुङ्गकाले महर्षिपतञ्जलिः पुनः सूत्रितवान्।

महर्षि पतञ्जलिना योगदर्शनं विश्वस्य सकलमानवमात्रं समुद्दिश्य विरच्य प्रस्तुतम्, यस्मिन् मानवमात्रस्यान्तःकरणे निहितदुःखानां कारणानां समूलमुन्मीलनं कृत्वा शाश्वतकैवल्यप्राप्तेर्मार्गदर्शनं परिस्फुटं परिलक्ष्यते।

योगसूत्राणि सन्ति जटिलानि, योगाभ्यासस्य कासाञ्चिदवस्थानां परिपूर्णा व्याख्या नोपस्थिता नयनगोचरायते। ताः संक्षिप्त टिप्पणीरूपेण वर्त्तन्ते, कल्प्यतां तानि सूत्राणि निर्दिशन्ति यत् कस्यचित्तत्त्वदर्शिनः सद्गुरोः शरणमाश्रयणीयम्। इत्युक्त सन्देशेन सह महर्षेः पतञ्जलेः सूत्राणां व्याख्या भवतां पुरतः प्रस्तूयते।

श्रीगुरुपूर्णिमा
२ जुलाई, सन् २००४ ई.

सद्‌गुरु कृपाश्रयी, जगत्बन्धुः
**स्वामी अड़गड़ानन्दः**

।। ॐ ।।

।। ॐ श्री परमात्मने नमः ।।

# महर्षि पतञ्जलिकृत 'योगदर्शन'

## ( प्रत्यक्षानुभूत व्याख्या )

महर्षिपतञ्जलिकृत योगदर्शनस्य चत्वारः पादाः, अर्थात् चत्वारः सन्त्यध्यायाः- समाधिपादः, साधनपादः, विभूतिपादः कैवल्यपादश्च। महर्षिरसौ सर्वप्रथमं समाधिपादस्य वर्णनमाध्यमेन योगस्य विशेषतासु प्रकाशपरकं वर्णनमकरोत्, येन पाठकस्य रुचिर्भवेत् जागृता, तत्रयावत् गमनस्य साधनां व्याख्यातवान्, साधनया परमात्मविभूतिनां प्राकट्यं भविता, अवसाने चाविनाशिन परमपद कैवल्यपदस्य प्राप्तेर्विधानं प्रादर्शयत्।

### प्रथमोऽध्यायः – समाधिपादः

शास्त्रस्यारम्भ एव स्वाभाविकः प्रश्नः समुदेति यन्मूलतः किन्नामास्ति योगः?

**अथ योगानुशासनम्।।१।।**

इदानीं क्रियते योगशास्त्रस्य प्रारम्भः। किमस्ति योग? एकमनुशासनमस्ति योगः। अनुशास्याः के- पार्श्ववर्त्तिनः सम्पर्किनः? कश्चिदेकोऽपरम्? एकदेशवास्तव्योऽन्यदेशनिवासिनम्? रहसि चिन्तनरतः साधकः कमनुशासयेत्? कस्तावन्नियन्त्रयितव्यः? अत उपरि ब्रूते-

**योगश्चित्तवृत्तिनिरोधः।।२।।**

चित्तवृत्तीनां सामस्त्येन सार्वत्रिको निरोधोऽस्ति योगः। वृत्तिस्तूर्मिकल्पा, मनसि प्रादुर्भवन्त्यः संकल्पोर्मयः। तदुर्भ्याः सर्वथा विरामः, निश्चलभावेन स्थिरीभवनमस्ति योगः। मन्यताम्, सातत्यं परिश्रमं विधाय कश्चिच्चित्तवृत्तीनां निरोधे भवेत् सफलस्तर्हि तेन निरोधेन को लाभः?

**तदा द्रष्टुः स्वरूपेऽवस्थानम्।।३।।**

निरोधोत्तरं द्रष्टुः स्वस्वरूपे भवति स्थितिः। द्रष्टाऽर्थादात्मा योऽस्ति चैतन्यः, सर्वथानिर्मलश्च स आत्मन एव परमात्मस्वरूपे स्थितो भवति। वृत्तीनां

निरोधस्यायमेवलाभः, इयमेव प्राप्तिः– नैष्ठिकीं सिद्धि अथवा परम तत्त्वस्यावबोधः। उत्तिष्ठति प्रश्नः, चित्तवृत्तीनां निरोधात् प्राक् द्रष्टा स्वस्वरूपे न सन्तिष्ठते किम्? तस्मिन् समये द्रष्टुः किमाकारकं भवति स्वरूपम्। अतः परमाह–

**वृत्तिसारूप्यमितरत्र।।४।।**

अपरस्मिन् समये द्रष्टुः स्वरूपं वृत्तिसदृशं भवति। यथा वृत्तिस्तथा पुरुषः, तदेव भवान्। जनाः कथयन्ति– अहन्तु शुद्धोऽस्मि, आत्माऽस्मि किन्तु महापुरुषा निगदन्ति यत् यथा भवति वृत्तेर्प्रवाहस्तथैव पुरुषस्वरूपमपि दृश्यते।

अर्जुनः पप्रच्छ भगवन्तं यद्भगवन्! इमं शास्त्रविधिं परित्यज्य किन्तु पूर्णश्रद्धान्विताः परमात्मानं ये भजन्ते तेषां का गतिर्भवति? (गीताया अध्यायः १७-१) भगवानब्रवीत्, "अर्जुन! पुरुषः श्रद्धामयोस्ति। एकोऽपि पुरुषः सृष्टौ नैतादृशो विद्यते, यस्मिन् श्रद्धा न भवेत्। यो यादृशीं श्रद्धां दधाति, स्वयमपि तथैव।" महर्षिःपतञ्जलिरप्येतदेवाह, यत्– यथावृत्तिस्तथापुरुषः। चित्तवृत्ति निरोधस्य स्वरूपेस्थितेः पूर्वस्य च वृत्तेर्यथा भवति प्रवाहस्तद्वद्भवते द्रष्टा प्रतीयते। परमात्मनः प्रतिबिम्ब प्राप्तिर्वृत्त्युनुसारिणी भवति। उदेति प्रश्नोऽयम् यदियं वृत्तिः का? किं स्वरूपं वृत्तीनाम्?–

**वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः।।५।।**

पञ्चधा विभाजितेमा वृत्तयः क्लिष्टाक्लिष्टभेदाभ्यां भेदद्वयं भजन्ते। एकादधाति क्लेशमपरा मोचयति क्लेशात्। पञ्चभेदात्मकवृत्तीनामिमानि सन्ति नामानि–

**प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।।६।।**

प्रमाणम्, विपर्ययः, विकल्पः, निद्रा, स्मृतिः, इति पञ्चवृत्तयः। एषु प्रमाणं वृत्तेः सञ्चालनं करोति, स्मृतिः संस्कारानामदधाति। मूलतो विपर्ययविकल्पाख्ये च द्वे वृत्ती स्तः। विपर्ययवृत्तिर्मिथ्या ज्ञानस्यास्ति संवाहिकाः, विकल्पस्तु अपौरुषेयशब्दम्, द्रष्टाद्रष्टिदृश्ययोः संयोगात् प्राप्तं शब्दं सम्प्रधार्य सञ्चलति। एका वृत्तिस्त्वस्तिनिद्रा। इयं सम्पूर्णानां वृत्तीनां सुप्तावस्था समुच्यते। अस्यां नत्वज्ञानस्य जाड्यं अथवा व्यर्थज्ञानस्यावगुष्ठनं शब्दज्ञानजं वस्तुनः (द्रष्टुः) विकल्पश्चास्ति। इयं निद्रावृत्ति जडशरीरं यावत् सीमिता वर्त्तते। योऽस्त्येव नहि,

भूतादीनां शरीरस्य नास्त्यस्तित्वम्, अभावोऽस्ति, तत्र यावदस्ति सीमिता, इयं वृत्तेर्निद्रावस्थाः।

भगवान् श्रीकृष्णो गीतायां बभाषे, "**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते।। ( १६/७ )**" अर्जुन! आसुरीवृत्तिशीला जनाः कार्ये कर्मणि प्रवर्तनमकरणीय कार्येभ्यो निवर्तनमपि न जानते। अर्थात् कर्त्तुं योग्यं किमस्ति कर्म तन्नावगच्छन्ति न तत्र प्रवर्तन्ते तथास्ति किमकरणीयं कर्मेदमपि न जानन्ति न तस्मान्निवृत्तिमीहन्ते। वृत्तेरियमस्ति सुप्तावस्थानिद्रा, यां भगवान् श्रीकृष्ण आसुरीसम्पदन्तर्गतं प्रतिपादितवान्।

प्रमाणवृत्तेः स्वरूपमवलोक्यताम्–

**प्रत्यक्षानुमानागमाः प्रमाणानि।।७।।**

प्रत्यक्षानुमानागमाः सन्ति त्रीणि प्रमाणानि। प्रत्यक्षम्, अक्षियुगलं प्रति, प्रत्यक्षम्, नेत्रसमक्षास्थितिः प्रत्यक्ष पदबोध्या, किन्तु नेयं प्रत्यक्षसीमा। पञ्चज्ञानेन्द्रियैः शब्दस्पर्शरूपरसगन्धानुभूतिरेव प्रत्यक्षं कथ्यते। एकवारमनुसुइयाऽश्रमेऽहं मध्यरात्रावासने शयानः प्रस्तरशिलोपरि। शीतलाच्छीतला रेखैका ममोदरोपरि प्रचलन्त्यभवत् प्रतीता। निवृत्तनिद्रेन विचारितं मया यदियच्छीतलं हिमसन्निभं प्रचलद्रेखेयं सर्पो भवितुमर्हति। शनैः-शनैः शैत्यानुभवो विरराम। त्वरितं प्रकाशिका (टार्च) प्रज्वालिता मया तत्रासीत् सच्चामुचं सर्पः। नेत्राभ्यामसौनावलोकितः किन्तु स्पर्शात् ज्ञातोदृष्टश्च।

वन्यजन्तवः क्रोशार्द्धदूरत एव सिंहस्य गन्धं परिचिन्वन्ति, चिकपिकादि सांकेतिक शब्दैः स्व-स्वसमूहं सतर्कं कर्त्तुं भवन्ति संलग्नाः। जनजातीयाः कोलभीलादयोऽपि पादक्रोशदूरत एव सिंहस्य गन्धमनुभवन्ति। अपरदिक्षु पलायन्ते, विटपोपरि समारोढुं प्रयतन्ते। नासिका यां गन्ध प्रत्यक्षानन्तरमनुमानः सक्रियो भवति।

तृतीयं प्रमाणमस्त्यागमः। परमात्मस्वरूप कैवल्यपदोन्मुखमग्रेसरणाय, आप्तपुरुषाणां दर्शनम्, तेषां वाणीसान्निध्यञ्च आगमः समुच्यते। प्रमाण प्राप्त्यनन्तरमेव सञ्चालिता भवन्ति वृत्तयः। चेत्ताः सन्ति

परमात्मनोन्मुखास्तदाऽक्लिष्टास्तथा प्रवृत्युन्मुखमग्रेसरास्तदा क्लिष्टाः कथ्यन्ते। प्रमाणेन भवति सञ्चालिता वृत्तिः।

प्रथमा वृत्तिः कथ्यते विपर्ययः–

**विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्।।८।।**

यत्तद्वस्तुनः स्वरूपे नास्ति प्रतिष्ठितम्– एतादृशं मिथ्याज्ञानमस्ति विपर्ययः। अस्तित्वरहितेषु वस्तुष्वासक्तिर्विपर्ययः। भगवान् श्रीकृष्णो ब्रूते– अर्जुन! आसुरी सम्पदर्जितः पुरुषश्चिन्तयति यन्मम सविधे वर्त्तत इयद्धनं तथाऽग्रेऽधिकं वर्धिष्यते। विपुलकुटुम्बपतिरस्म्यहम्। मयाशत्रुरयं व्यापादितः, अपरांश्च हनिष्यामि, यज्ञं विधास्यामि, दानं दास्यामि, कीर्तिं लप्स्ये, इत्थं कदापि पूर्तिमगच्छन्तीनामीहानां वासनानाञ्च सततमाश्रयं संश्रयते। एतादृशाः पुरुषाः शनैः–शनैः घोरतमे निरये निविशन्ते। तेऽन्धकारोन्मुखाः सन्ति। वृत्तिरियं सम्पूर्णरूपेण पदेपदेऽस्ति क्लिष्टा। किन्तु यदास्य प्रमाणाप्तिःस्यात्– यथाऽप्तपुरुषाणां दर्शनम्, दर्शनसमकालमेवेयं क्लिष्टावृत्तिरक्लिष्टोन्मुखी भविष्यति। वाल्मीक्यङ्गुलीमालादीनां वृत्तौ सत्पुरुषदर्शनेन परिवर्त्तनस्य समभवत् सूत्रपातः। पूज्य परमहंस महाराजस्य साहचर्य्यात् सतीअनुसूइयाक्षेत्रे दस्युदलस्येकस्याभूद्धृदयपरिवर्त्तनम्, तस्य दस्युदलस्य नायकः साधुवृत्तिं स्वीकृतवान्। विकल्पो द्वितीया वृत्तिरस्ति–

**शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।।९।।**

यज्ज्ञानं शब्दजनितज्ञानेन सह संभाव्यते, वस्तुतो यस्य विषयोवस्तु नास्ति सोऽस्ति विकल्पः। अस्यैव पादस्य द्वाचत्वारिंशत्तमे सूत्रे लिखितमस्ति ''**तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः।**'' अर्थात् शब्दार्थज्ञानानां त्रयाणां विकल्पेन मिलिता समाधिः सवितर्कः समुच्यते। किन्तु कस्यचिच्छब्दस्य श्रवणेन तस्याशयावबोधेन समाधिस्तु न भवति सफला। विभीषणः श्रीरामस्य शरणमाजगाम, निवेदनं कृतवान् किन्तु मन्त्रिभिः सन्देहोऽभिव्यक्तः, '**कामरूप केहि कारन आया।**' (कामरूपोऽयं कस्मात् कारणात् समागतः) शब्दोऽपिश्रुतोज्ञातश्च, आशयोऽपिसमवगतः, तदनुसारेण विभीषणं निगडितुमभूत् प्रबन्धः, समाधिस्तु न कस्यापि लगितवती।

वस्तुतः शब्दोऽयमनुभवोऽस्ति, यः सक्षमसद्गुरुमाध्यमेनाधिकारिणि साधके भजनस्य जागृतिरूपेण भवति प्रस्फुटः। द्रष्टुर्दृश्यस्य च संयोगात् या

प्रेरणा मिलति, यदस्ति प्रयोजनं दृश्यस्य पुरुषस्य कृते भोगमोक्षयोः प्रदानम्– इदं प्रयोजनं पूरयित्वा द्रष्टुः दृश्यस्य च संयोगोऽपि प्रशाम्यति। असौ चेतनो द्रष्टा येन प्रकारेण मुक्तिप्रयोजक दृश्यं सञ्चालयति, सम्बोधयति, तस्यास्ति नाम शब्दः। एतच्छब्दाश्रिताभूत्वा प्रगतिशीला चित्तवृत्तिर्विकल्पः कथ्यते। अत्र तु नास्ति परमात्मा वस्तु किन्तु तस्य विकल्पः सुदृढायते। '**सत्य वस्तु है आत्मा, मिथ्या जगत् पसार।**' सत्यस्य कालत्रयेऽपि न विद्यतेऽभावः। आत्मैव सत्यं सनातनश्च। अनया रीत्या वस्तुजातं तु परमात्मा नास्ति, किन्तु तस्य विकल्पः साधुप्रकारेण भवति परिपुष्टः, अस्यैव नाम विकल्पवृत्तिरस्ति। सम्पूर्णेयं वृत्तिरस्त्यक्लिष्टा, किन्तु संगदोषात् प्राप्ते प्रमाणे सत्येवेयं वृत्तिक्लेंशोन्मुखी भवति– '**श्रृंगी की भृंगी करि डारी, पाराशर के उदर विदार।**'

पूज्य परमहंसमहाराजोऽन्वभवत् यत् स अतीतानेक जन्मस्वासीत् साधुः। इतःपूर्वस्मिन् जन्ममृत्योरासीन्निवृत्तिः सुसम्भवा तदैव तस्मिन् जन्मनि द्वित्राणि कुतुहलानि मनसि प्रादुर्भवितुमारेभिरे यदयं वैवाहिकोपक्रमः किमस्ति? कतिपय महात्मानो मादकगञ्जस्य धूम्रपानं कृत्वा दोलायमानाः कथं मत्तायन्ते? मनस एतावन्मात्रस्खलनेनेकमपरं जन्म गले पतितम्। महाराजाः सर्वथाक्लिष्टवृत्तौ रममाणा आसन्। मनसः स्फुरणेन क्लिष्टायां वृत्तावाजग्मुः। शब्दोपरि महापुरुषा बहुबलमददुः –

**शब्द बिना श्रुति आँधरी, कहो कहाँ लौं जाय।**
**द्वार न पावे शब्द का, फिर फिर भटका खाय।। (कबीर)**

ऋते शब्दं चिन्तने या सुरतिर्विनियुज्यते, सा दृष्टिहीना। बुद्धिस्तरानुसारेण शब्दं विना श्रुतेरध्ययनं तथ्यविभ्रान्तिमात्रमस्ति। शब्दार्थयोर्ज्ञानं समवगच्छन्नाचरणे न जातः सन्निवेशस्तर्हि मुहुर्मुहुः प्रस्फुरति भ्रमानुबन्धः। अनुभवोऽपि भवति वर्ण्यविषयः। भगवान् सलिङ्गालिङ्गाभ्यां प्रतीकाप्रतीकाभ्यां बोधं ददानो विराजते विधेयं पठितुमनिवार्या। एतदेवास्ति '**शब्द ज्ञानानुपाती वस्तुशून्यो विकल्पः।**' शब्दोऽनुसन्धेयो यदिष्टमाध्यमेन कथितः किम्? अस्य किमस्त्याशयः? तस्माच्छब्दादुत्पन्न ज्ञानेन सह मनस्युत्तिष्ठन्ती वृत्तिः, यस्या विषयवस्तु नास्तीष्टः, किन्तु तद्विकल्पोऽवश्यमस्ति। इयमेव विकल्पवृत्तिः।

भगवान् श्रीरामोऽनुजं लक्ष्मणं प्रावोचत्, "मायाया विद्याविद्येरूपद्वयमस्ति। '**एक दुष्ट अतिशय दुःख रूपा। जा बस जीव पड़ा भव कूपा।।**'

अविद्याऽस्ति दुष्टा; बहुदुःखरूपा, तया विवशीभूय जीवोऽयं भवकूपे वर्त्तते प्रपतितः। **'एक रचइ जग गुन बस जाके। प्रभु प्रेरित नहिं निज बल ताके।।'** विद्या मायायां अपरं रूपमस्ति या जगतो गुणत्रयं नियन्त्रितुमस्ति सक्षमा, 'गुन बस जाके', किन्तु सा विद्यास्वरूपा मायाऽस्ति प्रभुप्रेरिता। चेद्भगवान् न ददेत् प्रेरणां तदा तस्याः पार्श्वे नास्ति किमपि स्वकं बलम्, सा विद्या अस्त्येव नहि। एवं द्रष्टुः साह्येन प्रचलन्ती वृत्तिः कथ्यते विकल्पवृत्तिः।

सर्वथाऽक्लिष्टेयं विकल्पवृत्तिः, विजातीयदृश्येप्रत्यक्षीभूतेसतीयं क्लिष्टोन्मुखी भवितुं शक्नोति। यथार्थतः साधनपक्षोऽयमतीव दुर्गमः, भोगस्तु स्वल्प कालायापि न भवति त्याज्यः। क्वचिनिर्जने कुटीरस्येकस्य निर्माणं बहुपरिग्रहे न गण्यते। सम्प्रति निद्रावृत्तेलक्षणमुदीर्यते–

**अभावप्रत्ययालम्बना वृत्तिर्निद्रा।।१०।।**

अभावज्ञानस्यावलम्बनकारिका वृत्तिः कथ्यते निद्रा। नत्वियं संसारस्य मिथ्या ज्ञानेन निबद्धाऽस्ति न च शब्दोत्पन्न ज्ञानमस्ति– एतादृशी वृत्तिरस्ति निद्रा। वृत्तेरियं सुप्तावस्थोदीर्यते– यदा व्यक्तिर्न प्रकृत्युन्मुखोगतिशीलः न स्वरूपोन्मुखोगतिशीलश्च। अयं महापुरुष इमामपि वृत्तेः सुप्तावस्था ममन्यत्, वृत्तिरेषा निद्रा।

**'या निशा सर्वभूतानां तस्यां जागर्ति संयमी।' ( गीता, २/६९ )** जगत्स्वरूपायां निशायां सर्वे सन्त्यचेतसः। इयमेव निद्रावृत्तिः। जगद्रूपायारात्रौ प्रायः सर्वेजनाः प्रकृतावसक्ताः सन्तिष्ठन्ते, किन्तु निद्रावृत्तिवान् प्रकृतेर्जडताप्रभाव मुक्तस्तिष्ठति। मन्यतामस्ति मार्गयुगलम्। एकं प्रकाशप्राचुर्यमस्ति तथाऽपरमस्ति व्याप्तं निविडतमः। उभयोमार्गयोरन्तराले पदाति पथ्येकस्मिन् कश्चिद्व्यक्तिरस्ति प्रगच्छन्– एकः पाद एकस्मिन् पथि द्वितीय पदोऽपरस्मिन् पथि। कदाचिदितः कदाचित्ततः पश्यति। इयमस्ति निद्रावृत्तिः– पथिको न संसारोन्मुखो न चेश्वरोन्मुखः।

अहमपि पूज्य महाराजस्य शरणमब्रजम्, श्रीमहाराजेनोक्तम्, "कुच्छउ नहीं जानत है!" (अर्थात् अल्पतममपि न जानाति) वस्तुतो नासीन्मे किमपि ज्ञानम्। नितान्तं निद्रावृत्तिः। न तु संसारस्य जडताप्रभावः, न भगवत्पथस्य ज्ञानमासीत्।

इयं निद्रावृत्तिरपि न स्थास्यति सर्वदा। यावत् किञ्चित् प्रत्यक्षं सेत्स्यति, तावद् वृत्तिर्भविष्यति गतिशीला। शुभस्य जातेप्रत्यक्षेऽक्लिष्टावृत्तिः सम्प्रसज्यते, अशुभे प्रत्यक्षायिते क्लिष्टावृत्तेरुदयः। कमपि वैभवसम्पन्नजनमैक्षिष्ट, सांसारिक जीवने सफलतामचीकमत्, यदस्त्येव नहिं 'मिथ्याज्ञानम्' तन्मुखाकृष्टीभूय क्लिष्ट वृत्तेः सर्जनमकार्षीत्। क्वचिदागमप्रमाणप्राप्तौ महापुरुषस्य दर्शनानन्तरमसौ परमात्मोन्मुखो भविष्यति, अक्लिष्टावृत्ति भविष्यति प्रवाहिता।

इमाः सर्वा वृत्तयो यत्र भवन्त्यङ्कुरितास्तद्धरातलमस्ति स्मृतिः-

**अनुभूत विषयासम्प्रमोषः स्मृतिः।।११।।**

भूतकाले येषां कार्याणामनुसरणं संभवन्निदानीयावत् प्राचलत् तेषां पुनः प्रकटीभवनम्, नतिरोहनमस्ति स्मृतिवृत्तिः। कैवल्यपादस्य सप्तमे सूत्रे महर्षि पतञ्जलिराह यत्- योगिनः कर्माशुक्लोऽकृष्णश्च भवति। तेषां कर्मणां शुभाशुभसंस्कारौ न प्रभवतः कुतोहि ते सन्ति स्वरूपस्था; किन्त्वन्येषां कर्माणि त्रिधा भवन्ति, प्रशस्तानि निन्दार्हाण्यु भयात्मकानि च। प्राणिसंस्काराणामन्तराले जात्यार्थात् जन्मदेशकालानां व्यवधानं न क्षीयते। चित्तवृत्तेः प्रकारान्तरेणान्यस्मिन् परिवर्तनं जाति अर्थात् एकं जन्म कथ्यते। शरीरं परिवर्तनमिदमप्यस्ति जन्म। अनेन जन्म परिवर्तनेन देशकालयोर्जाते व्यवधानेऽपि संस्काराणामभिव्यक्तिकरणे न भवति किमपि व्यवधानम्। यथावसरं तथैव भवत्यभिव्यक्तम्। यतोहि स्मृतिसंस्कारयोरुभयोरेकमेवास्ति स्वरूपम्। स्मृतिस्तद्धरातलमस्ति यत्राङ्कुरन्ति संस्काराः। संस्काराः स्मृतिपटले प्रस्फुरन्ति किन्त्वेकं स्तरमेतादृशं समायाति, यदा जायते चित्तस्य निरोधः, एवं स्थितौः ''**स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थ मात्रनिर्भासा निर्वितर्का।**'' (१/४३) स्मृतिरुचितप्रकारेणाभूच्छुद्धा, चित्तस्य निजं स्वरूपमभवच्छून्यम्, लक्ष्यमात्रस्यैवावशिष्ट आभास इयमेव निर्वितर्काः समाधिः। तस्मिन् काले स्मृतिः सम्यग्रूपेण भवति निर्मला। तस्यां न किचिच्छुभमङ्कुरति न चाशुभम्। कुतोहि चित्तस्य स्वरूपमेव शून्यतामगात्। अन्तिमोऽपि संस्कारः सम्मुखमुत्थाय समाययौ फलञ्चायच्छत्, अभूच्च शान्तः। तस्मिन् समये स्मृतिः पूर्णरूपेण जायते शुद्धा किन्तु लसति सजीवा।

स्मृतिर्न काऽपि वृत्तिः। महर्षिर्वृत्तीनां बोधनार्थं पञ्चधा कृतवान् विभाजनम्। तासामन्तरालत इदमेतादृशमस्ति धरातलं यत्र शेषा वृत्तय भवन्त्युद्भूताः। अन्तिम

संस्कारस्य निर्गते सत्येव चित्तस्य स्वरूपं शून्यसन्निभो भवति, स्मृतिर्भवति परिशुद्धा, केवलं लक्ष्यमात्रस्याभासोऽवशिष्यते, तस्मिन् निर्वितर्क समाधेःस्थितिरनुभूयते। अतः स्मृतिस्तद्धरातलमस्ति यदुपरि पूर्वतः कृतानुसरणाश्चिरकालीनाः संस्कारा भवन्त्यङ्कुरिताः। इमे क्लिष्टास्तथाऽक्लिष्टा भवितुं शक्नुवन्ति।

श्रीमद्भगवद्गीतायामाह श्रीकृष्णः– इयमविनाशिनं योगमहं कल्पादौ सूर्यमब्रवम्। सूर्यः स्वपुत्रमादिमनुममुमध्यापयत्। स मनवे न किमपि दत्तवान् केवलं पाठितवान्। मनुस्तं स्वस्मृतौदधौ। इयमाध्यात्मिक प्रक्रिया प्रारम्भत एव प्रचलन्ती समायाति। मानवस्य समुत्पत्या सहैवेयमभूत् प्रसारिता, तत आरभ्येदानीं यावद् वृत्तेर्द्वेरूपे वर्त्तेते– दैवीसम्पदासुरीसम्पच्च। एका परमं श्रेयः प्रयच्छति, इयमस्त्यक्लिष्टाऽपरातु नयत्यधोगतिं साऽस्तिक्लिष्टा। इमे द्वे सम्पदौ शुभाशुभभेदेन, प्रवृत्तिमार्ग निवृत्तिमार्ग भेदेन, सजातीय विजातीय भेदेन, विद्याऽविद्याभेदेन ज्ञायेते– विद्या सा या परमगतिं प्रददाति, अविद्या साऽस्ति या भवकूपे भ्रामयति। अयमेवास्ति पुण्यमयप्रवृत्तेः पापमयप्रवृत्तेर्भेदः, धर्मक्षेत्रकुरुक्षेत्रयोरपि स एव प्रकारः। कालक्रमानुसारतो भाषासु बभूव परिवर्त्तनं, सम्बोधनविधिरपि परिवर्त्तनं प्राय किन्तु वृत्तीतूभेऽवस्थितवास्ताम्, एकेश्वरोन्मुखीवृत्तिरपराऽनन्तयोनिषु वारम्वारं भ्रमणकारिका वृत्तिः। किन्तु महर्षि पतञ्जलिरेतासां वृत्तीनां गतिं बोद्धुं बोधयितुञ्चैताः पञ्चदृष्टयाऽग्रहीत्। केनप्रकारेण वृत्तिर्भवति सञ्चालिता? प्रमाणेन। वृत्तिः कस्मिन् धरातले भवत्यङ्कुरिता? स्मृति पटले। यदाकदेयं सुषुप्ता सन्तिष्ठते तदेयं निद्रा। कया प्रेरणया चलति? कस्यां दिशि? विपरीत ज्ञानस्य जड़तायास्तु बन्धनमस्ति विपर्ययस्तथा द्रष्टुर्दृश्यस्य च संयोगतो मिलति यः शब्दस्तस्यावबोधनं हृदयङ्गमीकरणं लगनञ्चाऽयमस्ति विकल्पः। अनया रीत्या वृत्तयो नैक दृष्ट्या सन्ति रेखाङ्किताः, येन साधकः सरलतया वृत्तीनां गतिं जानीयात् नेतुं शक्नुयाच्च प्रयोगे।

वृत्तयः शान्ताः कथं स्युः? वृत्तीनां निरोधः कथं स्यात्? एतदर्थं प्रारम्भिक उपायः समुच्यते–

**अभ्यास वैराग्याभ्यां तन्निरोधः।।१२।।**

तासां चित्तवृत्तीनां निरोधोऽभ्यासवैराग्याभ्यां भवति। इत एव साधनस्यारम्भो भवति। पूर्त्तिपर्यन्तमिमौ सह चलतः। अनयोरेकतरस्याभ्यासस्य स्वरूपं द्रष्टव्यम्–

**तत्र स्थितौ यत्नोऽभ्यासः।।१३।।**

चित्तस्य स्थैर्यं हेतवे क्रियते यदुपायः सोऽभ्यास उदीर्यते। अयमभ्यासो वृत्तीनामन्तिमनिरोधावधौ चलति, एतस्मादस्य सम्यग् रूपेण परिपालनं विधेयम्। अत उपरि ब्रूते–

**स तु दीर्घकालनैरन्तर्यसत्काराऽऽसेवितो दृढभूमिः।।१४।।**

किन्त्वसाभ्यासो दीर्घकालं यावन्नैरन्तर्येण श्रद्धया च सह विधानेन दृढतामाप्नोति। भगवान् श्रीकृष्णः कथयति गीतायाम्– '**स निश्चयेन योक्तव्यो योगोऽनिर्विण्ण चेतसा।**' (६/२३) योगोऽयं स्थिर चित्तेन सनिश्चयमस्ति करणीयम्। स धैर्यं निरतः साधक एव योगेऽस्मिन् भवति सफलः। अधुना वर्ण्यते वैराग्यस्वरूपम्–

**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।।१५।।**

लोकेपरलोके च दृष्टश्रुतविषयेषु निवृत्ततर्षस्य चित्तस्य वशीकारनाम्न्यवस्था वैराग्यं वाभण्यते। अर्थाज्जगति यत् किञ्चित् दृष्टं श्रुतञ्च प्रत्युदित आरभ्य स्वर्गीयभोगेभ्यो रागस्य त्यागो वैराग्यमुदीर्यते। इत्थमेव वैराग्यमभ्यास सम्पन्नत्वे विदितो भवति सः पुरुषः। यतः परमायाति परवैराग्यावस्था।

**तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्।।१६।।**

पुरुषस्यार्थात् परमतत्त्वपरमात्मनो ज्ञानेन द्रष्टुर्भवति स्वरूपे स्थितिः, तस्मिन् समये प्रकृतेर्गुणेषु तृष्णायाः सार्वर्थिकाभावः पर–वैराग्यमस्ति, इयमस्ति वैराग्यस्य पराकाष्ठा। ब्रूते गीतायां भगवान् श्रीकृष्णः, "**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।**" (२/५९) विषयेभ्य इन्द्रियाणि समाहर्तॄणां रागोऽपि परमतत्त्वपरमात्मनः साक्षात्कारं कृत्वा विनिवर्तते। यदा श्रेष्ठतरं किञ्चिदपि प्राप्तव्यं नास्ति, तदा साधकस्तृष्णामपि विदधीत्तर्हि कस्मिन्? यः पुरुषः ज्ञानेन पर–वैराग्यं समासादितवान् किमस्ति तस्य स्वरूपम्? पूर्णज्ञानात् पूर्वावस्थायाश्चित्रणं कुर्वन्नाह–

**वितर्कविचारानन्दास्मितानुगमात्सम्प्रज्ञातः।।१७।।**

वितर्केण, विचारेण, आनन्देन अस्मितया च सह या समाधिर्भवति सा सम्प्रज्ञातसमाधिः कथ्यते। योगे सुरतोऽस्ति समः, योगः सम्यक् प्रकारेणास्ति विज्ञातः, किन्त्वस्मिन् योगे प्रचलद्वर्तते वितर्कः। अग्रे प्राहुः, "**वितर्क बाधने प्रतिपक्ष भावनम्।**"– योगसाधने समायाते विपरीतभावे तत्रावरतावलोकनम्, तन्माध्यमेन सम्भावितानिष्टभावनां विभाव्य ततः संरक्षणमस्ति प्रतिपक्षभावना। एवं वितर्का अभ्युत्तिष्ठन्ति, निवारणाय तेषां विचारोऽपि सततं चलति। यदैव भवति वितर्कनिवारणं तदैवानन्दोऽपि तथास्मिताप्रकृतिपुरुषयोर्मिश्रणप्रसूतचित्तस्य यत् समाधानम्, सा योगस्य सम्प्रज्ञाताख्यावस्थास्ति। इदानीं प्राप्तिं पश्यतु–

**विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः।।१८।।**

यदा वितर्के, विचारे, आनन्दे, अस्मितायां चाऽपि लगेद्विरामः, अभ्यासं कुर्वन्-कुर्वन् पूर्वोक्तावस्थोपरि यत्र विरामोऽलगत्, यत्र चित्तस्य स्वरूपस्य मात्र संस्कारः शेषायते, स योगस्त्वन्य एवास्ति, अर्थात् असम्प्रज्ञात समाधिरस्ति, अर्थात् सः कैवल्यावस्थावानस्ति, सूक्ष्मोऽस्ति, अस्त्यनिर्वचनीयः। यस्मिन्ननेकजन्मभिर्गतिशीलाः पथिका एवेमां स्थितिं यावत् गन्तुं पारयन्ति। यथा– बुद्धोऽनेकजन्मानन्तरं राजप्रासादे जन्म लेभे, तज्जन्म तस्य प्राप्तिप्रदमन्तिममासीत्। काकभुशुण्डिनः अन्तिमं जन्मं सहस्रजन्मोत्तरमन्ते प्राप्तिकारकं जन्मासीत्। गुरोर्महाराजस्याप्यन्तिमं जन्मासीत् प्राप्तिप्रदः। जडभरतः, शुकदेवः, ध्रुवः, भगवान् श्रीकृष्ण इत्यादय एतादृशाः महापुरुषा आसन्, ये जन्मना पूर्णप्राप्तिवन्त आसन्। एवं प्रकारकाणां महापुरुषाणां योगः शीघ्रं सिध्यति, यतोहि–

**भवप्रत्ययो विदेहप्रकृतिलयानाम्।।१९।।**

भजनं विदधन्-विदधन् येषां साधकानां कृते भवति सम्प्राप्ताः विदेहावस्था, प्रकृतेरभूल्लय, एतादृशानां योगिजनानां कृतेऽस्य योगस्य प्राप्तौ 'भवप्रत्ययः' अर्थाज्जन्मग्रहणमेव माध्यमं भवति, भजनस्य सहयोगविशेषो नापेक्ष्यते, यथा शुकदेवकृष्णध्रुवादयः सम्भूतास्स्मर्यन्ते। एभिर्गृहीतं जन्म, जन्मग्रहणोत्तरमेषां पुरतः सिद्धयः सम्यग् रूपेण कार्यं कुर्वन्त्य आसन्। एषां भजनमगात् पूर्णताम्। सम्प्रति पूर्णत्वे प्राप्ते जन्मग्रहणमेतेषामस्ति माध्यमम्।

ध्रुवोऽप्राक्षीत, "भगवन्नश्रावि मया यत् साधकाः कोटि कोटि वर्षाणि यावत् प्रयतन्ते, तदा क्वचिद्भवान् दृष्टिपथायते। स्वल्पतर साधनेनैवादर्शिभवान् मया। एतादृश्यनुकम्पाकिमर्थम्? भगवतोदिरितम्, "वत्स! गणनातीतेर्जन्मभिस्त्वं भजमानोऽसि। तं पर्वतमवलोकय तत्र दृश्यमानोऽस्थिपञ्जराम्वारस्तवौस्थिनि पञ्जराणि च सन्ति। अत्रैवाश्मशिलापट्टे त्वं भजनमकारीः। अस्मिन्नेव स्थले बभूव ते शरीरपातः। इदं तव जन्मप्राप्तिपरकमस्ति। प्राप्तौ षडेवमासा आसन् शेषाः, यान् त्वं पूर्णं कृतवान्, अचल पदं च प्राप्तवान्।"

महाभारतेऽस्येकः कथाप्रसङ्गो यत् भगवान् श्रीकृष्णः पूर्वतनयैर्दशजन्मभिः सातत्वेनासीत् चिन्तनपरायणः। स पूर्वोक्त जन्मसु विष्णुवामननारायणादि रूपेष्वतारा अपि वर्णिताः, किन्तु त आसनपूर्णाः। राजन्! अस्मिन् जन्मनि परब्रह्मेदं परमात्मनः स्वरूपेण भवता सह राजते, विजयस्ते भविष्यति– देवर्षि नारदो मामित्थमसूचयत्। युधिष्ठिरं सान्त्वनां ददानोऽर्जुन एवमचकथत्। वस्तुतो भगवतः जन्मना सह तस्या लौकिका विभूतयः प्रदर्शिता भवितुमारेभिरे, स्वल्पतरमेवासीच्छेरवं भजनम्। भवान् दिनत्रयं यावत् बद्रिकाश्रमे ध्यानस्थोऽभूत्। ब्राह्मे मुहूर्ते द्विवादनवेलायां समुत्थायाक्षणोरुपरि जलप्रेक्षणं कृत्वा भजनार्थमुपविशति स्म। अनेन प्रकारेण श्रीकृष्ण आसीत् भवप्रत्यययोगी। भवस्यार्थः शरीरम्, श्रीकृष्णस्य पूर्णत्वप्राप्तौ जन्मग्रहणमेवासीत् द्वारम्, न तु साधनम्।

"**बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः।**"– **( ३/४३ )** बहिर्दृष्टश्रुतवस्तुषु कल्पनारहित वृत्तेर्यदा ऋजुप्रवाहः प्रचलेत्– इयं महाविदेहावस्थास्ति। अस्याः जागृते सत्येव ज्योतिर्मय द्रष्टुरात्मनस्तव चान्तरालस्यावर्णं प्रशाम्यति। एतद् स्थितिवतः साधकस्य शरीरं यदि मुच्यते, तर्हि जन्मग्रहणमेव तस्य पूर्णतायाः माध्यमं भवति। तस्य प्राप्तौ '**भवप्रत्ययः**'– पुनर्जन्मग्रहणमेव माध्यममस्ति, न तु साधना। साधना तु तस्य पूर्णतामगात्। अतएवैतेषां महापुरुषाणां योगस्तत्कालं सिद्धो भवति। किन्त्वपरेषां जनानां योगः कथं सिध्यति? अत उपरि कथ्यते–

**श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्।।२०।।**

अपरेषां साधकानां चित्तवृत्तिनिरोधो लक्ष्यप्राप्तिरूपयोगश्च श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकैः क्रमशः सिद्धिं प्राप्नोति। सर्वप्रथमं तु परमात्ममार्गे भवत्यावश्यकी श्रद्धा। कथयति भगवान् श्रीकृष्णः यत् श्रद्धां विना हुतं हव्यम्, दत्तं दानं कृतं च कर्म सर्वं भवत्यपार्थम्, अतः–

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।** (४/३९)

अर्जुन! श्रद्धावान् संयतेन्द्रियस्तत्परायणश्च पुरुषस्तज्ज्ञानं लभते, यश्च प्राप्तेरनन्तरं किमपि प्राप्तव्यं न शेषायते। ईश्वरपथे श्रद्धाभावोऽनिवार्योऽस्ति। ऋते श्रद्धा भगवतः न लभ्यते किञ्चिदपि, सर्वं याति निरर्थकम्, अतः पथ्यस्मिन् श्रद्धा भवत्वनिवार्या, तदपि केवलमीश्वरहेतवे। ईश्वरस्वरूपस्य चर्चां महर्षिरस्य पादस्य चतुर्विंशतितमे सूत्रे विधास्यति। अस्मिन् मार्गेऽपरावश्यकता मनसः दार्ढ्यमस्ति। बद्धपरिकरेण स पराक्रमेण साधकेन साधनायां लगितव्यम्। इत्थं न भवेद् यदल्पकष्टप्राप्त्यैव पृष्ठे पलायेत्। ध्रुववत्, प्रह्लादवत् मीरावच्च दृढ़तया सह, ईश्वरपथे संलग्नताया अस्ति विधानम्। साधकेन सर्वदा लक्ष्यं स्मर्तव्यम्। तदैव भवत्यनिवार्या सचेतावस्था। खादन्-पिबन्, उत्तिष्ठन्-तिष्ठन् च प्रत्येक क्रियाकलापैः सह सुरतं लक्ष्योन्मुखं स्थिरं भवेत्। सुरतं रसनास्वादे तथैन्द्रिय भोगे रसन्न स्वदेत्। ईश्वरीयसन्देशानां निर्देशानां च ग्राहिका बुद्धिर्प्रज्ञा कथ्यते। प्रज्ञापूर्वकं क्रमशः योगोऽयं प्राप्नोति सिद्ध्यम्। पूर्णश्रद्धया, पूर्णपराक्रमेण तथा पूर्णस्मृत्या सह विद्यमानानां साधकानामनेकानि स्तराणि सन्ति–

**तीव्रसंवेगानामासन्नः।।२१।।**

येषां साधनानामस्ति तीव्रागतिस्तेषां कृते योगोऽयमासु सिद्धिं लभते। अभ्यासवैराग्ययोः साधनायां सम्भावितान् विघ्नान् निवारयन् स्वलक्ष्ये दृढ़संकल्पवन्तः शीघ्रं चित्तवृत्तिनिरोधं कर्तुं प्रभवन्ति। साधनामात्रापि प्राप्तिकालं प्रभावयति–

**मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः।।२२।।**

साधनायाः अल्पतरायाः मध्यमायास्तथोच्चमात्रायाः अनुसारतः द्रुतगत्या गतिशीलानां योगिनां सिद्धावपि भवन्ति भेदाः, प्राप्तिकाले मनागन्तरालं वर्धते।

केषांचित् साधकानामन्तराले संस्काराणां वेगोऽस्त्यधिकः, केषांचित् संस्काराः सन्त्यल्पाः, तदनुसारेण लक्ष्यप्राप्तौ शीघ्रताविलम्बौ भवितुं शक्नुतः।

भगवान् बुद्धो बोधगयायां भजमान आसीत्। पञ्चान्ये भिक्षवोऽपि तस्य नातिदूरं साधनां कुर्वन्तः आसन्। एकस्मिन् दिने ते भिक्षवः खादन्तं बुद्धं दृष्टवन्तः। ते सर्वे बुद्धं शरीराशक्तं मन्वानास्तस्य सान्निध्यं विहायान्यत्र तपः कर्तुं सारनाथं जग्मुः। इतस्तु बुद्धः सिद्धिं लेभे। तदर्थममिलदादेशः यदल्पमलवतां कल्याणं विधेयम्। तथागतः सुतरां तत्रैवाजगाम यत्रासन् ते पञ्च भिक्षवः।

दूरत एव महात्मानं बुद्धं दृष्ट्वा ते भिक्षवः निश्चयं चक्रुः यदस्य नाभिवादनं विधेयम्, स्वागते न प्रक्षालनीयौ चरणौ किन्तु यदाहि तथागतोऽगादन्तिकम्, अभवन् सर्वे समुत्थिताः। केनचित् करपटो गृहीतः, केनचित् जलं प्रस्तुतम्, केनचिदासनं सज्जितम्, केनचित् प्रक्षालितौ चरणौ, तथागतः समुपविष्टः। ते भिक्षवः प्रश्नानकुर्वन्। बुद्धस्योपदेशारम्भो बभूव। उपदेकालएवैकेन सिद्धिरुपलब्धा। द्वितीयश्चतुर्दशदिवसाननन्तरं कैवल्यपदमाप्तवान्, तृतीयो भिक्षुस्तेनोपदेशेन मासद्वयानन्तरं कैवल्यपदं लब्धवान्। यदा तु ते सर्वे साधने समानरूपेण श्रमं कृतवन्तः। इदमेवास्ति कारणं यत् प्रतीव्र संवेगवतां मध्येऽपि प्राप्तौ कालभेदो भवति। सम्प्रति वर्ण्यते यदभ्यासः क्वकरणीयः?

महर्षिस्तु प्रथममेतदुपादिदेश यद्वैराग्याभ्यासौ प्रशान्त चित्तेन साङ्गोपाङ्गमनवरत साधनया स्थितिवन्तो भवन्ति साधकाः। अनेन चित्तवृत्तयः शान्ता निरुद्धाश्च भवन्ति किन्तु नैतत्तेनोदीरितं यदभ्यासे चित्तं क्व स्थापयति? आरम्भः कुतः करणीय? अत उपरि कथ्यते–

**ईश्वरप्रणिधानाद्वा।।२३।।**

अथवेश्वरं प्रति समर्पणेन समाधेः सिद्धिस्त्वरितं भवति। किन्तु नाहमीश्वरं दृष्टवान्। ईश्वरस्य स्वरूपं कीदृशमस्ति? अत उपरि वर्ण्यते–

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।।२४।।**

क्लेशेन, कर्मणा, विपाकेन आशयेन च– य इत्युक्त चतुष्टयेभ्यः नास्ति सम्बन्धितः, '**अपरामृष्टः**'- पूर्णतयास्ति निर्लेपः, अस्ति परतः, यः समस्तपुरुषेषूत्तमः, स पुरुषविशेष ईश्वरः कथ्यते। इयमेवास्ति परिभाषेश्वरस्य।

संसारः क्लेशस्य कर्मणश्च कर्मणां संग्रहेण तदाशयेन निबद्धोऽस्ति, एतेभ्यः सर्वेभ्यो नितान्तं परः (यथा कदाचित् कोऽपि सम्बन्धो नासीत्– इयां परः) अस्ति विशेषपुरुष ईश्वरः। ये जीवस्य दुःखप्रद कारणानि सन्ति क्लेशास्मितारागद्वेषाभिनिवेशाश्च, शुभाशुभमिश्रितान्येवं शुभाशुभरहितानि कर्माणि, तेषां परिणामात्तत्कर्मसंस्कार वासनातश्च यः सर्वथा विनिर्मुक्तोऽस्ति, स ईश्वरः। पश्यतु तस्येश्वरस्य विशेषता–

**तत्र निरतिशयं सर्वज्ञबीजम्।।२५।।**

स ईश्वरोऽस्ति सर्वज्ञतायाः कारणम्, सः सहजं स्त्रोतोऽस्त्यनन्तसर्वज्ञतायाः, अनया रीत्या स्त्रोतोऽस्त्यन्यानि गुणानां विना कमपि सहयोगं स सर्वं जानाति, सर्वं पश्यति, सर्वं बुद्ध्यते। तस्य कृते किमपि ज्ञानं नास्त्यवशिष्टम्। स ईश्वरः–

**पूर्वेषामपि गुरुः कालेनानवच्छेदात्।।२६।।**

स ईश्वरः '**पूर्वेषाम्**'–पूर्वस्मिन् काले ये प्रत्यासिनः भवन्तः सन्तः समागतवन्तस्तेषां गुरुणामपि गुरुरस्ति, कुतोहि '**कालेनानवच्छेदात्**'– कालेन तस्य नास्त्यवच्छेदः, सोऽस्त्यकालपुरुषः। सृष्टावनन्तगुरवः प्रादुरभवन्, तेषु प्रवाहितं गुरुत्वमयमेव। कालात् परः। गीतायां भगवन्तं श्रीकृष्णम् 'गुरुर्गरीयान्'– गुरुणामपि गुरुः प्रतिपादितम्। तमीश्वरं कथमावाहयानि? तस्यास्ति किन्नाम्?–

**तस्य वाचकः प्रणवः।।२७।।**

तस्येश्वरस्य वाचकं नामास्ति प्रणवः, ओंकारस्तथा 'ॐ' अस्ति। गीतायाः सप्तदशाध्यायस्य त्रयोविंशतितमे श्लोकेऽस्ति, "ॐ, तत् सच्च इदं नामत्रिकं तस्य परं ब्रह्म परमात्मनो निर्देश कुर्वन्ति, स्मारयन्ति च। अस्यः 'ओम्' द्वारेण यज्ञाः, वेदाः, ब्राह्मणाश्च सन्ति विरचिताः।" '**ओमित्येकाक्षरं ब्रह्म**'– 'ओम्' एतावन्मात्रमेवास्ति अक्षर ब्रह्मपरिचायकम्। तस्येश्वरस्य नामास्ति प्रणवः कुतोहि प्राणमाध्यमेनास्यास्ति सञ्चारः। प्रणवस्तथोमशब्दौ पर्यायवाचिनौ स्तः।

**तज्जपस्तदर्थभावनम्।।२८।।**

उपर्युक्त प्रणव स्वरूपस्योमजपस्य तदर्थस्वरूपेश्वरस्य ध्यानस्यनाम, ईश्वरप्रणिधानमस्ति। पूर्वमुपदिष्टं यदभ्यासो दीर्घकालं यावत् साभिरूचि चित्तेन सादरं निरन्तरं कर्त्तव्यः किन्तु नैतत् सूचितं यदभ्यासेकरणीयं किमस्ति? अत्र

महर्षिः सुस्पष्टयति यदोमित्यस्य जपो विधेयस्तथा तदर्थ स्वरूपस्य परमेश्वरस्य ध्यानं विदधीत्। तं प्रति श्रद्धां सुस्थिरयेत्। किन्त्वहमीश्वरं न दृष्टवान् तर्हि चिन्तनं कथं करवाणि? पूर्वन्तु ध्यानं श्रद्धया भवति, क्रमश ईश्वर एव बोधं कारयति, यत् कोऽस्ति सद्गुरुः। ध्यानन्तु सद्गुरोरेव क्रियते। सद्गुरुरव्यक्त ईश्वरस्वरूपोऽस्ति, समानवतनाधारी। गीतायाः (९/११) श्लोके योगेश्वरः श्रीकृष्ण आह यदहं परमस्य स्पर्शंकृत्वा परम भावे स्थितोऽस्मि किन्त्वस्मि मानवशरीरावलम्बी। इदमेव सद्गुरुस्वरूपम्। यदा सद्गुरोः परिचयो भविष्यति, तदा ध्यानमधिकं भविष्यति विस्पष्टम्।

भगवतः श्रीकृष्णस्य शब्देष्वीश्वरनिवासस्येश्वरप्राप्तेश्चोपायः-

**'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।' (१८/६१)**

अर्जुन! स ईश्वरः सर्वेषां प्राणीनां हृदयदेशे निवसति। यदैतावत् समीपे वर्तते तर्हि जनास्तं कस्मान्न पश्यन्ति? भगवान् श्रीकृष्णः कथयति, "मायारूपं यन्त्रमारुह्य जना भ्रमाद् भ्राम्यन्ति, एतस्मोदेव न द्रष्टु प्रभवन्ति।" तर्हि कस्य शरणमाश्रयणीयम्? अग्रिश्लोके ब्रवीति भगवान् श्रीकृष्णः- **'तमेव शरणं गच्छ सर्वभावेन भारत। तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।' (१८/६२)** अर्जुन! तस्य हृदयस्थितस्य शरणं याहि, समग्रेण भावेन व्रज। अल्पोऽपि भावः कस्मिश्चिदन्यस्मिन् देवेवर्त्तते, स्वल्पभावोभूते, भवान्याम्, यक्षे, राक्षसादौ च विभक्तः, स्तदाभावत्की श्रद्धा विभजिता। अतः सम्पूर्ण भावेन हृदयेस्थितस्येश्वरस्य शरण सम्पूर्णभावेन गच्छ। परम्परागत मान्यताः सन्ति संसारे प्रचलिताः। आसां खण्डनं कठिनं भवति। करोतु कल्पनां यन्मया विभञ्जिता मान्यताः, मात्रैकस्येश्वरस्य शरणमगमम् ततः कोलाभः? **'तत्प्रसादात्परां शान्तिं'**- तस्य कृपया त्वं परां शान्ति प्राप्स्यसि तथा तत् स्थानं लप्स्यसे यच्छाश्वतमस्ति सनातनमस्ति। सदैव त्वं स्थास्यसि तथाऽस्तित्वञ्च ते न नङ्क्ष्यति निवासोऽपि शाश्वतिकं भविष्यति। अस्यैवास्ति, अक्षयधाम, कैवल्यं पदञ्च।

किन्तु हृदयस्थितमीश्वरं नाऽहमद्राक्षीत्, तस्य शरणं कथं गच्छेयम्? तस्य को विधिः? अग्रिमेश्लोके तदुच्यते, "अर्जुन! इतोऽप्यति गोपनीय मम रहस्य युक्तं मे वचनमाकर्णय,

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**

**मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।। (१८/६५)**

अर्जुन! मयि मनो निधेहि मां नमस्कुरु, भवेर्ममानन्यभक्तः। सत्यं वदामि त्वं मयि निवसिष्यसि।

**सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**

**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। (१८/६६)**

अर्जुन! सर्वधर्माणां परित्यागं विधेहि। एकमात्रं मम शरणमायाहि। अहं त्वां सर्वपापेभ्यो मोक्ष्ये। त्वं मा चिन्तय।

भगवता श्रीकृष्णेन पूर्वोक्ताभ्यां श्लोकाभ्यां प्रतिपादितं यदीश्वरस्य निवासो हृदयेऽस्ति, तस्य शरणं प्राप्नुहि। अग्रिमे श्लोकद्वये प्रावोचत्, "नहिं सर्वधर्माणां चिन्तां परित्यज मम शरणमाव्रज।" मनस्त्वेकमेव। सम्पूर्णभावान् हृदयस्थे परमेश्वरे समर्पयानि, उद्वा वहिष्ठो द्वितीयः कृष्णो यः पुरस्ताद् विराजते, तस्य शरणं व्रजेयम्?

वस्तुतो यदि हृदयस्थितं परमेश्वरं साक्षात्कर्त्तुमस्ति लक्ष्यं तर्हि वर्त्तमान समये परमेश्वरभावप्राप्त शरीरवानस्ति सद्गुरुः, तस्य शरणं भविष्यति गन्तव्यम्। अतः सम्पूर्णभावेनैतेषा सद्गुरुणां शरणं समाश्रयणीयम्।

भगवान् श्रीकृष्णः कथिवान्, '**मानुषीं तनुमाश्रितम्**' (९/११)– अहं परमस्य स्पर्शं कृत्वा परमभावे स्थितोऽस्मि, किन्तु मानव शरीरस्योपरि समाश्रितोऽस्मि। शरीरन्त्वेकमाधारमात्रमस्ति। एतादृशस्य सद्गुरोः स्वरूपस्य ध्यानस्य विधिं वर्णयन् ब्रूते श्रीकृष्णः–

**यदक्षरं वेदविदो वदन्ति**

**विशन्ति यद्यतयो वीतरागाः।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति**

**तत्ते पदं संग्रहेण प्रवक्ष्ये।। (८/११)**

प्रत्यक्षदर्शिनो महापुरुषायमविनाशिनमाहुः, वीतरागः महापुरुषाः, परम विरक्ताश्च यस्मिन् प्रविशन्ति, यं लब्धुकामा ब्रह्मचर्यादि कठोरं व्रतमाचरन्ति, तत्परमं पदमहं समासतो वक्ष्यामि–

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।**

**मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्।। (८/१२)**

सम्पूर्णेन्द्रियाणां द्वारं संय्यम्य, वासनाभिः समाहृत्य, मनो हृदयदेशे सुस्थिरं कृत्वा, अन्तःकरणे योगविधिं संधार्य–

**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**

**यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। (८/१३)**

ओमस्ति यदक्षर ब्रह्मपरिचायकम्, तस्य नाम जपन् सन् '**मामनुस्मरन्**'– मम स्वरूपस्य सम्यक् प्रकारेण ध्यानं धारयन्, सातत्येन मां परिचिन्तयन् यो देहाध्यासं जहाति तत् कालमेवासौ परमगतिं लभते। अत्र श्रीकृष्णो हृदयस्थं ज्योतिर्मयं तमीश्वर प्राप्तुमीश्वरस्य शरणं सबलं प्रेरयामास्। किन्त्वीश्वरोनमयादृष्टस्तर्हि तस्य शरण गच्छेयं चेत्कथं गच्छेयम्? तदावोदसौ यन्ममशरणमागच्छ। श्रीकृष्णस्य शब्देन ध्वन्यते यदसावेकः सद्गुरुरस्ति, अत ईश्वर प्राप्तये प्राप्तेश्वरभावं सद्गुरु शरणं प्राप्नुहि। सद्गुरुरस्त्येकाऽवस्था, अस्ति चैकास्थितिः। उक्त सद्गुरुणाप्राप्तौ तेषा चरणध्यानमेवास्त्येकोपायः।

श्रीकृष्णो भगवानुद्वायोऽपि कोऽपि वासीत् तस्य स्वरूपमस्ति सर्वसुलभम्। भगवतोक्तम्, "अर्जुन! '**चातुर्वण्यं मया सृष्टम्**'– चतुर्णां वर्णानां रचना मयाकृता। किं भागचतुष्यये मानवा मया विभाजिताः? पुनः कथयति भगवान् नहिं, '**गुणकर्म विभागशः**'– गुणानां माध्यमेन चतुर्षु श्रेणीषु कर्माणि विभाजितानि। गुणोऽस्त्येको मानदण्डः, एकातुला गुणोऽस्ति। गुणाः सन्ति त्रयः– सत्वरजस्तमांसि। तामसी चेत् कश्चिद भविष्यति तदासौ प्रमादमालस्यञ्च करिष्यति तामसी जने कामना बाहुल्यम्, सात्विकी जने धारणाध्यानयोः प्रसरः सहजरूपेण सुलभायते। एतेषा गुणानां माध्यमेनैव भगवान् कर्माणि चतुर्षु भागेषु व्यभाजत्। योगविधिरेवाऽस्ति यज्ञः, तस्य क्रियान्वयनं कर्मोच्यते। गीतानुसारेण केवलमाराधनैवास्ति कर्म, चिन्तनञ्चाऽपि। कर्माऽस्ति योगस्य निश्चिद्विधिः। अत इदं नियतकर्मोदीर्यते। उक्तेदं नियतं कर्म भगवता चतुर्धा विभक्तम्– अत्युत्तमोत्तममध्यमनिकृष्ट विधानेन। अस्य विभाजनस्य कर्त्तारं मामव्यक्तमात्मानं त्वमकर्त्तारं विद्धि। भवतोदीरितम्, धृतशरीरोऽहम्, विभाजनस्य कार्यमपि करोमि तदा भवान् कथमकर्त्ता? अत उपरि वभाषे भगवान्–

**न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।**

**इति मां योऽभिजानाति कर्मभिर्न स बध्यते।। (४/१४)**

अर्जुन! कर्मणा नाऽहं लिप्तो भवामि, कुतोहि कर्मफले नास्ति मे स्पृहा। अस्य कर्मणः फलमस्ति परमात्मा। परमतत्त्वपरमात्मनो दर्शनं स्पर्शः स्थितिश्च न मदरिक्ता। अहमेवाऽस्मि व्यक्तव्यतिरिक्तं स्वरूपः। कर्म फलञ्चाऽपि न मत्तो भिन्नः। '**इति मां योऽभिजानाति**'- अनेन स्तरेण योऽपि कोऽपि मामभिजानाति तमपि कर्माणि न बाधन्ते। श्रीकृष्णोयोऽपि कोऽपिस्यात्- पुरुषोत्तमः परब्रह्मवा- किन्तु सा स्थितिः सर्वसुलभा ज्ञेया।

अयमेवाशयोऽत्र महर्षि पतञ्जलिना प्रस्तुतो यदीश्वरस्य वाचकः प्रणवोऽस्ति तस्य जपः करणीयस्तदर्थस्वरूपेश्वरस्य चिन्तनं विधेयं यः सर्वज्ञोऽस्ति, गुरुणामस्ति गुरुः, सद्गुरुश्चास्ति। किन्तु शरीरस्यान्तराले सन्ति केचनेत्थं विघ्नाये जपकाले ध्यानकालेच मनश्चञ्चलयन्ति। अत उपरि कथनमस्ति-

**ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च।।२९।।**

उक्तसाधननाम्नः (ओम्) जपनेश्वर सद्गुरुध्यानस्याभ्यासेन च '**अन्तरायाभावः**'- अन्तरायस्याथवा विघ्नानामन्तो भवति तथा अन्तरात्मनो स्वरूपस्य ज्ञानं प्रतिपद्यते। येषां विघ्नानां भवत्यभावस्ते के सन्ति? अत उपरि प्राह-

**व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शना-**

**लब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः।।३०।।**

व्याधिः, स्त्यानम्, संशयः, प्रमादः, आलस्यः, अविरतिः, भ्रान्तिदर्शनम्, अलब्धभूमिकत्वम्, अनवस्थित्वञ्चेमानि चित्तस्य नवान्तरायाः सन्ति, आन्तरिका इमे विघ्नाः। वाह्य सङ्गदोषाभावेऽपि साधकमुक्तेदोषा अन्तराभ्यन्तर स्थिताश्चित्तमुद्वेलयन्ति येन साधने मनो न लगति। एषु विघ्नेषु सर्वप्रथमं व्याधिरर्थादस्ति रोगः। शरीरस्य कस्मिंश्चित् भागे कस्मिंश्चिदिन्द्रिये वा रोगोत्पत्तिः, चित्तस्य तत्तद् रोगप्रभावतोव्यापनम् येन चिन्तनत्यागः, सा व्याधिः। द्वितीयो विघ्नः स्त्यानमास्त्यर्थात्, चित्तस्याकर्मण्यम्। सत्यामपीच्छायां साधनेऽप्रवृत्तेः स्वभावः स्त्यानं समुच्यते। योगसाधनफलेऽथवा स्वशक्तौ सन्देहोत्पत्तिः संशयः। साधनानुष्ठानस्यावहेलनम्, साधनातिरिक्तान्यान्यवार्त्तासु समय विनाशनमस्ति

प्रमादः। चित्तस्याथवाशरीरस्य गुरतागतकारणेन नाम्नो जपे ध्याने च मनसो न लगनमस्त्यालस्यम्। अधिकभोजनेनोदरनिर्मलताभावेन च वर्धत आलस्यम्। "आलस्य निद्रा जमुहाई, तीनों काल के भाई।" आलस्यात्त्राण प्राप्तये महात्मनः स्वल्पं भोजनं स्वल्पां निद्राञ्च सेवन्ते सदाऽवधानाः सन्तिष्ठन्ते। भजनं कुर्वति कुर्वति कदाचिदेवं संयोगः समापतति यत् वासना मधुरायते, वैराग्ये त्रुटेराम्भः प्रसरितुं लगति, इयमेवास्त्यविरतिः। योगस्य साधनानि फलानिचालीक मान्यता भ्रान्तिदर्शनमस्ति। वृते सत्यापि साधने योगपूर्वपीठिकायां स्थितेरप्राप्तिरलब्धभूमिकत्वमस्ति। अनेनोक्त दोषेण साधकस्योत्साहो विखण्ड्यते। योगसाधनाप्रभावतः कस्यामपि भूमिकायां चित्तस्य स्थितौ जातायामपि तत्र चित्तस्यानवस्थानमनवस्थित्वान्तरायोऽस्ति। किन्त्वीश्वरप्रणिधानभूतेन 'ॐ' इत्यस्य जपेन तथेश्वरस्य सतत् ध्यानेन चिन्तनेन चेमे अन्तरायाः सम्यग् विधिना प्रशान्ता भवन्ति। एतेषा विघ्नानां सहायकाः सन्त्यपरेऽपि पञ्चविघ्नाः–

**दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः।।३१।।**

दुःखम्, मनः क्षोभः, अङ्गकम्पनम्, अनियमितश्वासप्रश्वासाः, इमेपञ्च विघ्नाः '**विक्षेप सहभुवः**' - व्याधिस्त्यानसंशयप्रमादादि नवान्तरायैः सहोत्पद्यन्ते। दुःखानि त्रिधा– दैहिकम्, दैविकम्, भौतिकञ्च। देहजन्म विकारेण चिन्तने मनः पलायनं न लगनं वा दैहिकं दुःखमस्ति। यथा वायुप्रकोपस्नायविकादयो व्याधयः। शरीरे रोगोथवा वासनाभिश्चित्तस्य चाञ्चल्य दैहिक दुःखस्य कारणमस्ति। जलेन, पवनेन, भूकम्पेन, अतिवृष्ट्या, अनावृष्ट्या, अत्यधिकग्रीष्मतापेन, शीतधारादयो दैविक दुःखानि कथ्यन्ते। जड़ै, चैतनैः, स्थावरैः, प्राणिभिश्च प्राप्तमाघातादिकं भौतिकं दुःखमस्ति। यथा भगवान् महावीरो भजने व्यासक्त आसीत्, कश्चित्पशुचारकस्तस्य कुशुकीत्लं न्यवेशयत्।

अनेके साधकाः कथयन्ति, "अयं सज्जनो साधुर्नास्ति, मां द्रुह्यति।" साधक भजितुमस्त्यागतो जनानां भावनां संग्रहीतुम्वा। मनस्यन्यमनस्कता, खिन्नता, इच्छानुकूलघटनाघटनेनोत्पन्नःक्षोभः, इत्यादयोदुमानसिकताः सन्ति। अङ्गेष्वाकस्मिक कम्पनमङ्गेजयत्वसूचकमस्ति। चिन्तने सुरतस्य प्राप्ते स्थैर्य यस्मिन् क्षणे मनो भवति विचारोन्मुक्तः, शरीरञ्च भवति प्रभावितः, साधकः

समुच्छलति, अग्रेपृष्ठे दक्षिणे वामे कुचित् पतितुं शक्नोति। एतेभ्यः सतर्कयन्तः पूज्य महाराजाः समुपदिशन्ति स्म साधकस्यासनं नात्युच्चैर्नातिनीचैर्भवेत्। अनेन प्रकारेण शरीरिककम्पनमङ्गे जयत्वमस्ति, कदाचिच्चोक्त व्याधिस्वरूपान्तरायाणां प्रभावतो योगस्य साङ्गोपाङ्गमनुष्ठानं न भवितुं शक्नोति। योगस्य कस्याप्याङ्गस्यानुपालने समायातायां त्रुटौ मनश्चेखिद्यते। हठपूर्वकं श्वासस्य बहिर्गमनमपि योगस्यास्ति सहविक्षेपः। यत्किञ्चिदपि साधकेनाल्पाधिकं प्रशिक्षितमस्ति, अनिच्छन्नपि तस्यावबोधस्य व्यक्तीभवनमस्ति प्रश्वाससम्बद्धो विक्षेपः। अनधिकारिणा दत्तोपदेश एतादृश्येवास्त्येका चेष्टा। तथैव श्वाससम्बन्धी विक्षेपस्वरूपक्लिष्टसङ्कल्पस्य, तथा बाह्यसङ्कल्पानां साधकस्यान्तराले प्रवेशनमस्ति, येन साधको व्यर्थं चिन्तनं कर्तुं लगति। इमे विघ्नाः पुनः-पुनः मनः समुद्वेलितं कुर्वन्तः वर्तन्ते। इमान् शान्तं कर्तुमुपायानामुपरि महर्षिः प्रकाशं करोति–

**तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः।।३२।।**

तान् विक्षेपान् तथोपविक्षेपान् दूरीकरणायैकतत्वस्याभ्यासः करणीयः। नामरूपयोः कस्मिंश्चिदेकस्थाने मुहुर्मुहुश्चित्तं समाहृत्य तस्य स्थिरकरणोपायः कर्तव्यः। क्षणे नाम, क्षणान्तरे रूपमेवं नहि, यत्र मनः प्रचुरतया संलगेत् तत्रैवाधिक समयं यावदभ्यासो वर्धयेत्। अनेन प्रकारेण शान्तविघ्नाश्चित्तवृत्तिः भजने लगितुमर्हा भवति। साधकः संसारे स्थित्वैव भजते, सदसद्जनाः परस्परं संघर्षयुताः वर्तन्ते। तेभ्यः निर्लेपस्थितेर्विधिं वर्णयति–

**मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।।३३।।**

सुखिनः, दुःखिनः, पुण्यात्मन पापिनश्च विषये यथाक्रमं मित्रतायाः, दयायाः, प्रसन्नतायाः उपेक्षायाश्च भावनया चित्तं निर्मलायते। रागरोषेर्ष्यामदमोहासूयापकारद्वेषादयश्चित्तस्य सन्ति मलाः। **'राग रोग इरषा मद मोहू। जनि सपनेहु इनके वश होहू।।'– (रामचरितमानस)** वस्तुप्रतिलालसा रागः कथ्यते। परेषां गुणेष्वपि दोषावलोकनमस्त्यसूया। एभ्योः मलेभ्यः निवृत्तिहेतोः प्रस्तुतसूत्रे महर्षिराचचक्षे यत् सुखान्वितं व्यक्तिं प्रति

मैत्रीभावेन वर्तितव्यम्। गीतायाः (५/२१) श्लोके कथितमस्ति यत् बाह्यसंसारस्य विषयभोगेष्वनासक्तः पुरुषस्यान्तरात्मनि यत् सुखमस्ति, तत्सुखं प्राप्नोति। स पुरुषः परब्रह्म परमात्मना सह मिलनयुक्त आत्मवानस्ति, अतोऽक्षयसुखानुभवं करोति सः- यस्य सुखस्य न भवति कदापि क्षयः। सुखस्यास्योपभोगं कर्तुं शक्नोति कः? यो बाह्यविषयभोगेभ्योऽस्ति मुक्तः। एतादृश् सुखीव्यक्तिषु प्रीतिकरणेन साधनायां संयोगः मिलति।

सर्वेषामाप्तपुरुषाणां वाचि सुखस्यैकमेव प्रकारमस्ति- केवला हरिभक्तिरेका। रामचरितमानसे लिखितमस्ति-

**श्रुति पुरान सब ग्रन्थ कहाहीं। रघुपति भगति बिना सुख नाहीं।।**

*　　　*　　　*

**हिम ते अनल प्रगट बरू होई। विमुख राम सुख पाव न कोई।।**

अत एष्वीश्वरपरायणपुरुषेषु मैत्रीभावेन चित्तनिरोधस्यावस्थायां सहायता मेलिष्यति, यतोहि- तेषां संगत्या भविष्यति योपलब्धि सा भविष्यति साधनापरायणैव। इत्थमेव संसारे मग्नान्, आकण्ठबुड्डितान् दुखीजनान्प्रति दयाया भावनां विदधीत्, न तु घृणाया भावनाम्। '**दया बिन सन्त कसाई। दया करी तो आफत आई।**' सीतया रावणाय भिक्षां दातुं कृता दया, यस्य परिणामे सा लङ्कां गतवती। एकेन स्तरेणादौ साधकं प्रति दयायाः विधानं नास्ति, सततं चिन्तन एवानुरक्तेर्विधानमस्ति तस्य कृते। दया महात्मनोऽस्ति सहजस्वभावः। साधकेनापि दुःखीजनान्प्रति करुणाया भावनया वर्तितव्यम्, किन्तु भावनयाः धारणे दुःखनिवृत्तिहेतोः क्रियाशीलतायाञ्च महदन्तरमस्ति, यदर्थमिष्टादेशानुपातेन संलग्नता भवेत्। पुण्यात्मनः प्रति मनसि प्रसन्नतायाः भावना धारणीया। गीतायां नीतिविधिमेव कर्म पुण्यकर्मोदीरितम्। एवं नियत कर्माचरण कर्तॄन् प्रति प्रसन्नताया भावनयाः वर्तितव्यम्, यत् भगवतः कियती कृपास्ति? नियतकर्माचरणकर्तॄणां कृते, अयमेवास्ति विधिः, एषु सोपानेषु मया गन्तव्यमस्ति, न तु तस्यानुकरणं कर्तुं लगेयम्, तेषु दोषान्वेषणं कर्तुं यतेयम्। पापात्मनोऽर्थात्- यः पतनोन्मुखमस्ति तादृग्जनानां संसर्गे सति तेषां गुणदोषाभ्यां भवेत्तटस्थास्थितिः- '**उदासीन नित रहिय गोसाईं। खल परिहरिय स्वान की नाईं।।**' तस्य त्यागः नहि, असङ्गोऽभीष्टः।

व्यक्तिः न भवति दुष्टः, अपितु तस्य परिस्थितिरेव दुष्टत्वपोषिका। भवान् ततः किञ्चिदपि न गृह्णातु। एतद् भावनाभिश्चित्तं निर्मलं भवितुमारभते। चित्तवृत्तिं निर्मलीकर्तुमन्योपायो वर्ण्यते–

**प्रच्छर्दनविधारणाभ्यां वा प्राणस्य।।३४।।**

प्राणवायोः पौनः पौन्येन बहिः निस्सारणस्यावरोधनस्याभ्यासेनापि चित्तं स्थिरायते। श्वासो बहिष्करणीयः। यावान्भवेत् सम्भवः श्वासं बहिरेव रुन्धीत्। भूयो–भूयो श्वासं बहिः निस्सारयतु रुणद्धु च। पञ्चयावारमप्येवं करणेन दूषितं वायुमण्डलं बहिर्निर्गच्छति। चिन्तनोपविष्टे सति मनस्त्वरितमेकाग्रं भवति। चिन्तने, भजने, नाम्नि रूपे च मनोऽधिकं लगति। चित्तं स्थिरं कर्तुं महर्षिरपरमुपायं वदति–

**विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी।।३५।।**

ममास्ति यद्विषयवस्तु– योगः, चित्तवृत्तेर्निरोधः, अन्तरायेभ्यो मुक्तिः, ईश्वरप्रणिधानम्, नामरूपयोः सतत् चिन्तनमित्युक्तविषयेष्वनुरक्तिर्लगेत्, प्रवृत्तिः जागृयात्। विषयानुरूपा प्रवृत्तिः मनःस्थितेर्भवति प्रबाधिका। चिन्तनस्य स्तरे जाते समुन्नतं मिलितुं लगतीश्वरीयः सहयोगः, तदपि मनसः स्थिरीकरणे भवति सहायकः।

**विशोका वा ज्योतिष्मती।।३६।।**

प्रकाशमयः, ज्योतिर्मयः, द्रष्टा मात्रैकपरमेश्वरोऽस्ति। तस्य ज्योतिस्वरूपस्य द्रष्टुर्जाते दर्शनेऽमनसस्तरङ्गा भवन्ति शान्ताः। भगवतोऽनुकूलता अनुभवं सम्प्राप्य वृद्धिं गच्छति– साधकस्य समुत्साहः। दर्शनमिदं विघ्नानां शमनं कृत्वा मनः स्थिरयितुं सहायको भवति।

**वीतरागविषयं वा चित्तम्।।३७।।**

वीतरागाणामर्थात् रागमुक्तमहापुरुषाणां जीवनचर्यामन्तःकरणेन चित्तं भवति स्थिरम्। एतादृगाप्तपुरुषाणां स्थिति, तेषां दिनचर्यां, तत्प्राप्तेः स्मरणम्, चिन्तनम्, मननेन, च तदनुरूपमात्मानं करणेन चित्त स्थिरतोन्मुखं भवितुमुपक्रमते, विघ्नाः शान्ता भवितुं लगन्ति। एकोपायः स्वप्नोऽस्ति–

**स्वप्ननिद्राज्ञानालम्बनं वा।।३८।।**

निद्राकाले स्वप्नस्य ज्ञानावलम्बनकारकं चित्तमपि स्थिरं भवति। पूज्य गुरुमहाराजानां कथनमासीत्- योगी कदापि स्वप्नं न पश्यति। स यत्किंचिन्निरीक्षयते तद्भवितव्यतामेवावलोकयति, भविष्यमालोकयति। स स्वप्नेऽपि साधनायाः स्थितिम्, क्लिष्टाक्लिष्ट वृत्तेः कीदृशोविकासः- इति परीक्षते। निद्राकाले यद्दृश्य परिलक्षितं भवति, तद्भगवत्प्रसारित भवति, सद्गुरुतः प्राप्यते। तस्यानुसरणकर्त्ता चित्तस्य स्थैर्योन्मुखं भवत्यग्रसेरः।

**यथाभिमतध्यानाद्वा।।३९।।**

यथाभिमतमस्ति- अन्तरायाणामवसानम्, चित्तवृत्तेः शान्त प्रवर्त्तनम्, समाधेर्जागरणम्, चित्तस्य लक्ष्योन्मुखी भवनम्, एवमुक्त प्रकारेण यत् किञ्चिन्मिलेत्, तत् सर्वं ध्यानेऽवधारणेन चित्तवृत्तिर्निर्मलायते। वातावरणं साधनानुकूलीकरणम्, आशयं परिवर्त्य साधनानुसारेण वर्त्तनं यथाभिमत ध्यानमस्ति।

एकदासीच्चिन्तनरतोऽर्जुनः। सहसा श्रुतिविवरयोः, संगीतस्य मधुराध्वनिलहर्य्य झनझनायिताः। स शिर उन्नमय्य ददर्श तदापुरःस्थितासीदुर्वशी देवलोकस्य नृत्यप्रवीणामप्सराम्। सर्वेऽपरे जनास्तस्या वीक्ष्य रूपलावण्यं बभूवु दोलायिता। किन्त्वर्जुनस्तां सस्नेहं मातृवदवलोकितवान्। शब्दरूपाभ्यां प्रसूत विकाराणां प्रसङ्गे समायाते सति परिवत्याशयं साधनानुकूलं मातृवत् ध्यानं दधार आसीत्।

पूज्य महाराजानां संरक्षणे साधनारत एको महात्मा निराधारं विचरणस्यानुमतिं वाञ्छति स्म। तस्य मौहुमुहुकनिर्वन्धे नोन्मनीभूय ददावनुमतिम्। स महात्मा स्वल्प दूर एव गते सति, अत्यल्पवयस्का शिशवः काष्ठखण्डमश्वरूपेण परिकल्प तदारुह्य क्रीडन्त आसन्। अकस्मादेकः शिशुरेकं पादमुन्नमय्य कूर्दन्- कथयितुमारेभे- **'लँगड़ा चींटा चला रिसाय। नौ दिन में बीता भर जाय।। अस्सी कोस जमुना का तीर। कै दिन में पहुँचा वह वीर।।'** एतच्छ्रवणानन्तरमेव महात्मा समन्वभदपशकुनम्। स भगवन्तं न्यवेदयत् यत् शिशवस्तु क्रीडाविधौ किञ्चिन्नकिञ्चिन्मिथो जल्पन्त्येव इत उपरि मह्यमपशकुनाः

कथं भवन्तः सन्ति? तत् किं मां कथयन्नस्ति? भगवान् समवबोधयत्, आम्, ईदृशी ते स्थितिः। तव वैराग्यमस्ति खञ्जः। योगरूपिणीयमुनाऽस्ति दूरतरा। मध्यमानेन तव गतिप्रत्यहमङ्गुलमात्रमस्ति। सम्प्रति नास्ति ते क्षमता। अलमसौ परावृत्तः। महाराजा वदन्ति स्म, "भोः, यदा भगवान् कुरुते कृपां तदानोकहसः, विटपात्, पशोः, विहङ्गात्, मनुजाच्च कुतो न कुतः प्रेरणां कर्त्तुं शक्नोति, वक्तुं शक्नोति, तथाध्यापयति च। सोऽस्ति सर्वव्यापकः, सर्वतोगदितुं समर्थः।" अनेन प्रकारेण साधनायां भवेत् यः सहायकस्तं सन्निवेश्यासय ध्यानमनवरतं दध्यात्। एवं विधानेन चित्तं स्वच्छं निर्मलं स्थिरञ्च भवति।

भगवान् दत्तात्रेयश्चतुर्विंशत्युदाहरणैः शिक्षां जग्राह। अजगरेऽप्यसौ साधनोपकारकमेकं गुणमवलोकयामास। स अवालुकत- वृहत्कायस्याजगर मुखमन्तिकं येऽपि केऽपि जीवजन्तव आयान्त्येव, यमसावाहरतिस्म। भगवान् दत्तात्रेयस्तस्मादपाठीत् यत्साधुभिरुदरभरणाय द्वारं-द्वारं नाटनीयम्। अजगरस्तु नासीत्कश्चिद् गुरुः, किन्तु भगवान् दत्तस्तस्मादपि सद्गुरोः शिक्षा प्रदीप्तकारकमेकं गुणं स्वाचरणे धारयामास।

**परमाणुपरममहत्त्वान्तोऽस्य वशीकारः।।४०।।**

अनेन प्रकारेण ध्यायन् ध्यायन् योगीजनस्य मनः परमाणुतः समारभ्य परमतत्त्वस्य विषयोपरि एकाग्रताया अधिकारं सम्प्राप्नोति। तस्मिन् समयेऽत्यन्तसूक्ष्म परमाणुत आदाय बृहत् बृहत्तरे यस्मिन् कस्मिन् वस्तुनि वारमेकमपि सुरतस्य स्थिरत्वे चित्तं तत्रैव प्राप्स्यति स्थिरताम्। इदं योगिनो विजित चित्तस्य वैशिष्ट्यम्। अभ्यासं कारंकारं यदा साधकस्य चित्तं सम्यग् विधिना साधुस्थितेर्योग्यतां प्राप्नोति, तस्मिन् कालेऽसौ सूक्ष्मातिसूक्ष्मपदार्थतश्चलित्वा महत्महत्तरं पदार्थं यावत् यत्र कुत्राऽप्यभिलषेचत्र तत्कालं सुस्थिरयतिमनः। गीतायां भगवतोदीर्यते- '**यथा दीपो निवातस्थो नेंगते सोपमा स्मृतः।**' (६/१९)। समीरणेनानिरित स्थले स्थापित दीपकस्य शिखासाधूपरि सरति, योगिन साधुविधिना स्थिर चित्तस्योपमेयम्। न तस्य योगिनश्चिते साधुसंवेगाः प्रादुर्भवन्ति नत्वसाधु, नहृदयतो भवेत् संवेगोद्गम न तु बाह्य वायुमण्डलस्थाः संकल्पाऽपि तस्यान्तराले न प्रवेष्टुं शक्नुयुः। जित चित्तस्य

स्थिरचित्तस्य योगिन इयमेव परिभाषा कथ्यते। एतादृश चित्ते साधनायाः स्वरूपं किमस्ति?

**क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः।।४१।।**

यस्य क्लिष्टाक्लिष्टाः सर्वा वृत्तयः सन्ति क्षीणयिता, तस्य चित्तं ग्रहीताऽर्थात् साधक पुरुषः, ग्रहणमर्थात्, अन्तःकरणस्य दृष्टिः सुरते ग्राह्येश्वरे तथा तस्य नामादौ तेन प्रकारेण तदाकारस्तद्रूपो भवति, यथोत्तमजातीय विशुद्धः स्फटिकमणिर्यस्य वस्तुनः समक्षं सन्तिष्ठते तद्वस्तु तादृशमेव वर्ण दधाति। ग्रहीतुः, ग्रहणस्य, ग्राह्यस्य चावबोधः सम्प्रज्ञात समाधिरस्ति। यस्यां साधकः स्वस्य स्वस्थितेश्च भानं समवधारयति, यत् कुत्रास्म्यहम् कथमस्मि च? सम्प्रति समाधेरग्रिम चरणोपरि क्रियते प्रकाशः-

**तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः।।४२।।**

समापत्तावर्थात् सम्प्रज्ञात समाधावपि शब्दार्थ ज्ञानेति त्रिभिर्विकल्पैः संकीर्णस्यार्थान्मिश्रित चित्तस्य समाधानं सवितर्कसमाधिरस्ति। संसारे विभिन्नप्रकारकान् शब्दान् समाकर्णयन्तः दृश्यन्ते, तस्यार्थ ज्ञातुं प्रयतन्ते, वस्तुज्ञानमपि कुर्वन्ति, किन्तूक्तदृशा कस्यापि समाधिर्न परिलक्ष्यते सुस्थिरा। वस्तुतो द्रष्टुर्दृश्यस्य संयोगेन भगवान् यां प्रेरणां करोति, तस्यैव नाम शब्दः। महात्मा कबीरो भणति-

**शब्दै मारा गिर पड़ा, शब्द छुड़ाया राज।**
**जिन जिन शब्द विवेकिया, तिन्ह के सर गयो काज।।**

शब्दो यस्मिन्नवसरे भवति सुतरामात्मसात्, साधकस्याहं भवति निर्मूलम्, भवति च साधकस्य सम्पूर्ण समर्पणम्। 'अहमस्मि ध्यानपरायणः, प्राप्तज्ञानोऽस्मि' इत्याकारकाहंकारोऽगात् समाप्तिम्। शब्दस्य एतावत्सामर्थ्यं वर्त्तते, यत् राजसुखं तृणवत् परित्यज्य रहसि चिन्तनमभूत् यो यो शब्दोपरि विवेकं कृतवान् **'तिन्हके सर गयो काज'**- सम्पन्ना तेषां कार्य प्रतिपत्तिस्तथा गता पारं तेषां तरणी।

**'शब्द बिना श्रुति आँधरी'** कश्चिच्चिन्तने मनोरमयति, सुरते स्वरूपं धत्ते, किन्तु तस्य निरीक्षक परीक्षकरूपेण शब्दश्चेन्न निःसरति तर्हि सुरतस्यान्धता सहजा।

**शब्द बिना श्रुति आँधरी, कहो कहाँ लौं जाय।**
**द्वार न पाये शब्द का, फिर-फिर भटका खाय।।**

यदि शब्दस्य मूलस्त्रोतो नोपलब्धस्तर्हि सुरत विनियोगे योगसाधनेन च न कोऽपि लाभः, न ज्ञायते कुत्र नीत्वा पातयेत्। शब्दा इमे भागवताः द्रष्टारः स्वयं यत् दृश्यं प्रसारयन्ति, यस्य प्रयोजनं साधकाय साधनानुकूल भोगं मोक्षञ्चार्पयति। ते द्रष्टारो यथा यथा दृश्यं प्रस्तुवन्ति तस्य नाम शब्दोऽस्ति। चित्तं शान्तं प्रवाहशीलमस्ति, इति स्थितौ कीदृशः शब्दोऽश्रावि-अदर्शि, तस्यार्थः बोधस्तस्य च- उपर्युक्तत्रिभिर्विकल्पैः सम्मिश्रितासमाधिः सवितर्का कथ्यते। अत्र तु नास्ति परमात्मा, केवला सम्प्रज्ञात समाधिरस्ति, किन्तु परमात्मनः विकल्पः सम्यक्रूपेण गतोऽस्ति परिपुष्टताम्। कबीरः वदति- **शब्द सो प्रीति करे सो पावे**। अतः समुन्नतायाः समाधेरवस्था निर्वितर्का समुच्यते, यदुपरि प्रकाशः क्रियते-

**स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का।।४३।।**

यदा चित्तस्य निजं स्वरूपं शून्यतामेति, केवलं लक्ष्यमात्रस्यैवाभासः परिशिष्यते, तस्मिन् समये **'स्मृति परिशुद्धौ'**- स्मृतिः पूर्णरूपेण भवति शुद्धा, तदा सा निर्वितर्कसमाधिरस्ति। तदा न शब्दोऽस्ति, नार्थोऽस्ति ज्ञानं च नास्ति, चित्तस्य स्वरूपमगाच्छून्यताम्, कः शृणुयाच्छब्दं कश्च धारयेत् ज्ञानम्, मात्रैकलक्ष्याभासो वा विद्यते, तस्मिन् समये विशेषरूपेण भवति स्मृतिः शुद्धा, इयं निर्वितर्कसमाधिरवस्थास्ति यतोहि स्मृतिसंस्कारयो एकमेव स्वरूपं भवति। अधुना स्मृतिपटले न कोऽपि संस्कार उदेष्यति। कैवल्यपादस्य नवमे सूत्रे महर्षिः कथयति यत् जातेरर्थात् जन्मपरिवर्तनम्, देशकालयोः दीर्घान्तरालेऽपि संस्कारेषु न भवति परिवर्तनं न च विरामः। ते समुचितसमये भवन्ति प्रकटिताः, किन्त्वत्र संस्कारस्तेऽभूवन् निर्मूलाः पुनरपि संस्कारस्य बीजमिदानीमप्यस्ति

सुरक्षितम्, यतोहि चित्तमद्यावध्यस्ति जीवितम्। अतः समुन्नतावस्थोपरि प्रकाशं करोति–

**एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता।।४४।।**

'**एतया एव**'– एतेन (पूर्वोक्त सवितर्कस्य निर्वितर्कस्य च वर्णनेन) सविचारनिर्विचारयोः समाधेस्तथा '**सूक्ष्म विषया**'– साधनायाः सूक्ष्मावस्थायाः वर्णनमपि प्रस्तुतमस्ति। अधुना पश्यन्तु समाधीनामेताषां परिणामम्–

**सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्।।४५।।**

साधनाया एतस्यामतिसूक्ष्मवस्थायाम् '**अलिङ्ग पर्यवसानम्**'– प्रकृतेरतिसूक्ष्मरहस्यानाम्, मूलप्रकृतिपर्यन्तं पूर्णरूपेण वशीकारो भवति। साम्प्रतं प्रकृतिरपि तमुद्वेलितं न कर्तुं प्रभवति।

**ता एव सबीजः समाधिः।।४६।।**

उपर्युक्तः सवितर्कः, निर्वितर्कः, सविचारः निर्विचारश्च समाधयः निर्विकल्पा भवन्त्योऽपि न सन्ति निर्बीजानि। चित्तस्य बीजमस्ति विद्यमानं तस्मादिमाः सर्वाः सबीजाः समाधय एव सन्ति। एतत्प्रकारचतुष्टयसमाधिष्वपि निर्विचार समाधेः निर्मले जाते सति–

**निर्विचारवैशारद्येऽध्यात्मप्रसादः।।४७।।**

निर्विचार समाधेरत्यन्तनिर्मले जाते सति योगिनि '**अध्यात्म प्रसादः**'– आत्मिक विभूतयः सम्यक्‌रूपेण भवन्ति प्रसारिताः। सनातनपुरुषोऽजः, शाश्वत इत्यादि यद्विभूतिवानस्ति, ताः सर्वाः विभूतयः योगिनो भवन्ति सुलभाः। आत्मन आधिपत्यं भवति संस्थापितम्। आत्मिक विभूतीनां सर्वं प्रसादरूपं फलं तेन प्राप्यते। इदानीं न काऽपि विभूतिस्ततः पृथगस्ति। तत्काले योगिनो बुद्धिर्भवति ऋतंभरा।

**ऋतम्भरा तत्र प्रज्ञा।।४८।।**

तस्मिन् काले योगिनः प्रज्ञा (बुद्धिः) सत्यसंयुक्ता ऋतंभरा भवति। सम्प्रति सा परमतत्वपरमात्मानं धारयितुं क्षमतावती भवति। यदाध्यात्मप्रसादः सम्प्राप्तस्तदाधुना केवलं परं चेतनस्य मात्र प्राप्तिः शेषायते। बुद्धिरियं साधारण बुद्धिभिरस्ति भिन्ना। अत उपरि कथयति–

**श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्।।४९।।**

श्रुतेरर्थात् श्रवणमाध्यमेनानुमानेन चोपलब्धाया बुद्ध्यपेक्षया प्रस्तुत ऋतम्भराप्रज्ञायाः विषयोऽस्ति भिन्नः। यस्य रहस्यस्य ज्ञानं श्रुतानुमानाभ्यां न सम्पद्यते तस्यावबोधः ऋतम्भराप्रज्ञया भवति यतोहि, इयं विशेषार्थ विशिष्टास्ति। ईश्वरोविशेषपुरुषोऽस्ति, तदर्थबोधिकेयं ऋतम्भरा, तत्परमात्मतत्त्व ग्रहणकारिकाक्षमतावतीयमस्ति, अतः श्रवणानुमानाभ्यां या बुद्धिः भवति प्रस्फुरिता तदपेक्षयेयं बुद्धिरत्यन्तपरिमार्जितास्ति। बुद्धेरस्या विषयोऽस्ति भिन्नः कुतोहीयं केवलं प्रकृतेः परमात्मानम् (द्रष्टारम्) धारयितुं क्षमतोपेतास्ति।

श्रुतेन केवलश्रवणेन काऽपि बुद्धिर्न भवति सुसम्पन्ना। श्रवणेन्द्रिये कस्यापि ध्वनेराघातेनैव रूपरसादिनां सर्वेषामभ्यासास्तथा पूर्वजन्मनां संस्काराः यदा स्मृतिपटले भवन्त्यङ्कुरितास्तदैवानुमानस्य सूत्रपातः सप्रसज्यते, वस्तुनां भवति ज्ञानं किन्तु सा प्रज्ञा विशेषार्थवत्यस्ति।

श्रुतिरथवा सुरतश्च मनोदृष्टिरस्ति। इयं सदसद्मय सर्वं गृह्णाति। सुरतौ स्फुरणेनैव सहानुमानं भवितुं प्रारभते, किन्तूक्त ऋतम्भरा प्रज्ञायाः स्तरं ततः उन्नतमस्ति। इयम् 'पुरुषविशेष ईश्वरः' ग्रहीतुं क्षमतया विद्यते परिपूर्णाः। अस्या महत्वोपरि क्रियते पुनः प्रकाशः।

**तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी।।५०।।**

एतत् ऋतम्भराप्रज्ञातः समुत्पन्नाः संस्काराः परसंस्काराणां भवन्ति प्रतिबन्धकाः, तान् सर्वान् रुन्धन्ति। अतः परं प्रकृतिः न भवति बाधिका। अधुना कोऽपि संस्कारः परमात्मप्राप्तौ न भवति बाधकः।

**तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः।।५१।।**

ऋतम्भराप्रज्ञातः समुत्पन्नाः संस्कारा अपि यदा भवन्ति शान्ताः, तस्मिन् समये सर्वनिरोधेन सह निर्बीजसमाधिः सम्पद्यते। ऋतम्भराप्रज्ञाप्रभावतः यदान्ये समस्तसंस्काराः लुक्कायन्तेऽर्थात् नश्यन्ति, तदुत्पन्नः संस्कार ईश्वरं धेतुं धारयितुञ्च क्षमता विशिष्टो भवति, प्राप्तः स ईश्वरः इमं संस्कारमपि शमयति– अनेन प्रकारेण संस्कारस्य बीजानां सर्वथाभावे जाते सति सम्प्राप्ताया अवस्थाया अभिधानमस्ति निर्बीज समाधिः। इमामेव कैवल्यपदं कैवल्यसमाधिञ्चाहुः।

## निष्कर्षः

योगदर्शनप्रणेत्रा महर्षिपतञ्जलिना अस्य योगस्य चतुर्षु पादेषु प्रथमसमाधिपादे योगनिरूपणक्रमे समुदीरितं यत् योगोस्त्येकमनुशासनम्। कं कुर्यामनुशासितम्? तेन प्रतिपादितम्, "चित्तस्यवृत्तीः।" वृत्तिश्चेदनुशासिताः कुतास्तर्हि ताभिः को लाभः? महर्षिणोक्तम्, "तस्मिन् समये द्रष्टुः स्वरूपे भवति स्थितिः।" किमितः पूर्वं द्रष्टा नासीत् स्वरूपे स्थितः? किं द्रष्टासीत् मलिनः? महर्षिराह, "इतः पूर्वं यथासीत् वृत्तिप्रवाहः, तथैव द्रष्टुः रूपमासीत्।"

वृत्तयो अनन्ताः सन्ति। सर्वासां वृत्तीनां भेदद्वयमस्ति, क्लिष्टाक्लिष्टा वा। काचन् क्लेशं प्रददति काचनञ्च क्लेशेभ्यो मोचयन्ति। एताषां वृत्तीनां पञ्चधा विभाजनं कृतं विद्यते– प्रमाणम्, विपर्ययः, विकल्पः, निद्रास्मृतिश्च। प्रमाणं वृत्तिसमूहं सञ्चालयति। प्रमाणस्य त्रयो भेदाः वर्णिता– प्रत्यक्षम्, आप्तपुरुषदर्शनमनुमानञ्च। एतेषामिन्द्रियाणां किञ्चिदपि प्रत्यक्षं बभूव, अनुमानं तदाधारेण भवितुमारेभे वृत्तिश्च बभूव गतिशीला। यदि प्रमाणमविद्याजन्यं प्राप्तस्तदा सा वृत्तिः क्लिष्टा संवृत्ता। आप्तपुरुषाणां दर्शनं तेषां वचांसि च प्राप्तानि तर्हि वृत्तिरक्लिष्टा जाता। प्रमाणं केवलं वृत्तिसञ्चालङ्करोति। प्रमाणप्राप्त्यनन्तरमेव वृत्तिः गतिं धत्ते। विपर्ययो मिथ्याज्ञानमस्ति, विद्याजन्यमस्ति, यस्मिन् मिथ्याज्ञानमेव आद्यप्रभावतः ज्ञानं मन्यते। विकल्पः शब्दसहायेन समुपलब्धा ज्ञानक्रियापरिचितिर्वा। यस्मिन् वस्तु शून्यमस्ति किन्तु वस्तुनो विकल्पः पुष्टिं लभमानो याति। अयमनुभव संचालितोऽस्ति। अस्य नामास्ति दैवीसम्पदपि किन्तु प्रमाणविपरीतता मिलिता चेत्तदेयं वृत्तिः क्लिष्टा भवितुं शक्नोति। चेत् प्रमाणमिष्टोन्मुखं प्राप्येत्तदा विपर्ययवृत्तिरप्यक्लिष्टस्वभावा भविष्यति। वृत्तेश्चतुर्थावस्थास्ति निद्रा, या न तु मिथ्याज्ञानस्य जडतया निबद्धास्ति, नानुभवेन सञ्चालितास्ति, अभावस्यावलम्बनकर्त्रीयं वृत्तीर्निद्रास्ति, या न तु सजातीय संस्काराणामर्जनं कुर्वन्ती वर्तते न तु विजातीय संस्काराणां कदाचिदितस्ततः, सदसदोः किञ्चिदपि ज्ञानं न लभ्यते। पञ्चमः प्रकारोऽस्ति स्मृतिः। निखिलाः वृत्तयः स्मृतिपटलेऽङ्किता भवन्ति, प्राप्तेऽवसरे भवन्त्यङ्कुरिताः। स्मृतिरपि तस्मिन् समये शुद्धायते, यदा चित्तस्य निजस्वरूपं भवेच्छुद्धायितम्– '**स्मृतिपरिशुद्धौ**

**स्वरूपशून्ये**' यदा मात्रैकलक्ष्यस्याभासः भवेच्छेशायितः, समाधेस्तस्यावस्थायां वृत्तयो भवन्ति शान्ताः। अनन्ताः वृत्तयः प्रोक्तपञ्चरूपेषु क्षीयमाणाः वर्धमानाः कार्यरूपे भवन्ति परिणताः।

एताषां वृत्तीनां निरोधोऽभ्यासवैराग्याभ्यां कर्तुं शक्यते। कस्याभ्यासं करवाणि? '**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।**' अभ्यासस्याश्रतोऽस्तीश्वरः। तस्याभिधानमस्ति प्रणवः। ओम् इत्यस्य जपं विधेयमुक्तेश्वरस्य ध्यानं कार्यम्। अनेन प्रकारेण शान्ता भविष्यन्त्यन्तरायाः। नामरूपातिरिक्तं यन्ममाभीष्टमस्ति– योगः, चित्तवृत्तिनिरोधः– यानि साधनान्यस्मिन् योगे सन्त्यवरोधकाः यानि च सहायकाः सन्ति तेषामप्यभ्यासः कर्तुं शक्यते। एवं प्रकारकाश्चतुर्धापञ्चधा स योगी साधनानां चर्चां महर्षिः कृतवान्, यथा स्वप्ने प्राप्तनिर्देशतः दृश्यतश्च शिक्षाग्रहणम्, ज्योतिर्मये परमात्मनि चित्तस्य केन्द्रीकरणम्, आप्तपुरुषाणां संसर्गे निवसनमित्यादि। अनेनाभ्यासेन चित्तं स्फटिकमणिवत् निर्मलं पारदर्शकञ्च भवति। प्रज्ञा ऋतम्भरा सम्पद्यते, विशेष पुरुषमीश्वरं धारयितुमर्हाभवति। अमृतपदस्य बोधं कारयित्वा तत्र प्राप्तिं स्थितिञ्च दापयित्वा प्रज्ञाजन्यसंस्कारा अपि शान्ता भवन्ति। इदमेव कैवल्यममृतपदमस्ति– यत्र नास्ति मृत्योः समावेशः, अनवरतप्राप्तसुखम्, सार्वदिकी शान्तिः शाश्वतं जीवनञ्चास्ति। अनेन सहैव प्रथमपाद, "समाधिपादः" अपूपुरत्।

।। ॐ ।।

।।ॐ श्री परमात्मने नमः।।

# द्वितीयोऽध्यायः – साधनपादः

प्रथमाध्याये योगदर्शनप्रणेता महर्षिपतञ्जलिरभ्यासवैराग्याभ्यां साधनस्यारम्भं प्रतिपादितवान्। धैर्यपूर्वकमनयोः सतदम्भासमाध्यमेन चित्तवृत्तयो भवन्ति शान्ताः। तेन विस्पष्टं कृतं यदभ्यासं कस्य विधेयम्? तेनेश्वरस्य स्वरूपमवर्णि, यत् क्लेशकर्मभ्यामत्यन्तं परमस्ति। ईश्वरोऽसौ गुरुणामपि गुरुः। तस्मिनीश्वरे सर्वज्ञतायाः सहजं बीजं व्यज्यते। तस्यास्ति नाम प्रणवः। तस्य (ओम्) जपं कार्यम्, ईश्वरं चिन्तयेत्। एतेन योगमार्गस्य विघ्ना भविष्यन्ति शान्ताः, साधकः समाध्युन्मुखमग्रेसरो भविष्यति। तेन समाधेः सहयोगीनि साधनानि विशदं व्याख्यातानि। स्वप्नेन सहयोगस्य, आप्तपुरुषाणां दिनचर्यया, तेषां दर्शनजन्यसहयोगग्रहणाय निर्देशयामास। योगस्यानुष्ठानम्, यदभीष्टमस्ति भवते तदनुकूलमाशयस्य परिवर्तनार्थं परामर्शमददात्, पुनरपि ध्यानं न स्थिरायते, निरन्तरं नभवत्यभ्यासः, नाम्नि रूपेच न लगति चित्तम्। अतोऽस्मिन् द्वितीयेऽध्याये साधनपादे सम्पूर्णासाधनविधयः प्रस्तूयन्ते, येषु योगस्याष्टाङ्गानां वर्णनं लोकोत्तरमस्ति। सर्वप्रथमं महर्षिः कथयति यत् साधनस्यारम्भः कुतो भवति?

**तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।।१।।**

तपसा, स्वाध्यायेन ईश्वरप्रणिधानेन (शरणागत्या) च योगस्य क्रियारम्भो भवति। गताध्याये महर्षिणैकमात्रेश्वरस्वरूपम्, एकेश्वरस्य शरणं तस्य नाम जपनमुदीरितम्, अधुना प्रस्तुताध्याये स ब्रूते यत् मनसा सहितमिन्द्रियदलमिष्टानुरूपं करणमस्ति तपः। स्वमनसः स्वयमध्ययनविधानमस्ति स्वाध्यायो यन्मनसा कियतानुरक्तेण भवितव्यं कियन्यनुरक्तिश्चाभूत् सफला, आप्तपुरुषाणां वचसोऽनुरूपं कियान्सफलोऽस्मि, सम्प्रति कियत्यस्त्रुटयः सन्ति? अनेन प्रकारेण स्वास्याध्ययनं कुर्वन् साधनायामग्रेसरणमास्ति स्वाध्यायः। ईश्वरप्रणिधानमर्थादेकमीश्वरं प्रति मनसा, कर्मणा, वचसा समर्पणम् कृते सत्येव अलमेतद् योगक्रियाया भवत्यारम्भः। अस्य क्रियायोगस्यास्ति कावश्यकता? अत उपरि प्राह–

**समाधिभावनार्थः क्लेशतनूकरणार्थश्च।।२।।**

आभिः क्रियाभिः समाधिं प्रति श्रद्धाभावना भवति स्थिरा तथा क्लेशाः क्षीणाः सन् बलहीना जायन्ते। ये क्लेशा भवन्ति क्षीणास्ते सन्ति के-के?–

**अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः।।३।।**

अविद्या, अस्मिता, रागः, द्वेषः अभिनिवेशश्च– इमे पञ्चक्लेशाः सन्ति। पञ्चेमे क्लेशा एव जीवमात्रं संसारचक्रे घूर्णमयितारः महादुःखदायकाः सन्ति। एते जन्ममृत्योः कारणानि सन्ति। किन्त्वेष्वपि प्रधानमस्त्यविद्या–

**अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्।।४।।**

अविद्योत्तरवर्तीनामस्मितारागद्वेषाभिनिवेशानां चतुर्णां क्लेशानामुत्पादक-क्षेत्रमस्त्यविद्या। उक्तेमे क्लेशाः प्रसुप्ततनुविच्छिन्नोदाराश्च चतसृष्ववस्थासु सन्तिष्ठन्ते। अस्मिताद्यखिलक्लेशचतुष्टयस्य कारणमस्त्यविद्या। इमे चत्वारोऽविद्यात् एव भवन्ति जागृताः। इमे चत्वारो समाप्तापि भवेयुस्तदाप्यविद्या स्थास्यति स्थिरा। महात्मनः कबीरस्य प्रस्तुतभजनेपीदमेव प्रस्फुटम्– ''**पाँच सखी पाँचों गुनवन्ती, पाँच में सरबस एक जनी। बलम संग सोइ गयीं पाँचों जनी।।**''

क्लेशाः यदा स्वकार्यं न कुर्वन्ति सा तेषां प्रसुप्तावस्था कथ्यते। अस्य नेदं तात्पर्यं यत्ते सन्त्येव नहि। वर्तन्ते ते किन्तु क्रियाशीलाः न सन्ति। प्राप्तोद्दीपने ते भवितुं शक्नुवन्ति क्रियाशीलाः। उदाहरणार्थम्, देवर्षिः नारदः हिमगिरेः कन्दरायां तपस्तप्तुं प्रारेभे। हरेः स्मरणमात्रेणैकस्मिन् स्थाने घटीद्वयाधिकननिवासस्य दक्षशापस्य बभूव गतिः कुण्ठिता। तपसेन्द्रो विचलितो जातः। स मुनिं तपस्यातः विरतं कर्तुमप्सरोगणं प्रेषितवान् किन्तु ''**काम कला कछु मुनिहि न व्यापी।**'' देवर्षिनारदोपरि नाभूत् कोऽपि प्रभावः। झषकेतनस्तमै पदवीमपि प्रादात् यद भवानस्ति जितेन्द्रियः मनोनिग्रही च। नैतत्तथ्यमासीत् यदसौ काममाजन्मार्थं जितवान्। स विकारः प्रसुप्त आसीत्। राज्ञः शीलनिधेः रमणीयां नगरीम्, चेतोहरं नरनारीमण्डलं तथा मनोरमां राजकन्यां तस्याः हस्तरेखाञ्च पश्यत्येव प्रसुप्त विकारोऽजागरीत्। सः कुत्रापि गतो नासीत्, सुप्त आसीत्।

इत्थं क्लेशोः कदाचित् वर्तन्ते प्रसुप्ताः, कदाचित् साधनस्य फलस्वरूपतस्तस्य प्रभावो भवति क्षीणः। योगसाधनामाध्यमेन शनैः-शनैः

तत्प्रभावोत्पादकतायाः ह्रासो जायते, तदेयं क्लेशाः हीनशक्तिकाः कृशवपुष्काश्चोदीर्यन्ते। तेषां क्लेशानां विषयासक्तजनानामुपरि यथा प्रभावो भवति न तथा प्रभवन्ति साधकजने।

क्लेशानां विच्छिन्नावस्था तदा भवति यदापरे क्लेशः क्रियाशीलाः प्रतीयन्ते। यथा कश्चिदस्ति रागाप्लावितस्तदा तस्मिन् समये न दोषाः दृष्टिगोचरायन्ते तस्मिन्, सो विच्छिन्नक्लेशोऽस्ति। सः क्वचित् नास्ति गतः किन्तु तदैतादृगाभासो भवति, कल्प्यतामेतरे क्लेशाः सन्त्येव नहि।

यस्मिन् समये कश्चित् क्लेशः स्वकार्यं पूर्णरूपेण कुर्वन् स्यात्, तस्य क्लेशस्य सास्त्युदारावस्था। यः क्लेशोभोगानन्तरं शान्तो भविष्णुरस्ति, इयमेव तस्योदारता।

एतेषां सर्वेषां मूलकारणं यस्या अविद्यायाः सूत्रेऽस्मिन्नस्ति नामोल्लेखस्तस्य किं स्वरूपम्?

**अनित्याशुचिदुःखानात्मसु**

**नित्यशुचिसुखात्मख्यातिरविद्या।।५।।**

अनित्ये नित्यस्य, अपवित्रे पवित्रस्य, दुःखे सुखस्य, अनात्मन्यात्मभावस्य प्रतीतिरविद्यास्ति। '**नित्य वस्तु है आत्मा मिथ्या जगत् प्रसार**'–नित्यमर्थात् सदासत्यम्, एकरसः, द्रष्टापुरुषः! संसारे शरीरशरीरिणोः सम्बन्धोऽनित्यमस्ति। अमुमनित्यं संसारं नित्यरूपेण स्वीकरणमविद्यास्ति।

इत्थमेवापवित्रं योस्ति, अन्ततोगत्वा दुःखस्य कारणमस्ति, तं पवित्ररूपेण स्वीकृतिस्वस्मिन् सुखानुभूतिकरणमविद्यास्ति। महात्माकबीरः साखीग्रन्थे लिखति–

**झूठे सुख को सुख कहे, मानत है मन मोद।**
**जगत चबैना काल का, कुछ मुख में कुछ गोद।।**

भगवता श्रीकृष्णेन भगवद्गीतायां कथितम्, "अर्जुन! आत्मैव सत्यमस्ति, समस्तभूतादीनां शरीरमास्ति नश्वरम्, नैतेषामास्तित्वं शरीरस्य, एतत्सर्वमनात्मकोटावायाति।" पुनरपि शरीरस्यात्मत्वेन मान्यताविद्यास्ति। एतत्सर्वं दुःखस्य कारणमस्ति, पुनरपि तस्मिन् सांसारिकवातावरणे सुखैश्वर्ययोः कल्पनाविद्यास्ति।

सारांशतः यो नास्ति परमात्मा तमेव परमात्मानं मन्वानाः सन्ति लोकाः। अनेन प्रकारेणऽनित्ये नित्यस्य, अपवित्रे पवित्रस्य, दुःखे सुखस्यानात्मनि चात्ममान्यता, तत्रैव व्यस्तताविद्या कथ्यते। अधुना शेषक्लेषेष्वस्मितास्वरूपं समुच्यते।

**दृग्दर्शनशक्त्योरेकात्मतेवास्मिता।।६।।**

दृक्शक्तेः दर्शनशक्तेश्चेतयोः द्वयोरेकरूपता भवनमस्मिता कथ्यते। दृक्शक्तिः, अर्थात् द्रष्टापुरुषस्तथा दर्शनशक्तिरर्थात् मनोबुद्धिचित्तेन्द्रियाणि यदुपकरणोपरि दृश्यानि दृष्टिपथायन्ते, इत्यनयोर्द्वयोरेकरूपतानुभूतिः कथ्यतेऽस्मिता। द्रष्टा चेतनमस्ति, यदान्युपकरणानि द्रष्टा स्वं मनः, बुद्धिं चित्तादिकञ्च मनुते– '**जड़ चेतनहिं ग्रन्थि परि गई। जदपि मृषा छूटत कठिनई**।।' (रामचरितमानस)। चेतनस्य जडेन सहेदम्मिश्रणमस्मिता नामकः क्लेशोऽस्ति। अतः परं रागं पश्यन्तु–

**सुखानुशयी रागः।।७।।**

सुखप्रतीत्यनुगामिनो मनसः स्वभावं रागो बोधव्यः। यस्मिन् वस्तुनि सुखप्रतीतिर्भवति, त्वरितं तस्मिन् रागो दृढ़ायते। अयमप्यस्त्येकः क्लेशः। अनुकूलपदार्थेषु सुखस्य प्रतीतिस्तथानवरतं तद् भोगस्याकांक्षासक्तिरस्ति, अयमेव रागः। अयं रागनामकः क्लेशः सुखस्य प्रतीत्यासहानुक्षणं सहवासी समुच्यते। अनेन प्रकारेण द्वेषस्य स्वरूपमवलोक्यताम्–

**दुःखानुशयी द्वेषः।।८।।**

प्रकृतेः यस्मिन् कस्मिन्पदार्थे दुःखस्यानुभूतिर्भवति, मनस्तस्य विरोधं कर्तुं लगति, अयमेव द्वेषनामकः क्लेशोऽस्ति। दुःखानुगामिनी प्रतीतिः द्वेषो ज्ञेयः। गीतायां कृष्णोऽब्रवीत्–

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।**
**तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ।। (३/३४)**

इन्द्रियेष्विन्द्रियभोगेषु च रागद्वेषौ निवसतः। साधनपथस्येमौ दुर्जयौ वैरिणौ स्तः। अनयोर्वशे नागन्तव्यम्। रागद्वेषौ परस्परमिन्द्रियभोगयोः संघर्षतो जायेते। भोगोऽनुकुलः प्राप्तश्चेत् रागांकुरणं भोगे वैपरीत्ये द्वेषभावस्य प्ररोहणम्।

साधकेनोभयतः सावधानेन वर्तितव्यम्। इदानीमन्तिमस्याभिनेष क्लेशस्य स्वरूपं प्रस्तूयते–

**स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः।।९।।**

पूर्वनिवासं प्रति ममता समुच्यतेऽभिनिवेशनामाक्लेशः, यो मूढ़वत् विवेकशीलपुरुषेष्वपि परम्परागतस्वभावेनास्ति विद्यमानः। यत्राहं पूर्वं निवसामि स्म तं प्रत्याकर्षणम्, आकर्षणमभिनिवेशः कथ्यते। अयमभिनिवेशः स्वरे प्रवाहितो भूत्वा जन्म-जन्मान्तरं यावत् करोत्यनुगमनम्। सांसारिकनिवासो नास्ति मम गेहः, एनमहं स्वकीयं मन्वानोऽस्मि–

**तवन घर चेतिहे रे भाई। तोहरा आवागमन मिटि जाई।।**

**कह कबीर निज घर चलो। जहाँ काल नहीं जाय।।**

गीतायां भगवान् श्रीकृष्णः ब्रवीति, अर्जुन! '**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**' ईश्वर समस्तभूतप्राणिनां निवसति। तस्य हृदयनिवासिनः परमात्मनः शरणं याहि। कल्प्यताम्, कश्चित् साधकः पूर्वोक्तक्लेशमण्डलात् मुक्तो भूत्वा चेच्छरणमयासीत्तर्हि तेन को लाभः? भगवानाह, '**तत्प्रसादात्परा शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।**' (१८/६२) तस्यानुकम्पायाः प्रसादेन त्वं परमशान्तिं लप्स्यसे, तं निवासस्थानञ्च प्राप्स्यसि यच्छाश्वतमस्ति। इयमेवास्ति भवतो निकेतनम्, यत्र भवतो जीवनं सदैव भविता निवासः मेलिता।

साधकेनास्माद्भिनिवेशात् सावधानेन वर्तितव्यम्। अग्रिमे क्षणे प्राप्तिः सुखंभवा किन्त्वेकपलपूर्वं यावदयमभिनिवेशः पृष्ठानुगमनङ्करोति। पूज्यगुरुदेवाय विचरणकाले मधवापुरस्थले चातुर्मास्यं कर्तुं निर्देशो भगवतः प्राप्तः। तत्र महाराजः सायंकाले विचरणार्थं निःसरति स्म। एकस्य गृहस्य निकटे गते सति मनस्याकर्षणं भवितुमारब्धवान् यत् गेहं प्रविशानि, कल्पयतु, इदं गृहं स्वकीयमेव। द्वित्रा वारमेवमाकर्षणे जाते सति स्वेष्टात् ज्ञातुमेष यत् कथमित्थं भवति? भगवतोपदिष्टं यत् पूर्वजन्मनि मासद्वयं सार्धमासद्वयमस्मिन् गृहे जन्मगृहीत्वा निवासस्य संस्कारः करोत्यनुगमनम्। भवतः प्रसविनी जनन्यपि जीवति। महाराजो भक्तेभ्यो ज्ञातुमकामयत् यत्तस्मिन् गेहे किं कस्यचित् द्विवर्षीयस्य सार्धद्विवर्षस्य शिशौः निधनमभूत्? ग्रामे चर्चा चलिता। सा वृद्धापि महाराजस्य सान्निध्ये समागता, रूदनं कारमकारं तस्य मृतपुत्रस्य गुणवर्णनं कुर्वन्त्यासीत् किन्तु

महाराजोऽनुभवप्राप्तसङ्केतं न प्रकाशितं चकार। जीवः प्रकृतौ यत्र-तत्र निवसन् समागतवानस्ति, पूर्वनिवासस्याकर्षणं तमाकर्षयन् वर्तते। चित्तवृत्तौ शान्तेः प्रवाहानन्तरं निर्बीजसमाधेरवस्थायायं क्लेशोऽपि शान्तो भवति, केवलमविद्याशिष्यते जीविता। शान्ते बीजे साऽपि शान्तिं गच्छति।

केचन जना आत्मनिवासेशरीरे ममत्वं मरणभयं चाभिनिवेशमाहुः किन्तु नैवं किञ्चिदपि। जीवो विभिन्नशरीराणां यात्रामेव तु कुर्वन् समागच्छनस्ति, किं किं शरीरं प्रति ममत्वं करिष्यति? भगवान् श्रीकृष्णः गीतायां ब्रूते- अर्जुन! त्वं पण्डितवत् वार्तां करोषि किन्तु पण्डितजनाः ये मृताः ये जीविताः सन्ति तदर्थं न शोचन्ति। शरीरे यथा बाल्यम्, किशोरा, युवा, प्रौढ़ा वृद्धाश्चावस्थाः समायान्ति, इत्थमेवापरशरीराणां परिवर्तनं भवति। अस्मिन् धीरपुरुषाः न कदापि मुह्यन्ति। योगसाधनायां महापुरुषा भयमिमं परित्यज्यैवलेभिरे; किन्तु जीवः यत्रेदानीं यावदासीज्जीवित, तस्य पूर्वनिवासं प्रति नैसर्गिकमाकर्षणमन्तिमसंस्कारं यावत् पिण्डं न मुञ्चति, मूढ़वत् विवेकशीलपुरुषेष्वप्यीयं स्थितिः प्राप्यते।

**ते प्रतिप्रसवहेयाः सूक्ष्माः।।१०।।**

क्रियायोगतः सूक्ष्मावस्थां प्राप्तास्ते क्लेशा आत्मपथस्य विरोध विकारानेव '**प्रसवः**'- उत्पादयन्ति, अतः '**हेयाः**'- नाशयितुमर्हाः। क्लेशेभ्यो विपरीतं परिणामं प्राप्तुं क उपायः? ब्रवीत्यत उपरि-

**ध्यानहेयास्तद्वृत्तयः।।११।।**

क्लेशोपेताः वृत्तयः ध्यानमाध्यमेन नाशयितुमर्हाः सन्ति अर्थात् क्लेशानां निरसनाय ध्यानं परमावश्यकमस्ति। ध्यानस्य विधिस्तृतीयपादे द्वितीयसूत्रेऽपि द्रष्टव्यः। ध्यानविषये निर्दिष्टमस्ति यदभ्यासकाले चित्तं यत्र नियोजयेत्तत्र वृत्तेरेकरसास्थितिः, उच्चाटनाभावः ध्यानं कथ्यते। ध्यानस्यमाध्यमेनैतेषां क्लेशानां निर्मूलनं करणीयमेव भविष्यति, यतोहीमे शुभाशुभसंस्काराः सन्ति कारणानि दुःखानाम्।

**क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः।।१२।।**

यावत् क्लेशस्य बीजं विद्यते, तावत् कर्मसंस्काराणां समुदायः, दृष्टेऽर्थात् वर्तमानकाले, तथाऽदृष्टेऽर्थात् भविष्ये सम्भावितेष्वेव दृष्टादृष्टप्रकारकेषु जन्मसु

भोगार्हा भवन्त्यनिवार्यतः। तेषां भोगानां स्वरूपं किं भविष्यति? ते केन रूपेण भवन्ति प्रकटिताः?–

**सति मूले तद्विपाको जात्यायुर्भोगाः।।१३।।**

क्लेशरूपस्य मूलस्य विद्यमानत्वे सति, '**तद्विपाकः**'– तस्य कर्मसंस्कारस्य संग्रहस्य परिणामस्वरूपे जन्म, पुनर्जन्म, आयुस्तथा भोगो निरन्तरं प्रचलन्नेव वर्तते। परिणामस्वरूपमधिकरूपेण सुस्पष्टं क्रियते–

**ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्।।१४।।**

तानि जन्मानि, आयुषा, भोगेन च हर्षेण शोकरूपेण च फलदायका भवन्ति, यतोहि तेषां कारणद्वयमस्ति– पुण्यकर्मपापकर्म च। पूर्णत्वाभिमुखं नायकानि कर्माणि सन्ति पुण्यकर्माणि तथा पतनोन्मुखं नायकानि कर्माणि सन्ति पापकर्माणि। पुण्यकर्म, अर्थादक्लिष्टवृत्तिसञ्चालितं कर्म जन्मनि, आयुषिभोगे च हर्षं प्रददाति। इत्थमेव पापकर्मार्थात् क्लिष्टवृत्तिसंचालितं कर्म जन्मनि, आयुषि भोगे च परितापं प्रददाति। विवेकीनां कृते सुखस्य तृष्णापि दुःखमेवास्ति–

**परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च**
**दुःखमेव सर्वं विवेकिनः।।१५।।**

परिणामदुःखस्य, तापदुःखस्य, संस्कारदुःखस्य च सर्वत्र विद्यमानत्वादेवं त्रयाणां गुणानां वृत्तिषु पारस्परिक विरोधेन कारणेन विवेकीनां कृतेऽपि सर्वं कर्मफलं दुःखरूपमेवास्ति। प्रत्येकं कर्मफलं भोगकालानन्तरं परिणामे दुःखप्रदानं विदधाति। अद्य साधुप्रकारेण हर्षमनुभवेयम्, श्व एतत् संश्लिष्टं दुःखमपि समागमिष्यति। क्वचिदधिकभोगस्थितिः मम सविधे कथं भोगन्यूनता? एवंदृशी भावना तापदुःखस्वरूपा कथ्यते। कदाचित् कदाचिचानिच्छकः कृतेऽपि हठात् दुःखप्राप्तिर्भवति। संस्कारदुःखमेतदस्ति। '**गुणवृत्तिविरोधाच्च**'– सत्वरजस्तमसां गुणत्रयाणां स्वभावे विरोधकारणात् परस्परं विरुद्धपरिणामोऽपि प्रतीयते। सात्विकवृत्तिः प्रकाशोन्मुखं नयति, यदा तु तामसीवृत्तिरन्धकारोन्मुखं प्रवर्तयति। अनेन प्रकारेणैकस्यैव परिणामस्य भोगेऽपरागुणवृत्तिर्बाधिका भवति। अत विवेकवतः पुरुषस्य कृते

समस्तकर्मफलभोगः दुःखरूपमेवास्ति। अत इमे क्लेशाः विनाशनीयाः। गीतायां भगवान् श्रीकृष्णः कथितवानस्ति–

**विषयेन्द्रिय संयोगाद्यत्तदग्रेऽमृतोपमम्।**
**परिणामे विषमिव तत्सुखं राजसं स्मृतम्।। (१८/३८)**

यत्सुखं विषयेन्द्रिययोः संयोगतः लभ्यते, तत्सुखं यद्यपि भोगकालेऽमृतोपमं भासते तथापि परिणामे विषसन्निभमस्ति। अतः तत्सुखं राजसं प्रोच्यते।

उपर्युक्तवर्णनेन विस्पष्टमस्ति यत्, जन्मजम्, आयुः प्रसूतञ्च तथा भोगस्वरूपं सकलं कर्मफलं दुःखरूपमेवास्ति। अतस्तस्य समूलमुच्छेदनं मनुष्यस्य प्रमुखं कर्तव्यमस्ति।

**हेयं दुःखमनागतम्।।१६।।**

**अब कल की बात बना ले रे।**
**जो बीती बीत गई।**
**दुनिया की रीति यही।**

कर्मणां दुःखरूपफलानां योअंशोऽभूद् व्यतीतस्तत्तु व्यतीतं एव। कर्मणः दुःखरूपफलस्य किञ्चिदंशो वर्तमानकाले भोगार्थमस्ति गले पतितः। किन्तु यद् दुःखमद्यावधौ नागतम्, भविष्योदरे वर्तते, आगन्तुकमस्ति वा तद्दुःखं हेयमस्ति, नाशनार्होऽस्ति। जागर्ति प्रश्नः, केन विधिना नष्टो भवेत्? तस्य विधि कोऽस्ति?

**द्रष्टृदृश्ययोः संयोगो हेयहेतुः।।१७।।**

द्रष्टुः पुरुषस्य दृश्यस्य परमतत्त्वस्य संयोगो दुःखानां हेयस्य कारणमस्ति। आदौ दृश्यस्य कारणं द्रष्टव्यम् –

**प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं**
**भोगापवर्गार्थं दृश्यम्।।१८।।**

प्रकाशः, क्रियास्थितिश्च यस्य स्वभावो वर्तते, भूतानीन्द्रियाणि च यस्य व्यक्तं स्वरूपमस्ति, यस्य प्रयोजनं पुरुषस्य कृते भोगमोक्षयोः सम्पादनकरणमस्ति– एवं प्रकारकं तद्दृश्यमस्ति। एकस्मिन् परमात्मन्येव राराजते

प्रकाशः, प्रकृतौ तु वाविद्यतेऽन्धकारः। ईश्वरीय प्रकाशात्मस्वरूपोन्मुखं नयनम्, प्रकाशस्य प्रबोधनम्, तदर्थं क्रियाशीलकरणम्, योगसाधनायां नियोजनम्, प्रवृत्तकरणम् स्थितिप्रदानञ्च दृश्यस्येदमस्ति। भूतेन्द्रियाणि यस्य प्रकटितं स्वरूपमस्ति। सृष्टौ यत्किञ्चित् नयनगोचरी भवति तदस्ति भूतम्। भूतेन्द्रियाभ्यां तस्य ग्रहणं क्रियते। यस्य मुख्यं प्रयोजनमस्ति पुरुषस्य वृऽते भोगमोक्षयोर्व्यवस्थापनम्। ये भोगाः न सन्ति सांसारिकाः। **'इष्टान्भोगान् हि वो देवा' (गीता, ३/१२)**। इष्टसम्बद्धस्य भोगस्य प्रदानं दृश्यस्य प्रमुखं वैशिष्ट्यमस्ति। ये-ये भोगा भवते रोचन्ते तस्य सम्पदाने किम् -किमपेक्षितमस्ति, तत्सुविधा प्रदानं दृश्यस्यास्ति कार्यम्। भगवत भोजनमिदमेवास्ति। **'भोक्तारं यज्ञ तपसां सर्वलोक महेश्वरम्।'** यज्ञतपस् स्वाध्यायादीनियान्यपीष्टोन्मुखानि सन्ति साधनानि, तान्येवाऽहमश्नामि।

इदमेवास्ति भगवद्भोजनम्। अस्तु, पुरुषस्य कृते साधनोपयोगिनो भोगस्य व्यवस्थाभिधानं तथान्ततो मुक्तेः सम्यक् प्रकारेण सम्पादनं मुक्तिपर्यन्ता दूरीं निश्चितकरणं यस्यास्ति प्रयोजनम्, स एव दृश्यः समुदीर्यते। यदि प्रकृतिरेव दृश्यं भवेत्तर्हि सा कथं भवेत् मोक्षप्रदान समर्थाः? प्रकृतिस्तु संसारे पुरुषस्य पाशयित्री, तस्माद् भवपाशादेव मम मुक्तिप्राप्तिः प्रमुखं लक्ष्यम्।

अत्र 'दृश्यम्' प्रकाशस्वरूपस्य ज्योतिर्मयस्य परमात्मनः प्रेरणास्ति। प्रकाशक्रियास्थितयः सन्ति यस्य स्वभावाः तद्दृश्यमस्ति। भूतेन्द्रियाणि यस्याभिव्यक्तं स्वरूपमस्ति, तदस्ति दृश्यम्। अनुभवे प्रोक्तेभ्य एतेभ्यः जीवसंसारेभ्यः किञ्चिदपि दृश्यमागन्तुं शक्नोति, इन्द्रियाणि यत् गृह्णन्ति। यज्ञतपस्येत्यादीनां साधनसंग्रहो मुक्तावधौ च दूरीनिश्चयनं यस्यास्ति प्रयोजनम्, तदस्ति दृश्यम्। दृश्यं मुक्तेः कथङ्करोति सम्पादनम्? कथयत्यत उपरि-

**विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि।।१९।।**

विशेषः, अविशेषः, लिङ्गमात्रमलिङ्गश्च **'गुणपर्वाणि'** - गुणभेदमाध्यमेनोक्त चतुभिर्विधिभिः दृश्यं प्रसरति। विशेषः कथ्यते परमात्मा- **'पुरुषविशेष ईश्वरः।'** विशेषस्य परिचयविधानम्, अविशेषस्यार्थात् प्रकृतेरावरणं सघनायते। सावधान्, अभ्यासं वर्धय। विशेषः- ईश्वरीयालोकस्य बोधविधानं यद् चराग्रे-चराग्रे, साधुसाधुनाऽस्ति। लिङ्गमात्रम् - स्वरूपं प्रकाश्यावबोधनम्,

अलिङ्गः– अदृश्यरूपेण बोधनम्, यथाऽगेषु स्फुरणम् व्योमगिरा तथाव्यक्तसङ्केतैः परमात्मा प्रबोधयनास्ते, किमपि दृश्यं नोपतिष्ठतेऽनुभवश्च लभमानः प्रतीयते। इमानि दृश्यानि गुणानां प्रभावानुसारेण चलन्ति।

रामचरितमानसे लिखितमस्ति–

**जगु पेखन तुम देखनिहारे। विधि हरि शंभु नचावनिहारे।।**
**तेउ न जानई मरम तुम्हारा। औरु तुम्हहि को जाननिहारा।।**

जगदस्ति दृश्यम्, भवानस्ति च द्रष्टा। विधिः, परमात्मनः प्रशक्ति यया साधना जागृता भवति। हरिः, यः भरण–पोषणं करोति संसारस्य। शम्भुः, यः शुभाशुभ सङ्कल्पानां संहार कृत्वा स्थितिं प्रददाति। एतेषां नर्तकश्चालकः स्वयं भगवानेवास्ति विधिहरिशङ्करादीनाम्। ते विधिहरिहराः परमतत्वेन भवन्ति सञ्चालिताः, किन्तु तेऽपीश्वरीयं रहस्यं नावबुध्यन्ते, अपरे केऽपि किं ज्ञास्यन्ति, अर्थात् भगवान् रथसञ्चालको भवति, सञ्चालयति च। इदानीं द्रष्टुः स्वरूपं वर्ण्यते–

**द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।।२०।।**

चेतनमात्रं ज्ञानस्वरूपं द्रष्टात्मा यद्यपि स्वभावतः सर्वथा शुद्धोऽस्ति, निर्विकारोऽस्ति, पुनरपि बुद्धिवृत्यनुसारेणास्ति द्रष्टा। बुद्धौ यादृशी वृत्तिस्तथैव तस्य स्वरूपमस्ति। द्रष्टा दृष्ट्वा करोति किम्?–

**तदर्थ एव दृश्यस्यात्मा।।२१।।**

पूर्वोक्त दृश्यस्य स्वरूपं द्रष्टुःकृत एवाऽस्ति। यद् दृश्यं पुरुषाय भोगापवर्गयोः व्यवस्थाङ्करोति, तद् दृश्यस्योपयोगस्तद् द्रष्टुर्हेतव एवास्ति।

**कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्।।२२।।**

यस्य भोगरूपमपवर्गरूपञ्च कार्यं परिपूर्णतामगात्, तस्य पुरुषस्य कृते प्राप्तनाशमिदं दृश्यं नष्टं न भवति। तदर्थमधुना दृश्यस्यावश्यकतायाः अस्तित्वहीने सत्यपीतसाधारणजनानाङ्कृतेऽस्यास्त्युपयोगः, इमएव महापुरुषाः सद्गुरवो भवन्ति। तेषां सविधेऽपरेषु द्रष्टादृश्ययोः संयोगं प्रसारयितुं भवति जागृतिः। इतरेषाङ्कृतेऽस्ति दृश्यस्योपयोगः, महापुरुषाणाङ्कृते न तस्य किमपि प्रयोजनं शेषायते।

एकदा पूज्यगुरुदेवो भगवानेकं दृश्यमद्राक्षीत्यदेको भ्रष्टो योगी समागच्छन्नस्ति, तस्य मार्गदर्शनं करवाणि। आदिनं प्रतीक्षानन्तरं स आगतः। अयमेवास्माकं सतीर्थ्यः, अग्रजः महाराजस्य प्रथमशिष्यो बभूव। तस्य दृश्यस्य तादृक् महापुरुषाणाङ्कृते न कोऽप्युपयोगः, किन्तु जागृतेरियं प्रशक्तिस्तस्मिन् विद्यमाना प्रकाशतेऽन्यजनानां कल्याणार्थम्।

पूज्य महाराजाः कथयन्ति स्म, "हो! भजनस्य जागृतिरस्त्येकैतादृशी विद्या यल्लेखनेन, पठनेन, श्रवणेन नायाति। वचसा सा वक्तुं नहि शक्यते। सा तु कस्यचिदनुभविनः सद्गुरोः माध्यमेन कस्यचित्कस्यचिदधिकारिणो हृदये जागृता भवति।" अतः सामान्यजनानां कल्याणाय दृश्यस्यास्त्युपयोगः। इदानीं दृश्यद्रष्टोः संयोगस्य स्वरूपं प्रस्तूयते–

**स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः।।२३।।**

स्वशक्तिः या मुक्तेः करोति सम्पादनमर्थात् दृश्यस्य स्वामिशक्ति–पुरुषश्चानयोरुभयोः सम्मेलनं कार्यकरणे नियोजनम्, यत्स्वरूपं प्राप्तेः कारणमस्ति, सः संयोगः कथ्यते। दृश्यस्य द्रष्टुश्च; स्वशक्तेः स्वामिशक्तेश्च यदा भवेत्कार्ये प्रसरोऽयं संयोगोऽनेन भजनं जागृतं भवति। संयोगस्य किमर्थमागतावश्यकता?–

**तस्य हेतुरविद्या।।२४।।**

अस्य संयोगस्य कारणमस्त्यविद्या। अविद्यायाः लोपेन सह संयोगोऽपि समाप्तिं याति। विलुप्ता त्वविद्या, संयोगः कथं समाप्त? अस्य कारणमप्यविद्यैवास्ति। नास्या अस्तित्वं भवेत्, न तु द्रष्टुः कृते दृश्यस्यावबोधं स्यादावश्यकम्। दृश्योऽपवर्गस्य व्यवस्थां यदा चकार तदा कृतार्थमहापुरुषस्य कृते न तु दृश्यस्य भवत्यावश्यकता न चोपयोगिता संयोगस्य।

**तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्।।२५।।**

अभावे तद्विद्याया भवति संयोगस्याप्यभावः। इदमेव (हानम्) पुनर्जन्मादेः कारणभूतानां वर्तमाने भविष्ये च समागन्तृणां दुःखानामत्यन्ताभावः समुच्यते। तदेव चेतनात्मनः कैवल्यं पदमस्ति, अमृतमयोऽविनाशी पदञ्च कथ्यते। इयं कैवल्यं पदं कीदृशमस्ति? दुःखानामत्यन्ताभावः 'हानम्' कदा जायते?–

**विवेकख्यातिरविप्लवा हानोपायः।।२६।।**

निश्चलनिर्दोषाभ्यामुपेतं विवेकज्ञानयुतम् 'हानम्' दुःखानामत्यन्तिकान्तस्यास्त्युपायः। विवेकख्यातिस्तस्या अवस्थाया अभिधानमस्ति, यदा विवेकः स्वपरिणामप्रदानस्यावस्थां पारयित्वा दत्त परिणामो भवेत्। हानस्योपायः विवेकख्यातिरस्ति। तद्विद्याया अभावेन संयोगस्याभावो भवति। पुनः भगवान् कं प्रबोधयेत्, कं पाठयेत्? अतस्तस्य महापुरुषस्य कृते संयोगोऽसौ भवति नष्टः। तदेव हानं कथ्यते यतोहीदानीं न तदर्थमस्ति बन्धनं न च मुक्तिसम्पादनं शेषम्। पूर्वजन्मादि दुःखानामभावः हानमाहुः। तदेवास्य चेतनात्मनः कैवल्यमस्ति। निश्चलनिर्दोषविवेकख्यातिः स्वपराकाष्ठां सनाथयति। अयमेव 'हानोपायः' दुःखान्मुक्तेरूपायोऽस्ति। तस्मिन् समये–

**तस्य सप्तधा प्रान्तभूमिः प्रज्ञा।।२७।।**

तस्य विवेकख्यातिज्ञानस्य भवन्ति सप्तावस्थाः, ताः सप्तावस्था भगवत् पथस्य सन्ति सप्तभूमिकाः। महर्षिस्त्वेताषां नामोल्लेखं न चक्रे किन्त्वन्यान् ग्रन्थेष्विमाः क्रमशः शुभेच्छा, सुविचारणा, तनुमानसा, सत्त्वापत्तिः, असंसक्तिः, पदार्थाभावना, तुर्यगा चेति नाम्ना ख्याताः। इयं विवेकख्यातिः कदा प्राप्ता भवति? कथ्यते ततः–

**योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।।२८।।**

योगस्य विभिन्नाङ्गानामनुष्ठानेनाशुद्धेर्जाते नाशे ज्ञानस्य प्रकाशो विवेकख्यातिपर्यन्तं प्रसरति। ज्ञानमस्त्यारम्भे, तद् ज्ञानं मध्यस्तरीयमुन्नतस्तरीयं चाप्यस्ति। ख्यातिरर्थात्ज्ञानमपि स्वपूर्णप्रकाशस्य दत्तान्तिमलक्ष्यो बभूव- सा विवेकख्यातिरस्ति। अतः परं शेषायते कैवल्यपदं किन्त्वेतेषां लक्ष्याणां प्राप्तये योगस्याङ्गानामनुष्ठानमेवास्त्येकं माध्यमम्। अधुना किमस्ति योगः? अस्य कत्यङ्गानि?–

**यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-**
**समाधयोऽष्टावङ्गानि।।२९।।**

योगस्याष्टाङ्गानि सन्ति- यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणाध्यानं समाधिश्च। एषु योगस्याद्यङ्गयमस्य वर्णनमस्ति प्रस्तुतम्–

**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।।३०।।**

अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहश्चेमे सन्ति पञ्च यमाः। आत्मरमणमहिंसा समुच्यते। सत्यमेकमात्रमात्मनः प्राप्तेः सत्याचरणमस्ति। इष्टस्य सन्निधौ निष्कपटभावः कथितोऽस्तेयः। मनसा सहितेन्द्रियाणां ब्रह्माचरणे प्रवाहो ब्रह्मचर्यमस्ति। विजातीयसंस्काराणां संग्रहात् स्वरक्षणमपरिग्रहः कथ्यते। उक्त यमस्य विशेषतां वर्णयति–

**जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्।।३१।।**

उपर्युक्त यमाः – जाते, देशकालयोः समयश्चार्थात् निमित्तस्य सीमातोऽबाधिते सति सार्वभौममहाव्रतपदं दधति। चित्तवृत्तीनामेकप्रकारतो द्वितीयप्रकारे परिवर्तनं जातिरर्थात् जन्म कथ्यते। मनुष्यस्तादृगेवास्ति, यथा तस्य चित्तवृत्तेरस्ति प्रवाहः, यस्मिन् निम्नावस्थात् उन्नतावस्थां प्राप्तेः क्रम आगमनं कुर्वन्वर्तते। काकभुशुण्डिरजगरस्य शरीरं प्राप्तवान्, काकस्य शरीरं प्राप्तवान्, जडभरतो मृगशरीरं लब्धवान्, भगवान् बुद्धः पूर्व शताधिकजन्मसु विभिन्नयोनिषु जन्म गृहीतवान् तेषु जन्मषु यमानां पालनमपूपुरत्। इत्थमेव देशे (नाम्नि, रूपे योगे वा कस्मिन्नप्यङ्गे) यथाकामं यत्र कुत्रापि मनः योजनीयम्, इयत् समयं यावत् मनोलगति, ब्राह्मवेलायां मनः साधु रमते, तद्भिन्नसमये न तथा लगति। अल्पानल्पनिमित्तैः (यथा कस्मिंश्चिदवसरविशेषे हिंसा न करिष्यामि, आसु तिथिसु ब्रह्मचर्यस्य पालनं करिष्यामि) इयं प्रकारकैः पणै यदा यमाः न भवन्ति बाधिताः, प्रतिक्षणं यत्र कामय, यदा कामय, निरन्तरमेतेषां यमानां पालने लगेन्मनः, तस्मिन् समये सार्वभौमा भवन्तीमे यमाः। सर्वासु योनिषु (भूमिषु), सर्वसमयेषु, सर्वावस्थासु, सर्वदेशेषु, सर्वनिमित्तेष्वबाधरूपेण यदैषां यमानामाचरणं भवितुमारभते, तदेमानि महाव्रतं कथयन्ति। यमानां वर्णनं कृत्वाधुना नियमानां वर्णनं क्रियते–

**शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।।३२।।**

शौचस्य, सन्तोषस्य, तपसः, स्वाध्यायस्य, ईश्वरशरणागतेश्चैषां पञ्चानां नामायाति नियमे। यमनियमयोः पालने विरोधिनः सङ्कल्पाः सततमागच्छन्ति। विरोधीसङ्कल्पानां भवेत्कथं परिहार?–

**वितर्कबाधने प्रतिपक्षभावनम्।।३३।।**

विरोधीभावानां समुत्थिते सति तत्प्रतिरोधी विचाराणां भूयोभूयश्चिन्तनं कर्तव्यम्। प्रतिपक्षी विचाराणां चिन्तनं कथं विधेयम्?–

**वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्।।३४।।**

यम-नियमयोः पालनावसरे समागच्छन्ति तद् विरोधिनोभावाः। यथा सत्यस्य स्थानेऽसत्यम्, अस्तेयस्य स्थाने स्तेयम्, ब्रह्मचर्यस्य स्थाने वासना, अपरिग्रहेसंग्रहः, शौचे, अशुद्धिः, एते विरोधिनो भावा आव्रजन्ति। एतान् '**वितर्कः**'– विरोधीतर्कः कथ्यते। तर्का इमे त्रिधा भवन्तिकृतकारितानुमोदिताश्चार्थात् स्वयं कृताः, परैः कारिताः, तथानुमोदिता। विरोधिनो विचाराः किमर्थमायान्ति? अस्य कारणानि लोभक्रोधमोहाः सन्ति। एभिरनुप्रेरितो भूत्वा मनुष्यस्तपसि कर्तुमारभते दीर्घसूत्रितामालस्यञ्च। एतत्प्रेरितवितर्कस्य मात्रा कस्मिंश्चिदल्पा, कस्मिंश्चिद् मध्यमा, कस्मिंश्चिद् प्रचुरा परिलक्ष्यते। एतेषां वितर्काणां प्रतिपक्षी विचारा विभावनीयाः यत् वितर्कस्य भावाः दुःखदा अज्ञानकारका असीम फलदाः सन्ति। इमे पुनः नरकोन्मुखं पतनोन्मुखं नेष्यन्ति। एतत्सर्वमेवाद्यावधि कृतम्, पुनस्तदेव? रे मन! एभ्यो मुक्तये तु त्वमिहागतोऽसि। कस्य महापुरुषस्य शरणं गतोऽसि? किं स्वकीयेन सह गुरोः महाराजस्य निर्मलयश उपरि प्रश्नचिह्नं दत्तवानसि? अनेन प्रकारेण मनसः सम्बोधनं कथ्यते प्रतिपक्षभावना। अधुना यमनियमानां पराकाष्ठा वर्ण्यते–

**अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।।३५।।**

अहिंसायाः स्थितौ दृढ़ायितायां तस्य योगिनः सान्निध्ये निवसन्तः सर्वे प्राणिनो वैरभावमुच्यन्ति, यतोहि तस्य चतसृषु दिक्षु वायुमण्डलं परं प्रशान्तं समुपतिष्ठते। एतादृग् महापुरुषाणां निवासस्थलस्याश्रमाणां व्यवस्था भवति विलक्षणा। मानसे लिखितमस्ति, यदातः भगवान् श्रीरामश्चित्रकूटे निवासं कर्तुं प्रारभत्– '**करि केहरि कपि कोल कुरंगा। विगत बैर विचरहिं सब संगा।।**' पूज्यगुरु महाराजा अनुसुइयायाः निर्जन भयावहेकान्तारे निवासं कुर्वन्ति स्म। यत्र व्याघ्ररीक्षाविशालकायानां फणीनां प्राचुर्यमासीत्, किन्तूक्तहिंसकवन्यजीवैराश्रमपरिसरे कदापि न कापि कृता भीषणा दुर्घटना।

भगवतः स्वामिनो महावीरस्यास्ति निर्णयो यदात्मानमधोगतिं प्रापयितुं यावन्तः सन्ति विकाराः, त एव हिंसायाः कारणानि सन्ति। एतेषां विकाराणां निरोधनमेव कथ्यते विशुद्धाऽहिंसा। यथार्थतः हिंसाया अर्थः कस्यापि जीवस्य व्यापादनमात्रमेव नास्ति, उद्वात्मपथो विचलनं हिंसा कथ्यते। आत्मपथोन्मुखमग्रेसरता कथ्यतेऽहिंसा। स्वकीयात्मस्वरूपे प्रवेशनं जीवस्य परमकल्याणमस्ति। अत आत्मस्वरूपस्य संरक्षणमहिंसास्ति।

भगवता श्रीकृष्णेन गीतायां स्थाने-स्थानेऽहिंसायाः प्रयोगः कृतः। योगविधियज्ञस्य चतुर्दशलक्षणोष्वहिंसा संशितव्रतमस्ति, यस्य परिणामः सनातनब्रह्मणो दर्शनं तत्र स्थितिश्चास्ति। स्वरूपे स्थितो महापुरुषः क्षेत्रज्ञोऽस्ति, क्षेत्रज्ञस्य लक्षणेऽपि प्रमुखं स्थानं वर्णितमहिंसायाः। दैवीसम्पत् या परमदेवे परमात्मनि प्रवेशं दापयति, मोक्षञ्च ददाति। तेष्विन्द्रियाणां दमनम्, मनसः शमनम्, अनुभवात्मिकोपलब्धिः, वास्तविकपरिचितिरित्यादि षड्विंशति लक्षणेष्वेकाऽहिंसापि परिगणितास्ति। अर्जुन! आत्मैव शत्रुः, आत्मैव मित्रमस्ति। येन पुरुषेण समनसेन्द्रियाणि विजितानि, तदर्थं तस्यात्मा मित्रं भूत्वा मित्रतां वर्तयति, परमकल्याणकारको भवति। यैः पुरुषैः मनसासहितमिन्द्रियमण्डलं नवशीकृतम्, तदर्थं तस्यैवात्मा शत्रुरस्ति, शत्रुतां वर्तयति, अधमनिम्नयोनिनां कारणं भवति। अतः पुरुषाणामस्ति कर्तव्यं यत् स्वात्मन उद्धारं स्वयं कुर्युः, अधोगतिं न प्राप्नुयुः।

अहिंसाप्राप्तमहापुरुषाणां सान्निध्ये पूर्वोक्तवैरकारणानां त्यागो भवति, संयमः सिद्धो भवति, आत्मनः स्थितिः लभ्यते, आत्मोद्धारो भवति। इमां शिक्षां महापुरुषा ददति। अतोऽहिंसा कश्यचित् विरलमहापुरुषक्षेत्रस्यास्ति वस्तु। एवं महापुरुषं परित एवं प्रभावक्षेत्रं निर्मितं भवति यथा च काकभुशुंडेराश्रमस्यासीत्प्रभावो यत् '**व्यापहिं तहँ न अविद्या, जोजन एक प्रजंत।**' तत्रत्यं वायुमण्डलं शुद्धं शान्तञ्च भवति। तस्य परिधौ योऽपि प्राप्नोति, तस्मिन्नपि योगस्य संस्काराणां सूत्रपातो भवति।

'**वैरत्यागः**' संसारे वैरिणो व्यापाद्यन्ते, 'अहिंसायाम्' त्यज्यन्ते। के सन्ति वैरिणः? मनुष्योऽनिच्छन्नपि कस्य प्रेरणया पापाचरणङ्करोति? श्रीकृष्णो ब्रूते-

**काम एष क्रोध एष रजोगुण समुद्भवः।**

**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।। ( ३/३७, गीता )**

अर्जुन! कामक्रोधावग्निवत् कदापि तृप्तिं न प्राप्तिवन्तौ दुर्जयौ वैरिणौ स्तः, ज्ञानविज्ञानयोर्विनाशकाविमौ सतत् वैरिणौ स्तः। महापुरुषाणां सन्निधावेतत्वैरिवर्गस्य भवत्यन्तः।

'**परम धरम श्रुति विदित अहिंसा**' सुरतस्यार्थात् मनसो दृष्टिर्या वायुवेगादपि तीव्र गतिशीलास्ति, साऽपि स्थिरतां व्रजेत्। अनेन निरोधेन सह तिरोहिता या वर्त्तते सत्ता, सोऽस्ति कल्याण तत्वद्रष्टा–आत्मा। तस्य संस्पर्शेन सह यस्य धर्मस्य धारणमासीदावश्यक तत्कार्यं परिपूर्णं जातम्। इयमस्त्यहिंसायाः पराकाष्ठा। एतादृशमहापुरुषाणां दृष्टिपात समकालमेव जनाः परिहायहिंसामार्गमहिंसामार्गानुगामिनो भवन्ति, यथा वाल्मिक्यङ्गुलिमालादयः। पूज्यगुरुदेव भगवतः सान्निध्येऽनुसुइया क्षेत्रवास्तव्यानां दस्यूनां मनोवृत्तिः परिवर्त्तिता, ते कर्त्तुमारेभिरे भजनम्। सत्यमस्त्यपरो यमः। तस्य पराकाष्ठा कियत् यावत्?

**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।।३६।।**

सत्यस्य स्थितौ जातायां दृढतरायां प्राप्यते क्रियाफलस्याश्रयः। सत्यन्तु केवलं द्रष्टात्मास्ति। सृष्टावपरं यत्किञ्चिदस्ति तन्नश्वरम्। अस्मिनेकमात्रसत्ये परमात्मनि सम्यक्प्रकारेणस्थितिः प्राप्ता, श्रद्धाकेन्द्रिता बभूव, समर्पणमभूत् सफलम् साधना संवृत्ता गतिशीलातर्हि '**क्रियाफलाश्रयत्वम्**'– क्रियायाः फलं परमात्मास्ति। तस्य परब्रह्म परमात्मनो मिलत्याश्रयः। अर्थाद् भगवान् सविधि योगक्षेमं कर्त्तुं लगति।

अस्तेयस्तृतीयोभेदो यमस्य तत् पश्यतु–

**अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।।३७।।**

अधिकांशतश्चौर्य कर्मणोऽभाव एवास्तेयः समुच्यते। चौर्यवृत्तेरभावसमकालमेव रत्नैः प्रकटितेन भवितव्यम्। भारतीय शास्त्रेषु मकरवेश्ममन्थनाच्चतुर्दश रत्नानां प्राप्तेरस्त्युल्लेखः –

**श्री मणि रम्भा वारुणी, अमिय शंख गजराज।**

**कल्पद्रुम शशि धेनु धनु, धनवन्तरि विष बाजि।।**

कल्प्यतामचौर्यवृत्तिदृढायिता। योगिनः पुरतो रम्भावारुण्योरकस्मात् सङ्गमः सहैव दृष्टिपथायितस्तर्हि सः किं करिष्यति? तस्यैकान्तस्थेशान्ते भजनेऽयं भीषणो विघ्नः। रम्भा विश्वामित्रस्य समक्षं गतवती तदाभूत्तस्य पतनम्। अतोऽस्तेयस्य रत्नानाञ्चायं सन्दर्भो नसंगच्छते।

भगवन्तं महावीरमेको भूपालः पप्रच्छ, भगवन्! सद्गृहस्थाश्रमे निवसतामस्माकं कल्याणं कथं भवेत्? तेनोक्तम्, राजन्! त्रिरत्नं धारय "**श्रद्धा ज्ञान चरित्राणि।**" तीर्थंकरेऽर्थात् तीर्थस्वरूपे महापुरुषे सद्गुरौ श्रद्धां निधेहि, तस्मात् साधनविधिं जानीहि तञ्चाचरणेऽवतारय। एतत्त्रिरत्नमस्ति।

पूज्यगुरुदेव कथयतिस्म, सद्गुरोः पुरो यद् हृदये स्यात्तदेव जिह्वायां भवेत्। हृदयेऽन्यं जिह्वायामन्यञ्च– एतादृशः साधकः कदापि न भवति सफलः। भगवतः किञ्चिदपि तिरोहयितुं न शक्यः– "**सबके उर अंतर बसहु, जानहु भाव कुभाव।**" (रामचरित मानस, अयोध्याकाण्ड, २५७ दोहा) ईश्वरः सर्वस्य हृदये निवसति, सो भावं कुभावं सर्वं जानाति। संकल्पोदयः पश्चाद्भवति भगवान् पूर्वमेवसूचयति यत् कदा विजातीयाः सङ्कल्पाः सन्त्यागन्तारः। वितर्को न प्रादुर्भूतः, परिस्थितिस्तथादुर्घटनानोपस्थिता ततः पूर्वं भगवान् सङ्केतयति, साधकस्त्वरितं भवति सावधानः। अस्तु भगवतो न किमपि तिरोहितम्, पुनरपि जीवस्यास्तिस्वभावः, किञ्चिन्नकिंचित् कपटः शिष्यते सदैव। यदाऽयं समाप्तो भवति वञ्चनाक्रमः – '**नवम सरल सब सन छल हीना**' तदा साधनायां सकल रत्नविवेकः सहायको भवति। वैराग्यम्, शमः, दमश्चेत्यादि साधनावश्यकतानुसारेण योगिनः समक्ष भवन्ति प्रकटिताः।

सम्प्रति ब्रह्मचर्यस्य परिणामचर्चा–

**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।।३८।।**

ब्रह्मचर्यस्य स्थितौ जातायां प्रौढायां सामर्थ्यस्य भवति लाभः। जननेन्द्रिय मात्रस्य संयमो नास्ति ब्रह्मचर्यम्। भगवतः श्रीकृष्णस्यानुसारेण हठपूर्वकमिन्द्रिय निरोधं कर्त्ताविन्तु मनसा विषयचिन्तकोऽस्ति दम्भाचाररतः। स्वकीयपूर्व जन्मनः संस्मरणं श्रावयन् कथयति स्म पूज्यगुरुदेवः, यद्गतजन्मनि तस्य निवृत्तिरासीत् सुसम्भवा, किन्तु कामनायुगलभूत् प्राप्तिवारकम्, यल्लोके विवाहः किमस्ति

पीतगाञ्जाश्च साधका मत्ता सन्तो भजन्ते, कियानानन्दोऽत्र? उक्त पूर्व जन्मनि सत्यामपीच्छायां न कृतवान् विवाहं न च गांजाख्य धूम्रपेय वस्तुनः कदापि कृतवान् स्पर्शम्। किन्तु मनस्यादेकं कुतूहलम्, एतस्माज्जन्मग्रहणं जातमनिवार्यम्। भगवता स्वल्पे वयस्येव विवाहो कारितः सर्वं सांसारिकं रहस्यं दर्शयित्वा द्वित्रावारं मनस्याघातं निरुप्य साधुः सम्पादितः। प्राप्ताकाशवाणी यदस्मिन् मन्दिरे वर्त्तते तव गुरुदेवः। तस्य गुरोः सान्निध्येऽल्पकालान्तर एव साधना जागृता जाता। भगवान् रथीत्वं स्वीचकार कर्त्तुमारभत् योगक्षेमम्। भजनकरणाय उत्थानोपवेशजागरणञ्च भगवद्गुरोः प्रेरणया सञ्चलितुं ललाग। भोजनं नियन्त्रितं भगवता यदिदं भुङ्क्ष्व नेदम्। जागरणं शयनं सन्तुलितं संवृत्तम्। सर्वं दायित्व स्वकरे दधार। यथा कश्चित् भूगर्तस्थं धनं प्राप्नुयात् तथैव योगविभूतयः प्राप्तुमलगन् रत्नानि प्रकटितान्यभूवन्। तस्मिन् पूर्वजन्मन्यपि पूज्यश्री महाराजो ब्रह्मचार्यासीत्, परिपक्वसंयमोऽभवत्, पुनरपि जग्राह जन्म।

ब्रह्माचरणेन भवति कुतर्क शमनम्, मनसासहितेन्द्रियं समाहृत्य ब्रह्मचिन्तने संल्लग्नतया। '**ब्रह्माचरति स ब्रह्मचारी।**' नेत्रेऽपरं न किमपि पश्येताम्, कर्णावपरं न किमपि श्रुणुताम्, कर्णाभ्यां विषयोत्तेजकं वचः श्रुत्वा नेत्राभ्यामुत्तेजकं दृश्यमवलोक्याऽपि स्वसाधनासंलग्नतायाः संरक्षणं सर्पस्य मुखेऽङ्गुलिं निवेश्य सर्पदंशतो निजरक्षणवदस्ति। ब्रह्माचरणेन, सतत् चिन्तनेन निखिलेन्द्रियसंयमः सिध्यति। तेनैव ब्रह्मचर्यस्य विशुद्धा परिपक्वाचावस्था भवति सुलभा।

ब्रह्मचर्ये दृढ़स्थितौ सम्पन्नायाम् '**वीर्यलाभः**'– सामर्थ्यस्य प्राप्तिर्भवति, आत्मनो विलुप्तः पराक्रमः प्रकटयितुं लगति। यन्मनो भजने हठपूर्वकं नियोज्यते स्म, तन्मनसि सहजरूपेण भजितुं सामर्थ्यमायाति। समागतेऽपि विघ्नबाहुल्येऽसौ न पृष्ठं व्रजति। मीरा न गतवती पृष्ठोन्मुखम्, गरलस्य पात्रम्, शूलस्य शय्याऽपि च तां विचालयितुं शेकतुः। प्रह्लादं दग्धुं प्रयासो विहितः, सागरे पातितः सः, गजैः परिमर्दायितोऽसौविघ्नाः समायाता निर्गताश्च। एव साधके स्वध्येयोपरि प्रौढ्याविचलितु सामर्थ्यं समाव्रजति। अधुना प्रयासपूर्वकं तदर्थं नापेक्षते मनोयोगः।

**विशेषः**– सकलेन्द्रिय संयमे सम्पन्नेऽपि ब्रह्मचर्यस्य प्रणोऽनिवार्यमस्ति। पूज्य गुरुदेवाः कथयन्ति स्म यद् गृहस्थैरस्मिन् संयमे जातायां त्रुटौ भगवान्

क्षमते, किन्तु साधुवृत्तिधारिभिरेवं च्यवने न क्षमते कदापि परमेश्वरः। इत्थं पतितसाधकार्थं शरीरत्याग एवैकमात्रं प्रायाश्चितमास्ति। पश्यन्त्वीदानीमपरिग्रहम्–

**अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।।३९।।**

अपरिग्रहस्यावस्थायाः प्रोढीभूते '**जन्मकथन्तासम्बोधः**'– पूर्वजन्मानि कथमभूवन्, अस्य ज्ञानं सम्यग् रीत्या भवति। केचन जना मन्वते यदावश्यकतातिरिक्त वस्तूनां संग्रहस्याकरणमथवा कस्यापि वस्तुनः सहजासंग्रहः कथ्यतेऽपरिग्रहः। वनाधिवासिनः प्रमुखादि वासिनो जनाः प्रातः स्वजीविकोपार्जना निःसरन्ति। आदिनं यत् किञ्चिदर्जयन्ति तेनैव यथा कथञ्चित् परिपूरयन्त्युदरम्। तेषा गृहाणि भवन्त्यनावृत्तकपाटाः। भूमौशयनम्। द्वित्राणि दन्तुराणि व्यस्तान्यलमुनियमस्य दृश्यन्ते पात्राणि। पूर्वजन्मनस्तत्र न कोऽपि प्रसङ्गः। श्वः कथं व्यत्येष्यति दिनमित्यस्यापि नास्ति ज्ञानम्। सम्राजःस्थितौ विद्यमानोऽपि जनकः परिग्रहपराङ्मुखो बभूव।

अपरिग्रहस्य सम्बन्धो तावान् वस्तुसंग्रहेण नास्ति यथा चिन्तनेन। चिन्तनं वस्तुसंग्रहस्येतावदधिकं प्रसज्येत् येन साधकद्वारा नवीनसंस्काराणां संग्रहो विरमेत्। नवीन संस्काराणां संग्रहस्तु जातो निवारितः, पुनरपि प्राचीन जन्मान्तरीय संस्कार प्रभावतो वैकल्यं भवति सुस्थिरम्, येन सदसत् सङ्कल्पाः समुत्तिष्ठन्ति। तस्यामवस्थायां साधकेन परिज्ञायते यत् पूर्वजन्मनः कति संस्काराः शेषाः सन्ति। तेषां निदानं तथा कियत् कालान्तरे तेभ्यो निवृत्तिर्भविष्यति, अस्य ज्ञानभि सम्भवति।

अनेन प्रकारेण यमे स्थितेः प्रकारं वर्णयित्वा महर्षिर्नियमाचरणस्य फलमाख्याति। नियमाः पञ्च सन्ति– शौचः, सन्तोषः, तपः, स्वाध्यायः, ईश्वर–प्रणिधानञ्च। एषु शौचः प्रथमोऽस्ति–

**शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः।।४०।।**

शौचस्य परिपालनेन स्वाङ्गे वैराग्यं परसंसर्गमकर्त्तुमिच्छा प्रबलायते। शौचस्यार्थः सज्जीकरणं केशवेशभूषा प्रसाधनं नास्ति। उक्त सज्जया शरीराङ्गानि प्रति वैराग्यभावो नोदयति प्रत्युच्छरीरे ममत्वभावमेधयति। केचन् जना प्रतिवासरमनेकदा स्नानस्य शौच संज्ञा ददुः। किन्तु सत्पुरुषाः साधवः कायिक

स्वच्छतां न बहुमन्यन्ते– '**पानी ले ले साबुन ले ले, मल मल काया धोयी। अन्तर घट का दाग न छूटे, निर्मल कैसे होयी।।**' भजन मनसा भवति। वस्तुत इयं मानसिक्यस्ति क्रिया। शरीरस्यालङ्करेणसज्जया न शौचस्य किमपि प्रयोजनम्। मम पूज्य गुरुदादा षट्षट् मासपर्यन्तमेकैक वर्षं यावत् न स्नान्ति स्म। सदा श्वासे सुरतं विनियोज्योन्मुक्त चिन्ताप्रविराजन्ते स्म। कश्चित् पृच्छति स्म चेत्तदा समुदीरयन्ति स्म गुरवः– यदि ऋते स्नानं न किमपि कष्टम् तर्हि मज्जने मार्जने व्यर्थ समयात्ययं किमर्थ करवाणि। पुनरप्यनुमानेन दर्शनान्तरं न भवतिस्मेवभासो यदिमे न सन्त्यकृस्नानाः। शौचस्यार्थोऽस्ति मनःशुद्धिः यस्य संरक्षणेनान्तःकरणस्य पावनता सम्पन्ने सति मनसि, दृष्टौ, श्रवणे, वाचीत्यादौ पवित्रता सम्प्रसरेत्। शरीरस्य भानमेव नानुभवेत्, सुरतं चिन्तनसंश्लिष्टा जायेत्। एव स्वाङ्गे सम्पद्यते विरक्तिश्च 'परैः असंसर्गः' परेषां संसर्गात् पृथग् स्थातुं सामर्थ्यं अन्वाव्रजति। पूज्य महाराजाः यदा चिन्तने समुपविशन्तिस्म, तत्रापरः कश्चिदेत्योपविशेत् तदा ब्रुवते स्म पूज्य गुरुचरणाः यन्मनो वाञ्छति स्म कियच्छ्रीघ्रमयमितः प्रसरेत्। इतिभावोर्जया क्रमशो दूरायिता जनवा। अन्येभ्योऽसङ्ग प्रवृत्तिर्भवति जागृता। समुत्पद्यते स्वाङ्गे वैराग्यम्। स्नानं जातं न वेत्यस्य भानं विलुप्यते। शौचेन कासाञ्चिदपरासां क्षमतानां भवति विकासः –

**सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च।।४१।।**

एतदतिरिक्तान्तकरणशुद्धिश्च, मनः प्रसादनत्वम्, चित्तस्यैकाग्रता, समनसेन्द्रियाणां वशीभवनम् तथात्मसाक्षात्कारस्य समागच्छति योग्यता। अन्तःकरणं परं प्रशान्तं चिन्तने च प्रवाहितं भवितुं योग्यतावान् वोभविति। चिन्तने संवीक्ष्यानुरक्तिं मनसि समेधते प्रसन्नता। समायात्येकाग्रता चित्ते, निर्मलता चान्तःकरणे; यतो हि प्रक्षालनमेवान्तःकरणस्य शौचोऽस्ति।

सम्प्रत्यपरनियमं संतोषं विदाङ्करोतु–

**संतोषादनुत्तमसुखलाभः।।४२।।**

सन्तोषेण सर्वोत्तमसुखलाभो सम्पद्यते, यस्मादुत्तमं नास्ति किमपि सुखम्। एवं सुखं मात्र परमात्मन्येवास्ति। सन्तोषस्य पराकाष्ठायां तस्मात् परमात्मनस्तोषं मिलितुं प्रारभते। ''**जो आनन्द सिंधु सुख राशी। सीकर ते त्रैलोक सुपासी।।**'' भगवानस्त्यानन्दस्याब्धिः, राशिः सुखस्य, अनेनानन्दसिन्धोरेके

नैवविन्दुना संतृप्यति लोकत्रयम्। परिस्थितिभिः संविदा करणं नास्ति संतोषः। संतोषः कामनां समूलं नाशयति, यतो हि समस्य- तस्य परमात्मनस्तोषोव्यमिलत्तदा कस्य कामनां विदधामि। नाग्रेकाऽपि सत्ता यदर्थं स्पृहा भवेत्। सम्प्रति सर्वोपरि प्रभावं तपसः समुच्यते-

**कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः।।४३।।**

तपसोऽनुष्ठानेन यदा भवत्यशुद्धेनशिस्तर्हि ''**कायेन्द्रिय सिद्धिः**''- शरीरस्येन्द्रियाणाञ्च भवति विशुद्धिः। तस्मिन् समये भवान् यथाकाममिन्द्रियाणिनियोक्तुं शक्नोति, शीते ग्रीष्मे (उष्णे) रागद्वेषविनिर्मुक्ते यस्मिन्नपि कस्मिन् वातावरणे मनः शिष्यतां व्रजति। सामान्य जीवाः '**जहँ जहँ इन्द्रिन्ह तान्यो**' इन्द्रियप्रवाहे प्रवहन्ति। भगवता श्रीकृष्णेन गीतायां प्रस्फुटं सनिदशनञ्च प्रत्यपादि यत् स्वैरं विषयरसास्वादे विचरता येनेन्द्रियेण सह मानवस्य मन लगति, तदेकमेवेन्द्रियमयुक्त मानवस्य मनसोऽपहरणं विधाय तथैव नयति पातयति च यथा वात्या नावं लक्ष्यादपवार्यागाधे जले निमज्जयति। अत आदौ संयम्येन्द्रियाणि मनः साधनायां संयोजय। मनसा सहितेन्द्रियाणि स्वेष्टानुरूपं तापनं तपः समुच्यते। अधुना स्वाध्यायस्य स्वरूपमवलोकयतु-

**स्वाध्यायादिष्टदेवतासम्प्रयोगः।।४४।।**

स्वाध्यायस्यास्त्यर्थः स्वस्याध्ययनम्। मया साधने कियान् समयो व्ययितव्यः कियान् न व्यत्येमि- अस्य निरीक्षणं विदधानोऽनवरतं सचेतावस्थायां विद्यमानः सावबोधं साधनारत वर्त्तनेन '**इष्ट देवता सम्प्रयोगः**'- योगावस्था भवत्योतप्रोतेष्टदेवेन। पश्यत्विष्टदेवस्य पराकाष्ठाम्-

**समाधिसिद्धिरीश्वरप्रणिधानात्।।४५।।**

ईश्वरस्यशरणानुसरणम्, तथा मनसा, वाचा, कर्मणा, तम्प्रति समर्पणम्, तस्य करकमलस्य यन्त्रता स्वीकरणम्, इत्युक्त प्रकारेण समाधि सिद्ध्यति। ईश्वरोपरिनिर्भराणां साधकानां योगक्षेमं भगवान् स्वयमेव सन्निरीक्षते। एतेन हेलया त्वरया च साधनस्य परिपूर्णता स्वाभाविकी ज्ञेया। अस्यां स्थितौ '**समाधि**' अर्थात् समेनार्थादादितत्वेश्वरेण सह समत्व प्राप्तौ झटिति सफलता लभ्यते। साम्प्रतमासनस्वरूपं द्रष्टव्यम्-

**स्थिरसुखमासनम्।।४६।।**

सुखपूर्वकं निश्चलोपवेशनस्यास्ति नामासनम्। इदमासनं कथं सिद्धिमाप्नोति? तदुच्यते—

**प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्।।४७।।**

पूर्वोक्तासनं प्रयत्नशैथिल्येऽनन्ते परमात्मनि च मनोनियोगे सिद्धो भवति। यदि शरीरस्योपवेशनमेवासन नाम्ना ज्ञाये तर्ह्यनन्ते परमात्मनि मनः संलग्नतायाः किम्प्रयोजनमासीत्?

नैकेविभूतयः समभवनेतादृशाः, यथा महर्षिरष्टावक्रः, गुरोर्महाराजस्य गुरुः सत्संगी महाराजः, यस्य पादाः वक्राविरूपाश्चासन्, तेषां कृते मुद्रासनयोः प्रश्न एव नायाति। आसनमुद्राभ्यां विनैवासौ स्वयुगे सर्वश्रेष्ठ महापुरुषेषु प्राप्तप्रतिष्ठ आसीत्। '**प्रयत्नशैथिल्य**' अर्थात् यमे, नियमे, तपसि, स्वाध्यायादौ चलति यः प्रयत्नस्तस्मिन् प्रयत्ने समावेशेच्छैथिल्यम्, उक्त यमादीनां सहजरूपेण स्वाभाविकं भवितुमारभेत्, एकं वारं यत्र मनः नियुक्तं तन्मनस्तत्रभवेत् सुशान्त प्रवाहितम्। एवं प्रकारेणैकस्मिन् परमात्मनि सुचारुरूपेण संल्लगिते मनसि सिद्ध्यत्यासनम्। अतोहीदमासनं मनसोऽस्ति। भजनार्थं शरीरस्यैका निर्धारिता मुद्रास्ति, यस्यां शरीरं, शिरः, मेरुदण्डः, गलः, एक ऋजु रेखायां भवेत्। नेत्रावर्धोन्मीलितौ, दृष्टिर्नासग्रेति परमावश्यकम् किन्तु महर्षिः पतञ्जलिर्मनसः शान्तरूपेण स्थिरतां स्वीचकारासनम्। '**आसन मारे क्या भया, मुई न मन की आस। ज्यों कोल्हू के बैल को, घर ही कोस पचास।।**' मनसि सम्भाव्यमानाः सन्त्याशाशृङ्खवाः, या मनः स्थिरं स्थातुं न जहति। आसनस्य प्रभावः किं भवति?—

**ततो द्वन्द्वानभिघातः।।४८।।**

आसनसिद्धेसति न भवति द्वन्द्वाभिघातः। रागद्वेषयोः, सदसतोरुद्वेगो द्वन्द्वोऽस्ति, यो मनः सन्देहे नयति। प्रकृति विरोधिनः पक्षतोऽपि तस्य हृदये न भवति कोऽपि प्रभावः। तस्मिन् समये तस्य कीदृशी भवत्यवस्था?—

**तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।।४९।।**

तस्यासनस्य सिद्धौ जातायां श्वासप्रश्वासयोश्च गत्यवरोधः प्राणायामः कथ्यते। प्राणायामः पृथग् रूपेणनास्ति काचित् क्रिया। अभ्यस्त तपसः, स्वाध्यायस्य ईश्वरप्रणिधानस्य, साधनं क्रियते अहिंसया, सत्येन, अस्तेयेन,

ब्रह्मचर्येण, अपरिग्रहेण च। उक्त विषयेषु प्राप्ते सहजभावे सिद्ध्यत्यासनम्। सिद्धे चासने प्राणायामः सिद्ध्यति। तदनु प्राणस्य व्यापारोपरि विरामः संवृत्तः। एवं प्रकारेणेयं स्थितिः परिणामजन्याऽस्ति। इदं यमनियमयोः प्रतिपालनस्य प्रतिफलमस्ति।

श्वासो यो गृह्यते, श्वासो यो निःसार्यते (प्राचीन साहित्ये क्वचित् क्वचिदेतद् विपरीतो लेखो लभ्यते, यत्र यस्य त्यागो भवत्सौ प्राणस्तथा यस्य त्यागः क्रियते स प्रश्वासः, इत्यर्थः कृतो विद्यते, किन्तु बहुसंख्याका मनीषिणः श्वासमथवाप्राणं तं कथयन्ति यद् गृह्यते)। आत्मोत्कर्षार्थं साधको विद्यामादत्ते विद्यात्मनोश्चापकर्ष कारिकां त्यजत्यविद्याम्। इत्यनयोर्गतौ विरामलगनम्, यदा त्यागग्रहणकारिण्यो वृत्तयो शान्ता भवेयुः, श्वासप्रश्वासयोर्गतिरवरुद्धा जायेत्, अस्यैव नाम प्राणायामोऽस्ति।

सिद्धे जाते सत्यासने चित्तवृत्ति शान्तधारया प्रवाहिता भवति। नाभ्यन्तरतः कश्चित् सङ्कल्पः प्रस्फुरति, न वाह्य वायुमण्डलीयः कोऽपि सङ्कल्पो विशत्याभ्यन्तरम्। इदमेवास्ति कारणं यदस्यामवस्थायां चित्तं शान्तं स्थिरञ्च जायते। एतदेवास्ति श्वासप्रश्वासयो गति विरामता। यद्यान्तारिका बाह्यवायुमण्डलीयाः संकल्पाः संघर्षन्ते, तदा सुस्पष्टमस्ति यदिदानीं यावन्नासनसिद्धिर्जाता। यतो सिद्धे सत्यासने सङ्कल्पाः शान्ता भवन्ति। प्राणानां व्यापारो विरमति।

अन्तकरणमेव प्राणः समुच्यते। भगवतः श्रीकृष्णस्यानुसारेण, '**सर्वाणीन्द्रिय कर्माणि प्राण कर्माणि चापरे।**' सकलेन्द्रिय कर्मणः, '**इन्द्रिय कर्माणि**'– इन्द्रियाणि कर्म कुर्वन्ति। '**प्राण कर्माणि**'– प्राणाः कर्म कुर्वन्ति। बाह्ये कर्म कुवन्तीन्द्रियाणि, आभ्यन्तरे च प्राणाः कर्मकर्त्तारः। बाह्याभ्यन्तरीययो द्विप्रकारकयोः कर्मणोरीश्वर निर्देशेन प्रकाशितात्मानि संयमयोगाग्नौ हवनं योगः प्रकथ्यते।

सारांशतोऽभ्यासोयमनियमयोः क्रियते। एतेन सिद्धिर्भवत्यासनस्य। अस्यैवोन्नतः स्तरोऽस्ति प्राणायामः। उक्त प्राणायामस्यावस्था कथमागमिष्यति– अत उपरि कथ्यते–

**बाह्याभ्यंतरस्तम्भवृत्तिः देशकालसंख्याभिः**
**परिदृष्टो दीर्घसूक्ष्मः।।५०।।**

बाह्यवृत्तेः, आभ्यन्तरवृत्तेः स्तम्भवृत्तेश्च त्रिधा भेदैः, देशकालसंख्यामाध्यमेन सुचारुरूपेणावलोकनेन प्राणायामो दीर्घः सूक्ष्मश्च प्रतिपद्यते। बाह्यवृत्तिः प्रकृत्युन्मुखं नयति, याऽविद्यया प्रभाविता क्लिष्टा वृत्तिरस्ति। आभ्यन्तरवृत्तिः योगसाधने प्रेरयति, परमात्मोन्मुखं चाग्रेसारयति। तृतीयावृत्तिरस्ति– स्तम्भवृत्तिः, यस्यां तु न भवति बाह्यचिन्तनं नाभ्यन्तरं चिन्तनम्, अत इयमस्ति– स्थिरावृत्तिः। मनस्तु यदा बाह्यवृत्तौ प्राविशत्तदाकामक्रोधरागद्वेषादयः कस्मिन् देशे जग्मुः? कियत्कालं यावत्तत्र तस्थुः? संख्यामाध्यमेन स समवलोकनीयः। मनश्चेदाभ्यन्तरवृत्तावगात्तर्हि तन्मनो विवेकस्य विश्लेषणमुद्वा वैराग्यस्य विश्लेषणं प्रकुरुते? श्रद्धाऽथवा समर्पणं कस्मिन्देशे करोति चिन्तनम्? कियत्कालं यावत्तत्र स्थितः? ततः परावर्त्य स्तम्भवृतौ तं नियोजयतेत्। बाह्यवृत्तितो मनोऽपवार्याभ्यन्तरायां स्तम्भवृत्तौ च स्थिरणीयम्। आभ्यन्तरवृत्तावपितु सङ्कल्पमेव करोति। इत्थं स्तम्भवृत्तो सावधानमवलोकनेन प्राणायामः दीर्घः, सहजः लम्बायमानश्च भवति। अस्मिन् प्राणायामे श्वासेन सह कुटिलता न कर्तव्या, वृत्तिः द्रष्टव्या। प्राणायामस्यान्तिमं स्वरूपं जानातु–

**बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः।।५१।।**

बाह्याभ्यन्तरयोर्विषयाणां निरुद्धता, परित्यक्तता चतुर्थः प्राणायामोऽस्ति। बाह्यविजातीयसङ्कल्पाः नोत्तिष्ठेयुः न चाभ्यन्तराऽक्लिष्टदैवीसम्पदेव सङ्कल्पाः प्रभवेयुः। सुरतोऽस्ति सहजप्रवाहितः। इयं प्राणायामस्य चतुर्थ सर्वोन्नताऽवस्थास्ति। अयमेवास्ति शुद्धः प्राणायामः, यस्मिन् प्राणानां व्यापारोपरि प्रभवति विरामः।

प्राणायामो वृत्तीनामस्ति निरोधो न तु श्वासस्य। श्वासस्तु जीवनीशक्तिरस्ति शरीरस्य। यथाक्षिश्रुतिघ्राणाः सन्ति क्रियाशीलास्तथैव श्वासः शरीरायवितरति शक्तिः। श्वासस्यावरोधनं न्यूनीकरणं वर्धनञ्च नास्ति। श्वासेन सह सदसत् सङ्कल्पा अपि वर्तन्ते मिश्रिताः। उभयप्रकारकसङ्कल्पानामग्रहीतुं सामर्थ्यमस्ति प्राणायामः।

प्राणायामे श्वासः किञ्चिदपि न कर्तुमर्हति, केवलं विषयेभ्योऽस्ति चित्तस्यापसारणम्। श्वास्तु शिशुषु शिशुमात्रया, वृद्धेषु वृद्धमात्रया प्रौढेषु च प्रौढमात्रया च तथा तेषामायुषोऽनुपातेन चलत्येव। एषु कौटिल्येन रोगा भवितुं शक्नुवन्ति। चित्तं बाह्याभ्यन्तरोभय वृत्तितः स्तम्भवृत्तौ सुस्थिरणीयम्। विषयाणां

शान्तभवनम्, चित्तस्य शान्तः प्रवाहितः स्थिरश्च भूत्वा प्रवर्तनमस्ति प्राणायामः। अनेन को लाभः?–

**ततः क्षीयते प्रकाशावरणम्।।५२।।**

प्राणायामस्य साधनेन बाह्याभ्यन्तरविषयाः शान्ताः बभूवुः। प्राणस्य व्यापारः शान्तः प्रवाहितोऽभूत्, प्राणानां व्यापारेऽलगद्विरामः, प्राणाः एकस्मिनायामे स्थिरा अभूवन्। अनेन प्राणायामेन ज्योतिर्मयस्य परमात्मनः साधकस्य चान्तराले बाह्याभ्यन्तरयोः वृत्तीनां यदावरणमासीत्तत् क्षीणायते। वर्तते तु तदवश्वमेव किन्तु जायते निष्प्राणः। अनेन प्राणायामेनस्त्येकोऽपरो लाभोऽपि–

**धारणासु च योग्यता मनसः।।५३।।**

प्राणायामेन मनसि धारणकर्तुं योग्यता समायाति। सम्प्रति भवान् स्वकीयध्याने रूपधारणकरणस्य प्रयासङ्करोति तथा मनो नाम्नि नियुक्ति वा किन्तु क्षणानन्तरमेवानुभूयते यन्नामरूपे मनसः पलायेते। मनसि धारणकर्तुं क्षमताया अभावः प्राप्यते किन्तु परिपक्वे प्राणायामे सिद्धे मनसि धारणविधानस्य योग्यता समायाति, येन नाम्निरूपे साधनायाश्च सर्वेष्वङ्गेषु मनसः संयमः सहजायते। अस्मादुन्नतं स्तरमस्ति प्रत्याहारः –

**स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार
इवेन्द्रियाणां प्रत्याहारः।।५४।।**

यदेन्द्रियाणि स्वविषयसम्बन्धेभ्यः विरहितानि भूत्वा चित्तस्य स्वरूपे तदाकाराणीव भवन्ति तस्यैव नामास्ति प्रत्याहारः। अस्मात् को लाभः? अत्र विषये कथ्यते–

**ततः परमा वश्यतेन्द्रियाणाम्।।५५।।**

उक्ततेन प्रत्याहारेणेन्द्रियाणामुपरि पूर्णविजयः प्राप्यते। अतः प्रत्याहारस्याभ्यासस्तदानीं यावद्भवति करणीयो यावदिन्द्रियाणि सम्यक्रूपेण न भवेयुः वशवर्तीभि। यदेन्द्रियाणि सुष्ठुप्रकारेण वशङ्गतानि भवन्ति, तेषु सदसत् सङ्कल्पाः नोदयन्ति। एतदेव जितेन्द्रिय पुरुषस्यास्ति लक्षणम्।

अनेन प्रकारेण द्वितीयः पादः साधनापादः सम्पन्नो भवत्यत्रैव।

**निष्कर्षः-**

साधनपादे महर्षिणा समुपदिष्टं यत् साधनस्यारम्भः कुतो भवति? एकेश्वरं प्रति समर्पणम्, मनसासहितेन्द्रियाणीष्टानुरूपं तापने (तपसि) स्वाध्याये च स्वस्याध्ययनस्य वृत्तौ योगविधेः कियद्धारणं सम्पन्नं कियती चावशिष्टाः त्रुटिः, अनेन प्रकारेणाधीयानेनाग्रेसरत्वलाभेन योगक्रियायाः प्रारम्भो भवति।

अस्याः योगक्रियायाः प्रभावेण क्लेशा भवन्ति सरलाः क्षीणाश्च, 'तनुः' बलहीना भवन्ति समाधेश्च भावना भवति परिपुष्टा। ये क्लेशाः क्षीणायन्ते तेषां नामानि सन्ति- अविद्या, अस्मिता, रागः, द्वेषोऽभिनिवेशश्च। इमे सन्ति पञ्चक्लेशाः। इमे पञ्चक्लेशाः यदा कार्यं न कुर्वन्ति तर्हि प्रसुप्ताः, कदाचित् 'तनवः'- बलहीना, कदाचित् 'विच्छिन्ना'- यथा सन्त्येव नहि कदाचिच्चोदारावस्थायां निवसन्ति। एकस्य क्लेशस्योदारे सत्यपर विच्छिन्नवत् प्रतीयते यदा तु सोऽस्ति तद्वत्। एतेषां निखिलक्लेशानामस्त्याधारोऽविद्या। अनित्ये नित्यस्य, अपवित्रे पवित्रस्य, दुःखे सुखस्य, अनात्मन्यात्मनो मान्यताऽर्थादसत्ये सत्यस्य प्रतीतिरस्त्यविद्या। प्रकृतिपुरुषयोः, दृक्शक्तिदर्शनशक्तयोरेकवत् प्रतीतिरस्त्यस्मिता। रामचरितमानसे लिखितमस्ति-

**जड़ चेतनहिं ग्रन्थि परि गई। जदपि मृषा छूटत कठिनई।।**

सुखस्य प्रतीतिमनुगन्ता रागोऽस्ति क्लेशः। यत्र सुखं प्राप, रागो भविष्यति। दुःखस्य प्रतीतिमनुगन्ता क्लेषोऽस्ति द्वेषः। यस्मात् कस्माश्चिद्वस्तुनः दुःखं भविष्यति तस्माद् भविष्यत्यवश्यं द्वेषः। यः स्वभावतः प्रचलत् समागच्छति, यो मूढ़ानामिव विवेकशीलपुरुषेष्वपि विद्यमानं समुपलभ्यते। सोऽभिनिवेशोऽर्थात् पूर्वनिवासं प्रति ममता यन्नास्त्यस्माकं निवासस्थानं किन्तु तदस्माभिः स्वकीयं स्वीकृतमस्ति- क्लेशोऽयमस्त्यन्तिमः। प्रकृतेरन्तर्गतं यद्यपि नास्त्यस्माकीनं जीवनं पुनरप्यनादिकालतस्तस्मिन् निवासकारणात् तं प्रति रागोऽस्त्यभिनिवेशः। जीवस्य शुद्धो निवासस्तु परमात्मैवास्ति। तपसा, स्वाध्यायेनेश्वरप्रणिधानेन च बलहीनां सूक्ष्माञ्चावस्थां गताः क्लेशा इमे नाशनीयाः।

क्लेशसंयुक्ता वृत्तयो ध्यानस्य माध्यमेन शान्ता भवन्ति। एतेषां क्लेशानां विनाशमावश्यकमस्ति, यतोहीति सर्वसंस्काराणां परिणामाः जन्म, पुनर्जन्म,

आयुः, भोगाश्च भवन्तो वर्तन्ते। इमे संस्काराः पुण्यपापाभ्यां प्रभवकारणात् हर्षशोकरूपं फलं ददन्ते। ये संस्काराः हर्षरूपं फलं जनयन्ति, तेऽपि सन्त्येव दुःखरूपा, जन्म दास्यन्ति। गुणाः सन्ति परिवर्तनशीलाः। अस्मिन् परिवर्तनक्रमे सात्विकगुणस्तामसीगुणे यदैव परिवर्ततो भविष्यति, तदायमाह्लादः शोके परिणतो भविष्यति। अतः प्रायः सर्वाणि फलानि विवेकशीलपुरुषेभ्यः दुःखरूपाणि सन्ति। इमे त्यक्तव्याः। यानि दुःखान्यद्यावधि न सन्त्यागतानि, नागन्तुकानि, तानि प्रणष्टव्यानि। कथं नक्ष्यन्तीमानि? द्रष्टिदृष्टयोः संयोग एव 'हेय हेतुः'– हेयस्य साधनमस्ति। वस्तुतो जात ईश्वरप्रणिधानेऽसावीश्वरः केन प्रकारेण योगक्षेमः करोति, कथं दृश्यं प्रसारयति? तदेव संयोगः कथ्यते। तद् दृश्यं नामरूपयो विभिन्नाङ्गानामनुष्ठानं साधुदिशां दाताऽस्ति। अनेन विना क्लेशाः नष्टा भवन्त्येव नहि। तयोर्दृश्यद्रष्टोर्मिलनमस्ति संयोग। इदं मिलनमेवास्ति साधनं हेयस्य। तेनोक्तं दृश्यस्य स्वरूपं यत् प्रकाशक्रियास्थितिस्वभावयुक्तचास्ति। ज्योतिर्मयप्रकाशस्वरूप परमात्मनः प्राप्तौ, प्राप्तिक्रियायां भवतः कीदृश्यवस्थास्ति? तस्याः स्थितेः परिचायनम्, पुरुषस्य कृते भोगभुक्त्योः सम्पादनकरणमेवास्ति यस्य प्रयोजनम्। इदं दृश्यं प्रकृतेरन्तर्गतं नास्ति, यतोहीदं द्रष्टुः संसर्गेण सञ्चालितमस्ति। दृश्यं चतुर्भिर्रूपैर्भवति प्रसारितम् – विशेषाविशेषलिङ्गालिङ्गस्वरूपेण। '**पुरुषविशेष ईश्वरः**' दृश्यं सूचयति यद्विशेषस्य परिवेशे भवतः लक्ष्यप्राप्तिरस्ति कीदृशी? अविशेषः प्रकृतिरस्ति। दृश्यं सूचयति यत् प्रकृतेः कियान्भारो वर्तते भवत उपरि। कदाचित् दृश्यमिदं मूर्तरूपे (लिङ्गरूपे) भवति व्यक्तः कदाचिच्च भगवानमूर्तो भूत्वा सम्बोधयति। आकाशवाणी, अंगस्पन्दनादीनि यस्य सन्ति नानारूपाणि।

द्रष्टात्मा चेतनः, ज्ञानस्वरूपः स्वभावतः सर्वथा शुद्धौऽस्ति, निर्विकारोऽस्ति, किन्तु बुद्धि वृत्यनुरूपमस्ति निरीक्षकः, बुद्धौ वृत्तीनां यथा प्रभावोऽस्ति सस्तदाधारेणेदं दृश्यं प्रसारयति। दृश्यस्य प्रयोगः केवलमस्ति द्रष्टे किन्तु यस्य पुरुषस्य भोगापवर्गरूपे कार्ये सम्पन्नेस्तस्तस्य पुरुषस्य कृतेऽस्य संयोगस्य नावशिष्यते कश्चिदप्युपयोगः पुनरपि नायं भवति नष्टः। अपरसाधारणव्यक्तीनां कृते मार्गदर्शनार्थं तस्योपयोगः सुरक्षितः संतिष्ठते। तस्य हितार्थमस्यावबोधस्य सूत्रपातो महापुरुषमाध्यमेन तदर्थं वर्तमानस्तिष्ठति।

संयोगोऽयं किमस्ति? '**स्वस्वामिशक्त्योः स्वरूपोपलब्धि हेतुः संयोगः।**' ( २/२३ ) स्वाशक्तिरर्थात् दृश्यं यन्मोक्षं दापयति, स्वामिशक्तिपुरुषश्चानयोरुभयोः स्वरूपस्य प्राप्तिः संयोगः कथ्यते। एतद्वयं सहैव-सहैव कार्यं कुरुताम्, मदर्थमुपलब्धौ स्याताम्, मयासहानयोः संयोगो भवेताम्-एतयोर्मिलनमस्ति संयोगः। एतत्संयोगं विना न भवति साधनं जागृतम्।

संयोगस्य कारणमस्त्यविद्या। नष्टायामविद्यायां संयोगोऽपि विनश्यति। इदमेव 'हानम्' अस्ति। पुनर्जन्मादिदुःखानामत्यन्ताभावो कथ्यते। इदमेव चेतनात्मनः कैवल्यपदमस्ति। गुरुदेवाः कथयन्ति स्म- '**हानि हो जिससे चौरासी**' अर्थात् अण्डजेन, पिण्डजेन, स्वेदजेन, उद्भिजा चेति चतुभिः प्रकारैः प्रसारिताया अनन्तसृष्टेः समापनम्, भवबन्धनान्मुक्ति प्रापणं हानमस्ति। इदं हानं विवेकख्यातितः समायाति। विवेकज्ञानावसरे साधना ज्ञानस्य सप्तसोपानैश्चलित्वा सफलायते। सप्तषु समातायां दक्षतायामशुद्धेवशानं भूत्वा भवति ज्ञानस्य प्रकाशः।

विवेकज्ञानस्य प्राप्तिर्योगस्यानुष्ठानेन भवति, यस्याष्टावङ्गानि- यमः, नियमः, आसनम्, प्राणायाम, प्रत्याहारः, धारणा, ध्यानम् समाधिश्च सन्ति। यमः पञ्चधा- अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम् अपरिग्रहश्च। सतताभ्यास्बलेन ये देशकालयोर्जन्मादिश्च पराकाष्ठात् उपरि समुत्थान समकालमेव यमाः सार्वभौमानि महाव्रतानि च भवन्ति। चिन्तनद्वारा वृत्तीनामेक प्रकारतः द्वितीयप्रकारे परिवर्तनमुत्कर्षञ्च जन्मपरिवर्तनमस्ति। उत्कर्षो यद्स्तर यावदस्ति तथैव जन्म मिलति भविष्ये। जन्मपरिवर्तनेन यमानां पालने नायाति व्यवधानं तदेमे महाव्रतं पदं लभन्ते। सिद्धे सति यमे नाम्निरूपे पापिदेशे चित्तयोजनेन तत्क्षणं सुरतो भवति संलग्नः। ऊष्माशैत्यञ्चोक्त यमानां पालनेन भवतः बाधके। यमाः पूर्वोक्तावरोधप्रभावाबाधिताः सन्तः, इत उपरि समुत्थिता भूत्वा सार्वभौमाः समुच्यन्ते।

योगस्यापराङ्ग नियमः- शौचस्य, सन्तोषस्य, तपसः, स्वाध्यायस्य, ईश्वरशरणगतेश्च समुच्चयः कथ्यते। वितर्का अर्थाद्विजातीयतर्काः पूर्वोक्त नियमानां पालने बाधामुपस्थापयन्ति। एतन्निवारणाय वितर्कविरोधीभावानां सङ्कल्पना कर्तव्या। यमनियमयोः परिपालनेन भजने शान्तम्, स्थिरम्,

सुखपूर्वकञ्चोपवेशनस्य क्षमता विकसति, यत् योगस्यासनं तृतीयमङ्गमस्ति। योगासननाम्ना समाजे विभिन्नप्रकारकाः शारीरिक व्यायामाः प्रशिक्ष्यन्ते, यदा तु तेषां योगेन सह सुदूरस्यापि सम्बन्धो नास्ति। योगसम्मतानामासनयमनियामानां निसर्गतः क्रियान्वयनकारणेन तेषां पालनप्रयत्ने समागते शैथिल्ये परमात्मनि च मनो नियुक्त्या सम्पन्नो भवति। यदि बाह्यशारीरिकव्यायामएवासनं भवेत्तदा परमात्मनि मनो नियोजनस्य कावश्यकतासीत्?

आसनसिद्धि समकालमेव द्वन्द्वाघातो न प्रभवति। अत उपरि प्रकृतौ नैतत् किञ्चिदप्यस्ति, यः साधकं विचालयितुं शक्नुयात्। रागद्वेषादि द्वन्द्वाः साधकमधुना न प्रभावयितुं शक्नुवन्ति।

आसनस्य परिपक्वावस्थायां श्वासप्रश्वासयोः गतेर्विरामः प्राणायामोऽस्ति। कृतमासीत् त्वासनं परन्तु प्रकाशनमभवत् प्राणायामस्यावस्थायाः। यदासने सुखपूर्वकं सुरतः स्थिरायते, तस्मिन् समये यः श्वासः मया गृह्यते (सजातीय प्रवृत्तेः, अक्लिष्ट वृत्तेः), प्रश्वासः यः मया त्यजते विजातीय प्रवृत्ति क्लिष्टवृत्योरुक्तोभयोः नियन्त्रणं प्रसज्यते। श्वास एकस्मिन् निर्धारितायामे (नाम्निरूपे वा) प्रवाहितं भवितुमारभते- अस्यैव नामास्ति प्राणायामः। यमनियमयोः परिपालनेनासनस्यावस्था समायाता, आसनसिद्धिकाल एव च प्राणायामस्य स्थितिः प्रकटिता भवति। प्राणायामस्य चत्वारः क्रमोन्नताः सन्ति सोपानाः। बाह्यवृत्त्या, आभ्यन्तरवृत्या, स्तम्भवृत्या, देशकालसंख्यया चावलोक्यमानः प्राणायामः, लम्बायमानः सुकरश्च भवति। बाह्यवृत्तिः प्रकृत्युन्मुखी सती निरीक्षते। आभ्यन्तरवृत्तिरीश्वरपथे योगसाधनाया अङ्गप्रत्यङ्गानां विश्लेषणं करोति। चिन्तनं बाह्यवृत्तेरस्ति तर्हि कामक्रोधलोभादयः कस्मिन् क्षेत्रे कियत्कालं यावत् भवन्त्यवरोधिता, ततः परावर्त्य स्तम्भवृत्तौ तान् नियोजयेत्। अनेन प्रकारेणाभ्यन्तरवृत्तौ लीने चित्ते विवेकवैराग्यशमदमाः कस्मिन् देशे कियत्कालं यावत् तस्थुः, संख्याद्वारा ज्ञातव्यं ततश्च समाकृष्य स्तम्भवृत्तौ नियोक्तव्याः। एवं निरीक्षणेनैकमेताद्वं स्तरं समागच्छति यत् **'बाह्याभ्यंतरविषयाक्षेपी चतुर्थः।'** **(२/५१)** बाह्यान्तरिकयोर्विषयाणां सर्वथा विरामश्चतुर्थः प्राणायामोऽस्ति।

प्राणायामस्य पूर्णतां गते सत्येव प्रकाशस्वरूप परमात्मनः साधकस्य च मध्ये विद्यमान वृत्तीनामावरणं क्षीणतामाप्नोति, ईश्वरः प्रतिभासितुमारभते। मनसि स्वरूपं धारयितुं सामर्थ्यमाव्रजति। प्रारम्भावस्थायां साधकस्य मनो नाम्निरूपे वा न स्थातुं शक्नोति। प्राणायामस्य सिद्धे सत्येव विसङ्गतिरियं भवति समाप्ता। नाम्निरूपे च क्वापि सुरतं स्थिरं कर्तुं भवेत्कामनां, तत्कर्तुं शक्ष्यति।

योगस्य पञ्चमः प्रस्तरः प्रत्याहारोऽस्ति। विषयाणां सम्बन्धेन राहित्ये सतीन्द्रियाणाञ्चितेन सह तद्रूपता समुच्यते प्रत्याहारः। यैः विषयैरासनप्रभावितानीन्द्रियाणि तत्प्रभावः समाप्तो भवति। प्रत्याहारे सिद्धे सत्येवेन्द्रियाणि भवन्ति वशगानि, या जितेन्द्रियपुरुषाणामस्त्यवस्था।

अनेन प्रकारेण महर्षि पतञ्जलिप्रणीतस्य योगदर्शनस्य द्वितीयः पादः परिपूर्णो भवति, यस्मिंन् पादे योगस्याष्टष्वङ्गेषु पञ्च (यमस्य, नियमस्य, आसनस्य, प्राणायामस्य, प्रत्याहारस्य च) निरूपणमस्मिन्पादे सम्पन्नम्। शेषत्रणायामङ्गानाम् धारणायाः, ध्यानस्य समाधेश्च वर्णनं महर्षिः अग्रिमे विभूतिपादनामके तृतीयपादे कृतवानस्ति, यतोहि लक्ष्यस्वरूपं परमात्मानं धारणे कृते सत्येव ईश्वरमाध्यमेन प्राप्त्यर्हा विभूतयः ध्यानसमाध्योः स्तरेऽपि प्रकटितुमारभन्ते, येषामुल्लेखः यथास्थानं करिष्यते।

।। ॐ।।

।।ॐ श्री परमात्मने नमः।।

# तृतीयोऽध्यायः – विभूतिपादः

योगस्याष्टाङ्गेषु प्रथमपञ्चाङ्गानां वर्णनं द्वितीये साधनपादे कृतम्। अन्तिमानां त्रयाणां धारणाध्यानसमाधीनामकाङ्गानां वर्णनमस्मिन् विभूतिपादाख्य तृतीय पादे प्रस्तुतमस्ति। प्रथम पञ्चाङ्गानि बहिरङ्गसाधनानि कथ्यन्ते, यानि सम्प्रज्ञात समाधौ परोक्षरूपेण भवन्ति सहायकानि। धारणाध्यानसमाधि–नामकमङ्गत्रयी अन्तरङ्गसाधने सहायिका; किन्तु निर्बीजसमाधिसन्दर्भे पूर्ववर्णितानि त्रिणि साधनान्यपि भवन्ति बहिरङ्गानि, यतोह्युक्त त्रयाणामङ्गानामभावेऽपि निर्बीजा समाधिः सुसम्भवा। धारणाध्यान–समाधिनामभ्यासो लक्ष्यमेकमभिलक्ष्यं क्रियते, तदासावभ्यासः संयमः कथ्यते, यो योगस्यास्ति पारिभाषिकः शब्दः। अनेन संयमेन सहैव विभूतीनामस्ति प्राकट्यम्। अस्मिन् विभूतिपादे धारणाध्यानसमाधीति शब्दत्रयस्य स्थानेऽधिकांशसूत्रेषु संयमशब्दस्यैव प्रयोगाधिक्यम्।

धारणाध्यानसमाधयो योगस्य क्रमागताः समुन्नताः सन्त्यवस्थाः। एषां त्रयाणामङ्गानामभ्यासः संयमोऽस्ति, संयमेन चानेकानां विभूतीनां भवति प्रस्फुटनम्, अतएवासां तिसृणां वर्णनं विभूतिपादे विहितमस्ति। विभूतयः परमात्मनः प्राप्याण्यैश्वर्याण्युद्वालौकिकाः क्षमताः सान्ति, या योगस्योक्ताङ्गानामभ्यासकाले महापुरुषेषु संनिशन्ते। रामचरितमानसे भगवतः शिवस्य विभूतीनामस्ति वर्णनम्–

**सुकृत शंभु तन विमल विभूती। मंजुल मंगल मोद प्रसूती।।**

पुण्यात्मनः शिवस्य शरीरे निर्मला विभूतयो मिलन्ति, यथा याचक कामनात् अधिक प्रदानम् (अवढरदानीत्वम्) दानसमये 'बहूदारता', कामं कस्यापि समुद्धारक्षमता, सर्वज्ञता, यथा– **'सती जो कीन्ह चरित सब जाना।'** इमा विभूतयो गुरुचरणानामनुदानमस्ति।

जगतीतले सर्वप्रथमावतरितापौरुषेया वाण्याः गीताया दशमेऽध्याये भगवान् श्रीकृष्णो ब्रूते–

**नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।**

**एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया।। (१०/४०)**

शत्रुसन्तापकारिन् अर्जुन! मम दिव्यविभूतयः सन्त्यनन्ताः। इदं वर्णनं तु संक्षेपतो वर्णितम्। वस्तुतस्ताः सन्त्यसीमाः। यथा भगवतोक्तं यत्सूर्येऽहमस्मि तेजः, रसायामहमस्मि क्षमता, नभसो व्यापकताहमेवास्मि, वृष्णिकुले वासुदेवाऽहमस्मि, पाण्डवेषु धनञ्जयः, ब्रह्मर्षिषु सनकादिरहमस्मि तथैव बहुत्र। इत्थं गीतायां दशमेऽध्याये यद्वर्णितं तत् संक्षेप एव, यतोहि दशोत्तरेऽध्याये सूचितमस्ति यदर्जुन एता विभूतीः दिद्वक्षते। प्रत्यक्षदर्शनैव भवन्ति विभूतयो बोधगम्याः।

काकभुशुण्डिरकरोद्भगवद्दर्शनम्। तदुदरे प्राविशद्भगवान् तदाददर्श– '**उदर माझ्र सुनु अण्डज राया। देखेउँ बहु ब्रह्माण्ड निकाया।।**' स अनन्तान् ब्रह्माण्डानद्राक्षीत्। पुरोदृश्यमानेयं धरित्री, तारावली, रविशशिस्थितिश्च तथागिरिसागरादिपङ्क्तिः, एकं ब्रह्माण्डमस्ति, भुशुण्डिस्तु नैकानि ब्रह्माण्डानि ददर्श। '**प्रति ब्रह्माण्ड राम अवतारा।**' प्रत्येकं ब्रह्माण्डेषु समदर्शितेनावताराः। एवदृशमपिदृश्यं द्रष्टुं भुशुण्डिनां यन्न कदाप्याकार्पीतमवलोकितञ्च कदाचन, '**जो नहिं देखा नहिं सुना, जो मनहूँ न समाइ। सो सब अद्‌भुत देखेउँ, बरनि कवन बिधि जाइ।। (उत्तरकाण्ड, स्याशीतिसंख्याक दोहां यावत्)** यन्न कदाप्यालोक्यश्राविसमाबोधि च एवमलौकिकं दृश्यं दृष्टिपथायितञ्च। "**लोक लोक प्रति भिन्न बिधाता। भिन्न बिष्नु सिव मनु दिसि त्राता।।**", "**दसरथ कौसल्या सुनु ताता। विविध रूप भरतादिक भ्राता।।" भिन्न भिन्न मैं दीख सबु, अति बिचित्र हरिजान। अगनित भुवन फिरेउँ, प्रभु राम न देखेउँ आन।। (८१, क)** ब्रह्माविष्णुमहेशादयः कदाचिज्जरठाः कदाचिच्च युवानो भिन्नाविभिन्नाश्च नयनगोचरीभूताः, केवलं परमात्मा रामः परिवर्तनचक्र विवर्जितः। अर्थादयं भावः समुज्जृम्भते यत् यदा मात्रैक परमात्मनश्चिन्तनं तरुणायते तदा चिन्तनान्तराले उपर्युक्ता इमा विभूतयो भवन्ति फलीभूताः।

सत्पुरुष कबीरस्य पुरत इदमेव दृश्यमागतं तदा तेनोदीरितम्–

**देखि देखि जिय अचरज होई।**
**यह पद बूझै बिरला कोई।।**
**धरती उलटि अकासहिं जाई।**
**चींटी के मुख हस्ति समाई।।**
**सूखे सरवर उठे हिलोरा।**
**बिन जल चकवा करे किलोला।।**
**बैठा पण्डित पढ़े पुराना।**
**बिन देखे का करै बखाना।। (सबद, १०१)**

कबीरस्तर्कातीतमाश्चर्यं दृष्टवान् तथा च "**जो नहिं देखा नहिं सुना, जो मनहूँ न समाइ।**" सर्वमेकमेववृत्तमस्ति। प्रत्येक महापुरुषस्य समक्षमिमा विभूतयः समायान्ति, किन्त्वन्तर्चिन्तने धारणाध्यानसमाधीनामवस्थाभिः सहैवेतासां प्रस्फुटनं भवति, यासु धारणा प्रस्तूतये–

**देशबन्धश्चित्तस्य धारणा।।१।।**

कस्मिंश्चिदेकस्मिन् स्थले चित्तस्य निबन्धनं धारणा समुच्यते। चित्तस्य यत्रभवेत् स्थिरीकरणं तथा तल्लक्ष्यस्य सततं धारणमस्ति धारणा। योगमार्गे नामरूपयोः संधारणार्थं प्रमुखतया द्वौ देशाथवास्थले स्तः। साधनायाः शैथिल्ये शौचः, संतोषः, तपः, अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यञ्चेतेत्येतत् सर्वं संधार्यते। समुन्नतायामवस्थायां केवलं नाम्निश्वासे च सुरति विनियोज्यते। इयं धारणैव ध्याने भवति परिवर्तिता–

**तत्र प्रत्ययैकतानता ध्यानम्।।२।।**

यत्र चित्तस्य विनियोगः कृतो भवेत्, तत्रैव वृत्तेरव्यवहित सञ्चलनम्, तथा क्रमस्याव्यवच्छेदो ध्यानमुदीर्यते। पूज्य महाराजाः कथयन्ति स्म, "हो! चिन्तनं तैलधारावदविच्छिन्नं भवेत्, श्वासो वेणु दण्डाकारा स्थिरास्यात्, ॐ ॐ..... इति मननातिरिक्तं नागच्छेत् कश्चिदपरो विकल्पः, एतादृग् चिन्तने वृत्तेरनव्यहित धारया प्रवर्त्तनं ध्यानमस्ति। तदितरापर विकल्पागमे ध्यानं खण्डितं ज्ञेयम्। ध्याने ध्यातुः, ध्येयस्य द्वैतं प्राप्तये, ध्यानप्रयासस्य चेतना नोपलभ्यते। ध्यानस्य सूक्ष्मात् सूक्ष्मतरे जाते सति केवलध्येय एव प्रकाशते, तदा समाधेरवस्था समागच्छति–

**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।।३।।**

यदा केवलं ध्येयमात्रस्य प्रतीतिरवशेषा स्यात्, चित्तस्य नैजं स्वरूपं भवेच्छून्यवत्, तदा तदेव समाधौ परिवर्तितं भवति। एतदेव सत्पुरुषः कबीर भणतिः, "**सुरत समानी शब्द में, ताहि काल ना खाय।**" चित्तवृत्तीनां प्रवाहस्यभिधानं सुरतः। सुरतः शब्देव्यलीयेत्, चित्तस्य स्वस्वरूपं शून्य भवेत्, यत्र विनियुक्तं ध्यानं तद्धेयमात्रं भवेदवशेषः, अस्यैव नामास्ति समाधिः। '**सम आदि स समाधिः**', '**सम्यकधीयते चित्ते यस्मिन् स समाधिः**' आदितत्वे परमात्मनि समत्वप्राप्तिकरणस्यावस्था समाव्रजति, यत्रासीन्नियुक्तं चित्तं तदाकारमभूच्चित्तम्, इयमेव प्रोच्यते समाधिः। धारणाध्यानसमाधीनां त्रयाणां साधनानां सामूहिकन्नाम संयमोऽस्ति–

**त्रयमेकत्र संयमः।।४।।**

एकस्मिन् ध्येये धारणाध्यानसमाधीनां संगमः संयमः कथ्यते। संयमशब्देन धारणादि त्रयं सूच्यते। आदौ ध्येयस्य धारणाकरणम्, ध्यानस्थिति यथा प्रस्थानम्, केवलं ध्येयमात्रस्यानुभूतौ समाधिः, इत्थं संयमः सफलायितः। उक्त त्रयाणां प्रतिफलनं संयमः ज्ञेयः। संयमे सहजायिते पश्यन्तु प्रभावमेतेषाम्–

**तज्जयात्प्रज्ञालोकः।।५।।**

संयमे सफले जाते सत्येव बुद्धिर्ज्योतिर्मय परमात्मनः प्रकाशेन भवति प्रकाशिता। '**प्रज्ञालोकः**'– प्रज्ञात्वलौकिक ग्राहकता शक्तियुता सम्पद्यते। अयं संयमः सहसा न भवति, क्रमशश्चलिते सत्येव सिद्धो भवति।

**तस्य भूमिषु विनियोगः।।६।।**

तं संयमं क्रमेण भूमिषु विनियोजनीयम्। धारणा भूमिरस्ति, ध्यानं भूमिरस्ति, समाधिर्भूमिरस्ति, अनेन प्रकारेण क्रमानुगत चलिते सति संयमः सुसिद्ध्यति। अस्य संयमस्य विशेषता कथ्यते–

**त्रयमन्तरङ्गं पूर्वेभ्यः।।७।।**

द्वितीयपादे यानि पञ्चसाधनानि वर्णितानि सन्ति– यमनियमासनप्रत्याहाराः – इत्येतेषामपेक्षया ध्यानधारणासमाधयः सन्ति सूक्ष्माः सुगम्भीराश्च, अन्तरङ्गसाधन सत्वेऽपि पुनः–

**तदपि बहिरङ्गं निर्बीजस्य।।८।।**

सत्यपि धारणाध्यानसमाधीनामन्तरङ्गत्वे तत्त्रिकस्य बीजं विद्यत एव, अतो निर्बीज समाधि तुलनायामुक्त साधनानि बहिरङ्गानि सन्ति। बहिरङ्गस्याभिप्रायः प्रकृत्युन्मुखं गमनं नास्ति, प्रत्युत् समाधेरुपरितनः स्तरो ज्ञेयः। निर्बीज समाधिस्तु प्रचुर गाम्भीर्ये विराजते, तुलनायामियमस्ति बहिरङ्गम्।

**व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः।।९।।**

व्युत्थानसंस्कारे परिपूर्णे सत्यर्थात् मनसश्चांञ्चल्यस्याभिभवे जाते अर्थात् तिरोभाव स्थित्यनन्तर निरोधसंस्काराणां प्रादुर्भावक्षणे चित्तस्य निरोध संस्कारैर्व्यपिनम्, चित्तस्य निरोध परिणामोऽस्ति। अनेन लाभः?–

**तस्य प्रशान्तवाहिता संस्कारात्।।१०।।**

पूर्वोक्त चित्तनिरोधसंस्कारबलेन चित्तं नितान्तम् '**प्रशान्तवाहिता**'– प्रशान्त प्रवाहितं भवति। गीतायां भगवान् श्रीकृष्णः कथयति, '**जितात्मनः प्रशान्तस्य**'– यः साधकोऽन्तःकरणं समानसमिन्द्रियसमूहं वशमानयत्, चित्तवृत्ते प्रवाहः शान्तः, तस्मिन् योगारूढे साधके '**परमात्मा समाहितः**' (६/७)– परमात्मा सन्ततं समाहितः सन् सन्तिष्ठते। इदमेवतथ्यं महर्षिपतञ्जलिरपि सुदृढ़यत्यत्र यत् निरोधपरिणामप्रभावतः चित्तवृत्तेः प्रशान्तवाहिता सम्पद्यते। कुत्सिताः संकल्पास्तु निर्मूलायन्ते, सत्सङ्कल्पा अपि नाङ्कुरन्ति। चित्ते न कोऽप्युद्वेगोऽवशिष्यते। अस्याः समाधे परिणामं निरीक्षन्ताम्–

**सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः।।११।।**

चित्तादनेकप्रकारक चिन्तनशीला वृत्तेरुन्मूलनम्, ध्येयविषयस्य चिन्तनकारिण्या एकाग्रतावस्थायाः प्रादुर्भवनमस्ति चित्त समाधेः परिणामः। साधकस्य समाधिरस्ति समीचीनेति। बोधानन्तरं तदुत्तरायाः स्थितेर्निवचनम्–

**ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः।।१२।।**

वृत्तीनां निरोधानन्तरम्, विषयाणामुदयस्य लोपे सति चित्तस्य ध्येये समाहिता समाधिरस्ति। तदनु यदा शान्तोन्मुखोदयोन्मुख युगल प्रवृत्ती सञ्जायेते भेदरहितावेकाकारौ, तदेव चित्तस्यैकाग्रतायाः परिणामोऽस्ति। अधुना चित्तं सम्यकस्त्येकाग्रम्, न तु वृत्तिरुदेति न चाग्रे कस्याऽपि शान्तिरपेक्षिता भवति।

इदानीं यावत् त्रयः परिणामावर्णिताः- निरोधपरिणामः (संस्काराणां निरोधः), समाधिपरिणामः (लक्ष्यमात्रस्याभासः)- इत्यनयोः पश्चाच्छान्तोदय प्रकृतिकयोरुभय वृत्त्योऐकाकरि जाते सति चित्तं विपरिणमत्येकाग्रतायाम्। सम्प्रति चित्तस्य सदृशं भूतानामिन्द्रियाणाञ्च परिणामः कथ्यते।

**एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः।।१३।।**

निरोधसमाध्येकाग्रतानां माध्यमेन पञ्चसूक्ष्मभूतेषु शब्दस्पर्शरूपरसगन्धेषु सम्भाव्यमानेष्वर्थात् सकलेन्द्रियान्तराले सम्भाव्यमान धर्मपरिणामलक्षण- परिणामावस्थापरिणामानामपि व्याख्या सुतरां सम्पन्ना। योगदर्शने महर्षिरत्र प्रथमवारं धर्मस्य नाम जग्राह। यदा संस्कारस्य निरोधो जातः, समाधेः स्थितिराप्लाविता जाता, उदयास्तशीलौ विकारौ द्वौ शान्तौ बभूवतुः चित्ते सदेकाग्रतायाः परिणामः संवृत्तः तदा धर्मशब्दस्य प्रयोगोऽभूत्, अयं धर्मपरिणामः। योगिनः किं लक्षणमस्ति, लक्षणं प्रकटितम्, अयं लक्षणपरिणामः। तस्मिन् सम्यक् प्रकारेण योगस्यावस्था समाविष्टा अयमवस्थापरिणामः। निरोधपरिणामसमाधिपरिणामैकाग्रतापरिणामानां माध्यमेनोक्त त्रयाणामपि वर्णनं सुसम्पन्नम्। योगस्यावस्थालक्षणधर्माश्च प्रकटीभूताः। धर्मोऽयं क इत्येकः प्रश्नः-

**शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी।।१४।।**

शान्तोदिता स्वभावयोरुभयोर्वृत्योः कोऽपि नास्ति देशविशेष अर्थात्तयोर्व्याप्त्यर्थं न किमपि स्थानम्- धर्मस्यायमनुपातो यत्रास्ति तत्रैव धर्मी। शान्त प्रकृतिकाऽविधायाः, अस्मितादेः पुनर्जन्मादेः, जन्मनः, आयुषः, भोगस्य च हेतु भूता वृत्तयस्तथोदितोन्मुखा समाधिः, एकाग्रतापरिणामादीनां कृते **'अव्यपदेश्य'-** व्याप्ताय न किमपि स्थानम्। धर्मस्यैतादृशोऽनुपातः, अर्थात् धर्मस्यैतादृक् तुलनात्मकावस्थायां पुरुषः धर्मी, अर्थात् धर्मात्मा भवति। अस्यानुपातस्य नामस्ति धर्मः।

**क्रमान्यत्वं परिणामान्यत्वे हेतुः।।१५।।**

क्रमस्य भिन्नता परिणामस्य भिन्नतायाः कारणमस्ति। युगपत् प्रस्थितानां साधकानां मध्यतः कश्चिच्छ्रीघ्रं लक्ष्यं प्राप्नोति, कश्चित् कालान्तरे। निरोधः, समाधिः, एकाग्रता तथा धर्मलक्षणम्, अवस्थापरिणामः सर्वेषां साधकानां

लक्ष्यसाधने समानरूपेण न भवन्ति प्रकटिताः। अत्र '**क्रमान्यत्वम्**'- क्रमस्य भिन्नतैवास्ति कारणम्।

प्रथमे पादे विद्यते समुल्लेखो यत् सहैवेकस्मिन्काले साधका योगसाधने भवन्ति प्रवृत्ताः, किन्तु तेषां लक्ष्यस्य प्राप्तिकाले भिन्नता दृष्टिपथायते, क्रमस्य भिन्नतैवेतस्य कारणमस्ति। सर्वेषां चित्तानामवस्था न भवति समाना, तदेवास्यान्तरालस्य हेतुः। अनुभूतेरुपलब्धौ श्रद्धायाः स्तरः पूर्वापर परिणामस्य भवति कारणम्- **श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः। ( गीता, ४/३९ )** श्रद्धावन्तः, संयतेन्द्रियाः, तस्मिन् तत्त्वे परायणाः पुरुषाश्च कैवल्य ज्ञानम् प्राप्तुं भवन्ति सफलाः, यस्य निर्वचनं निरोधेन, समाधिना, एकाग्रतया, धर्मलक्षणेन अवस्थया च कृतम्।

संयमस्य सिद्धे सति विभूतयो हस्तगतायन्ते। साम्प्रतं त्रिप्रकारक परिणामानां वर्णनं कृतम्। अत आदौ संयमविधानस्य फलं कथ्यते-

**परिणामत्रयसंयमादतीतानागतज्ञानम्।।१६।।**

त्रिषु परिणामेषु संयमस्य परिपाकेन भूतकालस्यार्थादतीतस्य तथा '**अनागत**'- यन्नेदानीं यावदागतमस्ति, एतादृश भविष्यस्य भवितव्यस्य वा ज्ञानं भवति।

अस्माकं गुरुचरणाः कस्यापि वस्तुनो जनस्य वा भविष्यमवगच्छन्ति स्म। अस्माकं सतीर्थ्याग्रजस्य स्वामिनः श्रीभगवानानन्दजी महाराजस्य पञ्चषा बालसखायोऽपि पूज्यमहाराजस्य शरणमाजग्मुः। महाराजेन ते कथिता, वत्साः! युस्मासु साधुतार्हता संस्कारा नहिं सन्ति, अतएव गृहं गच्छत, स्व स्व व्यवसाये लगत। आम्! युस्मास्वेकस्य संस्कारः प्रतीयते। सर्वेतु प्रस्थिताः किन्त्वसावेकोऽरमत्। महाराजोऽवोचत्, नामतु गुलाबसिंहः, इदमेवास्ति, किन्तु त्वं न तद्व्यक्तिः, अस्ति कश्चिदन्य एव। महाराजस्तमपि येनापि केनप्रकारेण सम्बोध्य प्रबोध्य प्रेषितवान्।

अस्याः घटनायाः समाद्वयानन्तरमहमनुसुइयाश्रमं समुपस्थितः। ममाश्रमोपस्थितेः पूर्वमेव भगवान् पूज्यं महाराजमन्वभावयत् यदस्त्येकानदी, तस्यामिषत्कृष्णं जलं प्रवहन्नस्ति, भीषणास्तरङ्गाः समुच्छलन्ति। नदीकूले एक

नवयुवकः समुपविष्टः सन् रोदिति। पूज्यश्री तत्राव्रजति, वदन्नस्ति किमर्थं रुदनम्? अवतर जले, पारयिष्यति। अहं त्वस्मि न! पश्याम्यहम्। मा भैषीः! इत्थं प्रतरः। युवकस्तर्तुमारभते। पञ्चषा मीटरं सन्तराणानन्तरं युवकं प्रोत्साहयन्- महाराजेनोक्तं, "अलं वत्स! सन्तरेणेन इत्थमेव तरन् सन्तिष्ठ, पारं गमिष्यसि।

प्रातः गुरुदेवेनस्मिन् सङ्केते सुविचारितं यन्नदीभवनिम्नगास्ति। अस्या भीषणतात्यधिकाऽस्ति। उच्छलदुर्मय इमामगाधां दुष्पारां कुर्वाणाः सन्ति। कश्चित् युवकः इमामवगां पारयितुमस्ति विकलः, यस्य मार्गदर्शनमस्त्यावश्यकम्।

ममोपरि दृष्टिपात् समकालमेव मां ज्ञातवान् श्रीमहाराज अतीव प्रसन्नश्च सम्बभूव। सत्पुरुषेष्वासीन्ममश्रद्धा। अधुना यावत् यावन्तो महात्मानो मया दृष्टाः, तेषु महाराजाः सर्वोत्कृष्टाः प्रतीता अभूवन्- सघन कान्तारान्तर्गतैकाकी निवासः, देदीप्यमानमाननमण्डलम्, सौम्या मूर्तिः, स्नेहिलो व्यवहारः। अहं सादरं प्रणाममकरवम्, उपाविशञ्च। महाराजः कुशलक्षेमपूर्वकं सामान्य परिचयं प्राप्तवान्। दशपञ्चमिनटावधिक वार्त्तानन्तरमसौ पप्रच्छ, त्वं साधुस्तु न भवितुमीहसे? अहमचिन्तयम्, अपरिचितोऽयं महात्मा। 'आम्' कथनानन्तरं क्वचित्क्यां कस्याचिद् रूढौ न मां निबद्धेत्। अतएव ससावधानेन मया तथ्येतरव्याजपिनद्धमुत्तरं प्रदत्तम्- "महाराज! स्वबलबलेन न कोऽपि वक्तुं शक्नोसि यदहं साधुः भविष्यामि।" महाराजससन्निधितोऽहं किञ्चित् दूरङ्गतः, यदपरोऽपि कश्चित् प्रश्नो मां पृच्छेत्। महाराजः पार्श्वेस्थितान् जनानकथयत्, "अबउँ सार कवई काटत है।" (अर्थादीनमप्ययं छलप्रक्षपं करोति) मया दृष्टमस्ति, अयं स्थास्यति। मयाऽस्मैपन्थाः सम्भविष्यति दातव्यः।" इयमस्ति संयमपरिपाकानन्तर महापुरुषाणां स्थितिः। भूतभविष्ययोज्ञानं तेषां सहजविभूतिरस्ति। इत्थमेव-

**शब्दार्थप्रत्ययानामितरेतराध्यासात्**
**संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्।।१७।।**

शब्दार्थज्ञान त्रयाणामेतेषां पारस्परिकाध्यास परिपाकस्य कारणात् मिश्रणं सम्भवन्नस्ति। तद्विभागे संयमविधानेन '**सर्वभूतरुतज्ञानम्**'- सर्वेषां प्राणिनां वाण्या ज्ञानं भवति।

अनुसुइयाश्रमे एतादृशः घटनाः मयेता सम्भवन्त्यः दृष्टिपथायन्ते स्म। महाराजाः कथयन्ति स्म यदेष वानर इत्थं नदन्नस्ति, ते खगा इत्थ कूजन्ति। एकदा व्यक्तिरेको मन्दाकिन्यां स्नानं कुर्वाण आसीत्, तस्य पोटलिका विलुप्ता जाता। सोऽभूदाश्चर्यचकितो यतो हि न कोऽपि व्यक्तिरवलोकितः पोटलिकामहरत् कः? तस्यां पोटलिकायां सर्वकारीय कर्गदाः काश्चिन्मुद्राः घटीयन्त्रादय आसन्। न्यूनातिन्यूनं सार्द्धद्वयघटिकां यावदन्वेषणानन्तरं स महाराजं न्यवेदयत् यत्, महाराज! तस्यां पोटलिकायां प्रशासकीयाः कर्गजाः काश्चिन्मुद्राः, घटीयन्त्रादय आसन्, मम जीविका निरस्ता भविष्यति। श्रीमहाराजो जातो दयार्द्रः, आसनादुत्तिष्ठनेकां दिशमभिमुखं प्रतस्थे। नाति दूरमेका वानर्यासीदुपविष्टा। महाराजस्ततस्तामपश्यत्, सा ग्रीवामधः कृतवती अनदच्च 'ऊँ ....। महाराजेनोक्तं- पश्यत रे! सा तत्र संकेतयतिः, तत्रावलोकयत। व्यक्तिरसौ संकेतित प्रस्तरशिलां गतः। लताप्रतोनोग्रथितकुञ्जान्तरे सा पोटलिका स्थितासीत्। पोटलिका सा विदीर्णा जाता आसीत् किन्तु वस्तुनि सुरक्षितानि प्राप्तानि।

एकस्मिन् समये गुरुचरणा एकस्य भक्तस्यावासं गता आसन्। इषछूरे कुक्कुर एकः प्रगाढायां आनिद्रायां वुक्कन्नासीत्, यदा कदा पदान् कम्पयति स्म। महाराजेनोदीरीतम्, "अयमपि स्वप्ने कमपि दूरयति।" भक्ताः पप्रच्छुः- भगवनयं कं परिप्लाययति? महाराजस्य प्रतिकृतवान् दृष्टिपातम्, द्विमिनटानन्तरमुवाचः, "प्रतीयते श्वोऽत्र भण्डारा पदबोध्यो बृहद्भोजो भविष्यतिः, पत्रपात्राणि (पत्तलानि) प्रक्षिप्तानि भविष्यन्ति। अत्र पत्तलसंलग्नान्नादीनि खादितुं गावः श्वानस्तथाजादयो भविष्यन्त्येकत्रिताः। कुक्कुरोऽयं तान् दूरयति। अयं भविष्यं निरीक्षमाणोऽस्ति।"

तस्मिन् समये तत्र भण्डारस्य (विशालभोजस्य) नासीत् काचिच्चर्चा योजना वा। वार्त्ता समायाता, गता, सम्पन्नाऽप्यभवत्। रात्रौ केचन् सम्भ्रान्ता श्रेष्ठिगणा आजग्मुः, जग्मुश्च कृतदर्शनाः। अन्येद्यु प्रातरेव केचन पाककर्मप्रवीणाः कटाहदर्वीतवादि पात्राणि नीत्वा समागताः। विशाल भण्डारायाः कार्यक्रम प्रचलितः। सम्पूर्णो जातः भण्डारः, पत्रपात्राणि प्रक्षिप्तानि। सर्वैरवलोकितं यत् तदेव कुक्कुरः गां प्लाययति। महाराजः कथिवान्, अस्मारयच्च, पश्यसायं कुक्कुरः सर्वान् प्लाययति। इदमेवास्ति 'भूतरूतज्ञानम्' भूतरुत ज्ञानस्याशयोऽस्ति प्राणीनां वाण्याः सम्यगबोधः।

सती भगवन्तं शिवमुक्तवती, ''भगवन्! मया न परीक्षितो रामः, भवत इव सोऽभिवादितः।'' शिवस्य हृदि सन्देहोऽभूत्। ध्यानस्थोभूत्वोपाविशत् चः **'सती जो कीन्ह चरित सब जाना।'** सत्याश्चरित्रमप्रकटयत्। भगवान् शिवोऽद्राक्षीत् यत् सती सीतारूपं धृत्वा परीक्षाकरणस्यापराधं कृतवती।

शब्दम्, अर्थम्, आशयञ्च पृथक् पृथककरणस्य क्षमतायाः समागते सत्येषु संयमकरणेन सर्वेषां प्राणीनामाशयो व्यक्तायते। तत्र कस्यापि वाण्याः श्रवणम्, वक्तुदर्शनम्, वाण्या हृदयङ्गनम् पलानन्तरमेव वृत्तिरेकाकारा चलितुमआरेभे ध्यानं सम्पन्नम्, ध्येयमात्रस्य प्रतीतिरवशेषा जाता। आगता समाधिरवस्था। यत्र त्रयोऽभूवन्नेकत्रिताः संयमस्तदा परिपक्वः। तेन संयमेन भवति ज्ञातं यत्तद्वाण्याः किमस्त्याशयः? इमाः सर्वाः क्रियाः शीघ्रं मिनटे द्विमिनटे च सम्पन्ना भवन्ति, यतो हि संयमः परिपक्वतां गतोऽस्ति। साम्प्रतं पश्यन्तु, प्रकारान्तरे संयमं विभूतीश्च।–

**संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्।।१८।।**

संयमस्य माध्यमेन संस्काराणां साक्षात्करणानन्तरं पूर्वजन्मनः ज्ञानं भवति। प्राणी निजेन्द्रियद्वारेण यत् किञ्चित् कर्म करोति तथा बुद्धिद्वारा यत् किञ्चित्चिन्तनं करोति, तत्सर्वं तस्यान्तःकरणे संस्काररूपेण सञ्चितो भवति। इमे संस्कारा जन्मजन्मान्तरतः संगृह्यमाणा भवन्तः सन्तश्चलदागच्छन्ति। एषु संस्कारेषु संयमं विधाय तान् साक्षात्करणेन योगी पूर्वजन्मनः ज्ञानं कर्त्तुं समर्थायते। येन प्रकारेण स्वसंस्काराणां साक्षात्करणेन निज पूर्वजन्मनां ज्ञानं भवति, तेनैव प्रकारेणापरेषां संस्कारेषु संयमविधानेन तस्यापि पूर्वजन्मनः ज्ञानं सम्पद्यते।

अस्माकं सतीर्थ्याः स्वामी शिवानन्दजी महानुभावाः, पूज्य महाराजस्य शरणं यदा समायाता, तदा त्रिदिनान्तराले पूज्य महाराजाः तं सम्बोध्य कथितवन्तः, ''पश्य, कतिपय जन्मपूर्वमावयोरासीत् सम्बन्धः, स एव पूर्वतनः संस्कारस्त्वामाकृष्येहानीतवान्। भजनस्य लक्षणं न वर्त्तते, पुनरपि सेवां चेत् करिष्यति तदा गमिष्यसि पारम्।'' महापुरुषाः संयमस्य प्रयोगं कुत्रापि कुर्वन्तु, ते निर्णयं कर्त्तुं भवन्ति सक्षमाः यत् संस्कारस्य स्थितिः कीदृशी वर्त्तते। एवंभूता महापुरुषाः संयमस्य विविध प्रयोगेषु कुर्वन्ति चर्चाम्–

**प्रत्ययस्य परचित्तज्ञानम्।।१९।।**

संयम माध्यमेनापरजनस्य चित्तस्य साक्षात्कारानन्तरं चित्तस्य ज्ञानं समुपलभ्यते। कस्यापि चित्तस्य वृत्तान्तं महाराजाः कथयन्ति स्म, यत् तस्य जनस्य स्वरूपं गृहीत्वा ध्यानस्थो भव। तस्य चित्तस्यान्तराले किमस्ति? प्रकटितं भविष्यति। इयं विभूतिः महापुरुषेषु सहजरूपेण सम्प्राप्यते।

**न च तत् सालम्बनं तस्याविषयीभूतत्वात्।।२०।।**

किन्तु सा बोधस्थितिर्भवति समालम्बनविहीना कुतो हि योगिनश्चित्तस्य सा बोधस्थितिर्नास्ति विषयभूता। योगिनश्चित्तं शान्तप्रवाहशीलोऽस्ति तथा च तस्यापरस्य जनस्य चितं गतिशीलं चञ्चलञ्चास्ति। स योगी यस्मिन् समये कस्यचिदपरस्य जनस्य चित्तं गृह्णाति तस्मिन् क्षणे किं प्रवाहितमस्ति, एतत् सर्वं बोधे समायाति।

**कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुः-
प्रकाशासम्प्रयोगेऽन्तर्धानम्।।२१।।**

शरीररूपे संयमे कृते सति यदा वृत्तेर्ग्राह्या शक्तिर्भवत्यवरोधिता तदा चक्षुषः प्रकाशेन सम्बन्धराहित्यात् योगी भवत्यन्तर्धानम्। शरीरस्यान्तराले भजने लवः संलग्ना- अयमेव संयमः। शरीरस्यान्तराले यदा संयमः सिद्धो भवति '**तद्ग्राह्यशक्तिस्तम्भे**' तदासौ योगी परैर्दशनोपकारिका या दृश्यता तां रुन्धनेन, परेषां नेत्राणां प्रकाशनशक्त्यास तस्य सम्बन्धस्याभावात् योगी भवत्यन्तर्धानम्।

ध्यानवस्थायां योगिनस्तिलाकारकं सूक्ष्मतरमपि लघुतरं वस्तुनासाग्रसमक्षं द्रष्टुं प्रयतन्ते, तद्वस्तु दर्शं दर्शं सुरतमभ्यन्तरे नयन्ति ध्याने चेत् जातान्तराल गामिनी तदा नेत्राणि भवन्त्यनावृतानि किन्तु किमपि न दृष्टिपथायते, यतो हि नपश्यन्ति नेत्राणि प्रत्युत् तदनुस्थिताविचाराः पश्यन्ति। विचारास्तु तदा हृदयान्तराले ध्याने प्राविशन्ति। ध्यानावसरे यस्य साधकस्य नेत्रफलकाभवन्त्यनावृत्तास्तस्य मनो ध्यानेऽधिकं संलगति, अत एव नेत्र निमील्य भजनस्य विधानं नास्ति। नेत्रमास्फाल्य भजनं कर्त्तव्यम्, फलकानि नाच्छयेयुः नेत्राणि तदा मनो लगत्यधिकम्। मनश्चंचलमस्ति। व्यात्तेऽपि नेत्रे मनः पलयितुमारभते, किन्तु पलायनस्य सङ्कल्पबोधो भवति, यस्य निवारणमपि

सम्पद्यते– इत्थं मनोलगत्यधिकाधिकम्। भगवतः शिवस्य ध्यानमुद्रां पश्यन्तु अर्धोन्मीलित नयनः शिवो दृश्यते। साधकैरित्थमेवाचरणीयम्।

**सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा।।२२।।**

कर्मणः प्रकारद्वयमस्ति– '**सोपक्रमम्**'- उपक्रमसहितम्, '**निरुपक्रमम्**'- उपक्रमरहितश्च। गीतायामुक्तकर्मद्वयं पुण्यकर्मपापकर्मरूपेण वर्णिते विधेते। उपक्रमसहिता अर्थादुपायसाध्याः कर्मवर्गाः पुण्यकर्मकोटौ समायान्ति। इत्थं निरुपक्रममुपायरहितं कर्म दुर्गति पथं नयति। उक्तोभय कर्मणि जाते संयमे तथा कर्मयुगलस्य संस्कारज्ञानोत्तरं योगी मृत्युज्ञानं लभते। कियत् कालयावदिमे संस्काराश्चलिष्यन्ति कदा विरमिष्यन्ति– एतस्य ज्ञानं प्राप्नोति योगी, '**अरिष्टेभ्यः**'– अरिष्ट माध्यमेनापि च साधको जानाति यद्विपदां प्रवाहः कीदृशः? कियान् च? तेषामुत्थानपतनाभ्यां तद्गत्याच भवति ज्ञातं यदन्तिमसंस्कारस्य विलये कियान् विलम्बः?

शरीरस्य निधनन्तु वस्त्रपरिवर्त्तनमात्रमस्ति, नायं मृत्युः। मरणं तदेव प्रशस्तं यदनु न भवेज्जन्म। कबीरः कथयति यदियमवस्था जीवनसमये समायाति–

**जीवत में मरना भला, जो मर जाने कोय।**
**मरने से पहले मरे, अजर अमर सो होय।।**

* * *

**जा मरने से जग डरै, सो मेरो आनन्द।**
**कब मरिहौं कब पाइहौं, पूरन परमानन्द।।**

* * *

**मन मरा माया मरी, हंसा बेपरवाह।**
**जाका कछू न चाहिए, सोई शाहंशाह।।**

**मैत्र्यादिषु बलानि।।२३।**

संसारे न भवति क्वचिन्मैत्री। या प्रतीयते मित्रता सा तु व्यवहारात्मिका। कदाचित् कश्चिज्जनः केनचिज्जनेन मैत्री कर्त्तुं प्रयतेत्, तदा तस्य विकारामैत्री कामेजने समागन्तुं शक्ष्यन्ति तथा मित्रतार्थ चयनित जनेऽपि मित्रकरणेच्छु जनस्य विकाराः प्रवेक्ष्यन्ति, इत्थं परस्परं विकाराणां संक्रमणं सुनिश्चितमस्ति।

जीवनामुपरि करुणाकरणं सुसम्भवमस्ति, किन्तु यत्र मैत्री प्रश्नः समुदेति, तत्र शङ्कराचार्यः विश्लेषयति, **'के शत्रवे सन्ति निजेन्द्रियाणि, तान्येव मित्राणि जितानि यानि।'** संसारे शत्रवः के सन्ति? निजेन्द्रियाणि। तान्येवेन्द्रियाणि वशीकृतानि चेत् स्युस्तदा परमोपकारकाणि मित्राणि भवन्ति। भगवान् कृष्णोऽपि समुपदिष्टवान् पार्थम् यत् हे अर्जुन! आत्मैव शत्रुरात्मैव सखा च। कथमेतत्? यैः पुरुषैः समनसा वशीकृतानीन्द्रियाणि तेभ्य आत्मा मित्रवदाचरति, यैस्तु समनज्ञा न वशीकृतानीन्द्रियाणि तेभ्य आत्मा शत्रुवत् वर्त्तते तथा दुर्गतिं निकृष्टयोनिञ्च प्रापयति। अतः सूत्रोक्त मैत्री पदमिन्द्रियसंयमसिद्धे बलप्राप्तिः। आत्मस्थितिकारकं तथात्मकल्याणपरकं बलं प्राप्यते। बाह्य दृष्ट्यावलोकनेन तु–

**शत्रु मित्र सुख दुख जग माहीं। मायाकृत परमारथ नाहीं।।**

**सखा परम परमारथ एहू। मन क्रम वचन राम पद नेहू।।**

**बलेषु हस्तिबलादीनि।।२४।।**

विविध बलेषु संयमो यथायथं सिध्युन्मुखं भवति, तदा विविधप्रकारकं सामर्थ्यबलं प्राप्यते। भगवान् श्रीकृष्ण आह–

**बलं बलवतां चाहं कामराग विवर्जितम्।**
**धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।। (गीता, ७/११)**

कामरागरहितानां बलवतां बलमहमस्मि। संसारे शाश्वतं बलं कस्यापि न विद्यते। श्री भगवता कृष्णेन समुद्घोष्यते यत् कामनया तथा प्रकृत्यासक्ति व्यतिरिक्तं बलमहमस्मि। यथा–यथा संयमो सुलभायते तथा–तथा सर्वप्रकारक क्रमोन्नत सामर्थ्यस्य जायते बोधः। **'अपबल तपबल बाहुबल, चौथो है बल दाम। 'सूर' किशोर कृपा ते सब बल, हारे को हरि नाम।।'** एवंदृशो जनो हरिकृपाबलं प्राप्नोति।

प्राचीनकाले हस्तिनो बलस्यासीन्मापदण्डः। अशीतिसहस्राणां गजानां बलं भीमे, दशसहस्रहस्तिनां बलं दुःशासने, लक्षमितद्विपानामासीद्बलं धृतराष्ट्रे। सम्प्रतं हार्स पावरस्य (अश्वशक्तिः) बलं बलस्य मापदण्डः स्वीक्रियते। इत्थमेव साधनानां प्रत्येकं स्थितीनां बलमुत्तरोत्तरमुपलब्धो भवति।

**प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्।।२५।।**

अस्यैव विभूतिपादस्य पञ्चमे सूत्रे महर्षिणा प्रोक्तं यत् सिद्धेसति संयमे 'प्रज्ञालोक:'- बुद्धिरलौकिक प्रकाश धारणे सक्षमा जायते। इत्थमेव समाधि पादस्य षटत्रिशत्तमे सूत्रे ज्योतिष्मती प्रवृत्तेश्चर्चा मिलति। अत्र महर्षि: कथयति '**प्रवृत्त्यालोक:**'- प्रवृत्तिरपि संयुता भवत्यलौकिक ज्योत्या सह। अस्यालोकस्य न्यासेन '**सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्**'- सूक्ष्मव्यवधानयुक्तस्य दूरदेशे यत्र कुत्रापि संस्थितस्य वस्तुनो ज्ञानं भवति।

उदाहरणार्थम् १९६२ ख्रीष्टाब्दे चीनदेश भारतदेशोपरि कृतवान् समाक्रमणम्। पूज्य महाराजेन, अनुसुइया तपोभूमौ भक्ता: सम्बोधिता, "हो, चीनदेशो हिमालयमुल्लङ्घ्यभारतमाचक्रमे। सम्प्रति किं भवति, कश्चिन्मामपि सूचयेत्।" एको भक्तो महाराजायं रेडियो यन्त्रं दत्तवान्। महाराजा: कथितवन्तो, रे भक्त! मानव: समाचारं सूचयत्युद्वा लौहयन्त्रम्।" भक्त उक्तवान्, "सरकार! अयं रेडियो भवद्भय: सततं सूचनां ददानो न कदापि विरमिष्यति।" तस्मिन् क्षेत्रे तदानीं यावत् रेडियो नामक समाचारवाहक यन्त्रस्य प्रचार: प्रसारोनासीत्।

निर्धारिते समये रेडियोमाध्यमेन समाचार प्रसारणं भवति स्म। समाचारमाकर्णयन् महाराजोऽपि चिन्तितो भवतिस्म। एकस्मिन्निशामुखे महाराज: खिन्नमुद्रायामुपविष्ट: सन् सहसा कथितवान्, "श्व: समाप्तं भविष्यति युद्धम्, भगवानधुनैवादर्शयत् यदहं तस्मिन् हिमपर्वतशिलोपरि गृहीत धूम्रपान पात्र (चिलम) हस्त: समुपविष्टोऽस्मि। किञ्चित् समयानन्तरं शिखरस्थोभूत्वा घोषयन्नस्मि- "अलं युद्धेन, रेखातस्तत्पारं चीनस्तथारेखा इतरे भारतमस्ति।"

द्वितीये दिवसे युद्धविरामस्य प्रसारणमभूत्। युद्धविरामस्तु सामान्याघटनास्ति। स्वप्ने किमपि श्रुतिगोचरायते, किन्तु वातावरणमत्रत्यं विचारणीयम्, यत्रैकदिन पूर्वमेव घटनायाश्चर्चा चर्चिता। पर्वतीयं दृश्यं हिमाच्छादितं पर्वतशिखरम्, एतत् सर्वं महाराज:, अनुसुइया तपोभूमौ सन्तिष्ठन् सन्ददर्श।

रामचरितमानसे वर्णितमस्ति, '**यथा सुअंजन अँजि दृग, साधक सिद्ध सुजान। कौतुक देखहिं सैल बन, भूतल भूरि निधान।।**' गुरु महाराजस्य चरणरजांसि मृद्वंजन तुल्यानि सन्ति। तेनाञ्जनेन हृदयस्य चक्षूंषि

भवन्ति विकसितानि। एवं विकसित हृदयनयनो जन एकान्ते शान्तस्थले निवसन् क्वाचित्कं किमपि कृत्यं द्रष्टुं भवति समर्थः।

**भुवनज्ञानं सूर्ये संयमात्।।२६।।**

सूर्ये कृते सति संयमे समस्तलोकस्य ज्ञानं प्रादुर्भवति। 'भुवनम्' यौगिकः शब्दोऽस्ति। श्रीरामचरितमानसे त्रिभुवनस्य, चतुर्दशभुवनस्य, अगणित भुवनस्य समुल्लेखो वर्त्तते। वस्तुतो दशेन्द्रियाणां मनोबुद्ध्यहंकारचित्तचतुष्टयान्तःकरणानां जीवस्य च वृत्तिनामाश्रय भूतानीमानि चतुर्दशस्थलान्येव चतुर्दश भुवनानि सन्ति। एतेषामनन्ताः प्रवृत्तयः सन्ति अगणित भुवनानि। एषु चतुर्दश स्थलेषु भूतप्राणीनां यावत्कालं शरणस्थलं विद्यते, तदैवेमानि चतुर्दशाधिभूतानि प्रोच्यन्ते, भूतानां जन्ममृत्योः कारणान्यपीमानि सन्ति। साधनायाः परिणामरूपेणैषु चतुर्दशाधिभूतेषु दैवी सम्पद् भवति प्रवाहिता, तदेमानि चतुर्दशाधिदैवानि दैवस्य भवन्त्यधिष्ठानानि। जाते सति स्तरस्य समुन्नयने, एतान्येव अध्यात्म, तथात्मप्रसारण केन्द्राणि जायन्ते। दर्शनस्य, स्पर्शस्य स्थितेश्च मेलनानन्तर भुवनं भवति समाप्तम्, प्रकृतिः पुरुषे विलीना भवति।

सूर्ये संयमसाधनेन समस्तभुवनानां ज्ञानं सुलभायते। सूर्यो ज्योतिर्मयस्य परमात्मनः प्रतीकोऽस्ति। भगवान् श्रीकृष्णः समुदीरयति गीतायां यत् सूर्यमार्गेण गता जीवा न पुनरावर्त्तनं प्राप्नुवन्ति। एतदेव महर्षि पतञ्जलिरपि वक्तुं वाञ्छति यत् चिन्तनं यदा परमात्मोन्मुखं भवति तदा '**भुवनज्ञानम्**'– भुवनानां ज्ञानं भवति। कस्मिन् भुवने ममास्ति कुत्रासक्तिः? भूतः कियान् दैवः कियान्? आत्माधिपत्यञ्च कियत्? इत्येतेषां ज्ञानं भवति। कदाचित् स संयमः सूर्यस्तरीयो नास्ति तदा? अत उपरि कथ्यते–

**चन्द्रे ताराव्यूहज्ञानम्।।२७।।**

चन्द्रमसि संयम विधानेन ताराणां संरचनाज्ज्ञानं सञ्जायते। इयं संसारस्यैवास्त्येकारात्रिः। '**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**' जगद्रूपायां निशायां सर्वे सन्ति शयानाः। अस्यां निशायां संयमी पुरुषो जागृतो भवति। अस्मिन् संसार निशाकाले साधकानां कृते यदा परमात्मनः प्रकाशो मिलितुं लगति तर्हि '**ताराव्यूहज्ञानम्**'- तारकाणामवस्थितेर्ज्ञानं जायते,

यच्चित्तवृत्तेस्तारस्य सूत्रस्य च गतिः कुत्र कुत्रास्ति? ग्रन्थिश्च क्व क्व सुदृढा वर्तते? एतस्य व्यूहस्य ज्ञानं सम्पद्यते। पश्यन्तु सम्प्रति साधनायां स्थिरतायाः परिणामम्–

**ध्रुवे तद्‌गतिज्ञानम्।।२८।।**

ध्रुवतारायां संयमस्य स्थैर्य विधानेन ताराणां गतेर्ज्ञानं सम्पद्यते। स्तम्भवृत्तेः परिपक्वायामवस्थायां यदा सुरतः, अचलः, स्थिरः समतिष्ठत् '**तद्‌गति ज्ञानम्**'– तासां ताराणां गतेर्ज्ञानं जायते, यत् चित्तवृत्तेर्वेगः कीदृशः। कदाचित् अचलायते चित्तम्, कदाचिच्चोद्विग्नायते। कदा कीदृशं चिन्तनमङ्कुरिष्यति, अङ्कुरणात् पूर्वमेव तस्य भवत्यबोधः। अत उद्वेगागमनात् पूर्वमेव शान्तो भवति। एतत् सर्वं चिदाकाशे सम्भवः।

**नाभिचक्रे कायव्यूहज्ञानम्।।२९।।**

संयमक्रमे नाभिचक्रस्य भवत्यवबोधस्तर्हि '**कायव्यूहज्ञानम्**'– शरीरस्य स्थितेः पूर्ण पूर्णं ज्ञानं सञ्जायते। नाभिः केन्द्रस्य प्रतीकमस्ति। वृत्तिः संकुचीभूय यदात्मोद्गमे भवति संस्थिता तदा '**कायव्यूहज्ञानम्**'– भूयोभूयः काया निर्माणस्य कानि सन्ति कारणानि, कियन्ति शरीराणि धारणीयानि सन्त्यवशिष्टानि?– अस्य ज्ञानं सञ्जायते। अनेक शतपूर्वजन्मनां ज्ञानं बुद्धस्य करामलकवदासीत्। गुरुचरणाः साक्षात् कृतवन्तो यत्ते पूर्वसप्तजन्मतः साधव आसन्। जडभरतस्य मृगयोनावपि ज्ञानमासीत्। काकभुशुण्डिः सहस्राधिक जन्मचक्र जानाति स्म। संयमस्य प्राप्ते सत्येतादृशेस्तरे प्रादुर्भवति ज्ञानं शरीराणां क्रमः किमवधिं यावत् कीदृशश्चास्ति?

**कण्ठकूपे क्षुत्पिपासानिवृत्तिः।।३०।।**

कंठकूपे संयमविधानेन क्षुधापिपासयोनिवृत्तिः सञ्जायते। यदा कण्ठे केवलं परमात्मन एव नाम शिष्यते, परमात्मनः स्मृति सततं कण्ठोपरि सम्प्रसज्यते, तर्हि निखिलाशातृष्णावासनाञ्च बुभुक्षापिपासा तिरोहितायते। श्रीरामचरितमानसे प्रसङ्गः समायाति यद्भगवान् रामो विश्वामित्राश्रमं सम्प्राप्तस्तदा महर्षिः श्रीराममधिकारीरूपेणानुभूतवान् तस्मै दिव्यां विद्या ददौ, का सा विद्याः? **'जाते लाग न छुधा पिपासा। अतुलित बल तन तेज प्रकासा।।'** विश्वामित्रः प्रभावशालिनं मन्त्रं जानातिस्म, किन्तूपर्युक्तमन्त्र ग्रहणानन्तरं

यदासौमुनिर्मिथिला नगरीं जगाम्, यत्र श्रीरामः प्रमुखातिथि पदेन प्राप्तादर आसीत्, तत्र षट्पञ्चाशत् प्रकारक व्यञ्जनां परिवेषणादि प्रबन्धः सुकरः सर्वसुलभ आसीत्। महर्षि विश्वामित्रो गुरुपदं भूषयामास् सोऽपि '**करि भोजन मुनिवर विज्ञानी। लगे कहन कछु कथा पुरानी।।**' पूर्वंतु कृत सविधिभोजनः पुरातनी कथामुदीरयितुमारेभे। अत्रतु मन्त्रस्य प्रभावो न दृष्टिपथायितः येन मन्त्रप्रभावेण क्षुधापिपासयोभवेन्निवृत्तिः। यथार्थतोऽयमस्ति रामचरितमानसः। रामस्य तानि चरितानि यानि मानसे प्रवाहितानि सन्ति। अत्र सन्दर्भे विज्ञानरूपो रामो विश्वासरूपो विश्वामित्रः। विज्ञानं तारमाध्यमं विनोदितज्ञानमर्थादनुभवः। विश्वासो यदानुभव संयुक्तो भवति, तदा विद्या ब्रह्मतत्व बोध कारयित्री भवति। साधकोऽपरिमित शक्तिमता परमात्मना संयुक्तो जायते। पुनस्तस्य साधकस्य कृते काचित् प्रकारिकाकांक्षा पिपासा न शेषायते। स शाश्वतीं तृप्तिं विन्दति।

परमात्मनि सुरति लगन समकालमेव क्षुत्पिपासयोर्भानं समाप्ति प्राप्नोति। एतदेवासीत् कारणं यत् श्रीमहाराजस्य साधनावसरे द्वित्राणां दिनानामुपवासः सामान्यासीद्घटना। सप्ताहोपवास द्विसप्ताहोपवास विधानानन्तरं महाराजस्य मुखमण्डले उदासीनताया लक्षणं न प्रतीयते स्म। चतुर्दशदिनात्मकोपवासोत्तरं शरीरे बहूष्मा वृद्ध्या मूत्रेणसाकं शोणितवत् किमपि पदार्थं दृष्ट्वा पूज्यश्री महाराजाः परमात्मनं साटापमाक्रोशयुतया कटुशब्दावल्योपालम्भं प्रकटितवन्तः। सा कटुवाणी का? इष्टदेव पदे प्रतिष्ठितोऽसि, निर्जने महारण्ये मामुपवेशितवान्। यत्र न क्षुधानिवृत्यर्थमन्नं न च पिपासानिवारणाय जलम्। सम्प्रति लघुशंकाव्याजेन रक्तस्त्रावो भवति, एवं स्थितौ द्विदिवसानन्तरं चतुष्टयदिनानन्तरं भविष्यति शरीरत्यागोऽपि। यदा शरीरमे न स्थास्यीत तदा भजनं कः करिष्यति। तदा तस्मिन्नेव परमात्मनोदीरितम्, "समीचनमस्ति, भोजनं वाञ्छसिचेत्तर्हि श्वस्तोभुङ्क्ष्व।" द्वितीयवासरात् भोजनस्यायाचितावृत्तिर्बभूव प्रचलिता। किन्तु महाराजाः विचारे निमग्ना बभुवुः, यद् भगवता रुक्ष शब्देन किमर्थमेतदुक्तं चेत् भोक्तुमिच्छसि चेच्छ्वस्तः खाद। भगवान् किमिच्छतिस्म? भगवतोत्तरं मिलितम्, "यदैकविंशतिदिनानि यावदन्नस्य त्यागः कृतः स्यात्, तदा जीवनपर्यन्तमन्नस्यावश्यकतैवनाभविष्यत्।" तात्पर्यमिदं यदा संयमः कण्ठकूपं भजति तदा साधके क्षुत्पिपासयोः सोढुं क्षमताविर्भवति।

**कूर्मनाड्यां स्थैर्यम्।।३१।।**

कूर्म नाड्यां संयम साधनात् स्थिरता समायाति। आयुर्वेदशास्त्रे प्राणस्य संवाहिकां मुख्यां नाड़ीं 'कूर्म नाड़ी' संज्ञया कृतमस्ति वर्णनम्। प्राणवायौ व्यक्तिः केवलं श्वासमेव न गृह्णाति प्रत्युत् श्वासग्रहणेन सह वायुमण्डलस्य सङ्कल्पमपि ग्रहणं करोति। श्वासेन साकमागन्तुकानां सङ्कल्पेषु संयम विधानेन योगी सङ्कल्पेभ्यो मुक्तो भवति। पुनः सङ्कल्पास्तस्मिन् साधके विक्षोभोत्पत्तिं कर्त्तुं न शक्नुवन्ति, येन चिन्तनधारा शनै-शनैः, लक्ष्यानुगामिनी सम्पद्यते। महर्षिः पतञ्जलिरत्र नाम्ना तादात्म्य संस्थापयन् कूर्मस्य दृष्टान्तं प्रास्तौत्। लेशमात्रमेवानुमानप्राप्ति समकालमेव कूर्मश्चरणग्रीवादि निजाङ्गं सुरक्षितावरणे समाकर्षति इत्थमेव साधको विषयेषु विचरदिन्द्रियसमूहमन्तर्मुखीं करोति। गीतायां भगवान् श्रीकृष्णोऽपि कूर्मस्योदाहरणं प्रस्तौति-

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।। (२/५८)**

येन प्रकारेण कच्छपः स्वाङ्गानि संहरते, तथैवायं पुरुषो यदा विषयेषु विचरन्तमिन्द्रियसमूहं समाकृष्य विरमति तदा तस्य बुद्धिर्भवति सुस्थिरा। दुर्घटना-भयस्य निवृत्ते सति कूर्मः स्वाङ्गानि पुनः प्रसारयति। किमित्थमेव स्थिरप्रज्ञो महापुरुषो पुनरनुरक्तो भवति विषयेषु? अस्य समाधानं भगवान् कृष्णो निम्नाङ्कित वचनद्वारेण करोति-

**विषया विनिवर्तन्ते निराहारस्य देहिनः।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।।**

इन्द्रियैर्विषयाणां ग्रहणमकुर्वतां पुरुषाणां विषयास्तु निवृत्ता भवन्ति, कुतो हि ते ग्रहणमेव न कुर्वन्ति, किन्तु विषयान् प्रति तेषां रागो सम्यक् ननिवर्तते। एतादृश योगिनः स रागोऽपि पश्चात् परमात्मनः परमतत्त्वं दृष्ट्वा साक्षात्कृत्वा निवृत्तो भवति। कूर्मनाड्यां संयम विषये महर्षिपतञ्जलेरपीदमेव तात्पर्यम्।

**मूर्धज्योतिषि सिद्धदर्शनम्।।३२।।**

मूर्ध्नः प्रकाशे ज्योतिषिवा सम्पन्ने तेन सिद्धपुरुषाणां भवति दर्शनम्। मूर्धा पदेन मस्तिष्कारव्याङ्गस्य बोधो भवति यतः सङ्कल्पाविकल्पाश्च भवन्ति जागृताः।

तत्र संयमस्य विधिवत् सति सम्पन्ने '**सिद्धदर्शनम्**'– समस्त सिद्धानां दर्शन भवति, यदेतेषां सिद्धानां सिद्धत्वमस्ति किम्? तेषु साधकेषु सिद्धेषु वा योहि परमतत्त्वस्य सञ्चारोऽस्ति, तस्य परमात्मनो बोधनम्, साधनस्य चरमावस्था सर्वोत्कृष्टा सिद्धिरस्ति।

गीतायामस्यैव संशयस्य चर्चा कृता विद्यते–

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।**
**मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्।।** (८/१२)

सर्वेषामिन्द्रियाणां द्वारमवरुध्य, अर्थात् वासनासमूहं संहृत्य मनोहृदये स्थिरीकृत्य, प्राणस्यार्थादन्तःकरणस्य व्यापारम् '**मूर्ध्न्याधाय**'– मस्तिष्के सम्यग् निरुध्य, 'ॐ' एतावन्मात्रमेव यदक्षर ब्रह्मणः परिचायकमस्ति, तस्य जपं मम ध्यानञ्च कुर्वन् यः देहं त्यजति, '**त्यजन्देहं**'– देहाध्यासस्य त्यागं करोति, सः परमगतिं प्राप्नोति।

महर्षेः पतञ्जलेरपि तात्पर्यमिदमस्ति यन्मुर्ध्नि स्थितेज्योतिषि संयमेन सिद्धपुरुषाणां दर्शनानि जायन्ते। परमतत्त्व परमात्मनः सम्यगवबोध एव नैष्ठिकीं सिद्धिः समुच्यते। तस्याध्वनि सम्भावितानां लघुदीर्घ सिद्धीनां स्तरमप्यसौ पारयति।

## प्रातिभाद्वा सर्वम्।।३३।।

प्रातिभज्ञानोत्पत्या संयमं विनैव योगिनः सर्वं ज्ञेयं सुतरां जानन्ति। प्रातिभ परमात्मनो निर्देशेन सञ्चालितं ज्ञानमस्ति। प्रातिभ ज्ञानोदयाद्विना केनापि प्रयासेन सहजतया समासीने स्वस्थाने सर्वं वेदितव्यं विदितं सञ्जायते। व्यक्ति विशेषस्यागमनात् पूर्वमेव महाराजास्तस्य विषये तद्वृत्तं सूचयन्तिस्म।

कदाचित् कदाचित्तु महाराजाः स्वगतं कथनं प्रारभन्तेस्म, "हूँ! सम्प्रति प्रस्थितः। श्वसुरालयतः कुद्रव्यम् (कूड़ा) नीत्वा समाव्रजन्नस्ति। अस्मै समुपवेष्टुं स्थानम्, भोक्तुमन्नम्। हलम्, हलवाहकम्, वलवर्दं संकेतार्थं साधनम् (ग्रामीण भाषा में चर्म निर्मित हंकना, पैना) देयं भविष्यति ददानि वा।" वयं चिन्तयामस्मः, यत् महाराजाः कस्मैजनाय कट्वप्रियं स्वगतं वचांसि श्रवयन्ति? किचित् कालान्तरं पञ्चषा महात्मानो दृग्गोचरी भूताः। दृष्टवा तान् महाराजेनोक्तम्, "प्रतीयते गेहे

क्षेत्रकर्षणं वपनं शालीनामारोपणमादि सर्वं कृषिकार्यं सम्पन्नम्, सम्प्रति धौतवस्त्रस्याग्रभागस्य, अचलां (साधुवेश प्रतीकवस्त्रम्), परिधाय तीर्थे भ्रमणार्थं चलितवन्त।" इत्थं कानि चिद्दुतवार वचनानि श्रुत्वा पलायनस्य कृतेऽपि निश्चये दर्शनार्थमागतानां महाराजेन सम्पूर्णा व्यवस्था क्रियते स्म।

कदाचित् कदाचित् महाराजाः सङ्केतं लभन्ते स्म यत् कश्चित् अच्छो महात्मा समागच्छन्नस्ति। अस्मान् सर्वान् सचेतयन् महाराजाः निर्देशं ददुः, "सावधानाभवतयूयम्, कश्चिच्छ्रेष्टो महात्मा समायात्याश्रमं न लङ्घयेत्।" तदनु विक्षिप्तवत् गोचरायितः कश्चित्, उक्तवन्तवन्तो महाराजाः अयमेव महात्मा। एनं सादरं विश्रामकक्षं प्रापय सेवां कुरुत महात्मनः। ततः स्वसमीपमासनं दत्वा तस्य कुशलक्षेम प्रश्नोत्तरानन्तरं साम्प्रतं कुत्र भवति विचरणम्? अनेन प्रकारेण महात्मनोः परस्पर वार्त्तालापे सत्संगस्य सूक्ष्मतत्वानां श्रवणस्य सौभाग्यमस्माकं कृतेऽपि भवतिस्म सुलभः। महाराजास्तत्रोपविष्टाः सन्तसर्वं तथ्यं जानन्तिस्माहर्निशम्।

**हृदये चित्तसंवित्।।३४।।**

हृदये जाते संयमे चित्तस्य स्वरूपज्ञानं भवति। तस्मिन् काले चित्तस्य स्वरूप कियत् सूक्ष्मं निर्मलं विकृतञ्च कियदिति, एतस्य सुस्पष्टं भवति बोधः। एतादृशे चित्तेन किमपि प्रकारकमुद्वेगः समुदेति न साधनायां किमपि परिवर्त्तनं भवति। अतो यदस्ति तत् प्रत्यक्षमेव।

**सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्स्वार्थसंयमात् पुरुषज्ञानम्।।३५।।**

सत्त्वेऽर्थात् बुद्धौ प्रसारित प्रकृतिपुरुषौद्वौ परस्परमत्यन्तभिन्नौस्तः। तयोः 'अविशेष प्रत्यय' अर्थादैक्यवत् स्थितिरस्ति भोगः, जीवस्यावागनमस्य जन्ममरणस्य वा कारणमस्ति। परार्थो यः परमधनस्योपलब्धौ क्रमोन्नत योगविधिरस्ति, तन्माध्यमेन स्वार्थेऽर्थादात्मिक संपदि संयम विधानेन पुरुषस्य ज्ञानं भवति। परमपुरुषः केवलमात्मा विद्यते, तस्य विशुद्धात्मस्वरूपस्य दर्शन सम्प्रसज्यते, तस्य विशेषतानां सम्भवति।

भजनस्य विधिः सएव पूर्वनिर्धारित विधिरस्ति। अभ्यासः करणीयोऽस्ति प्रणवस्य, ॐ इत्यस्य जपः, मात्र सद्गुरौ श्रद्धा, तपः, स्वाध्याय, ईश्वरप्रणिधान,

अष्टांगयोगस्य विधिवत् पालनम्, संयम स्वरूपस्य स्थितिपर्यन्तं यावन्ति साधनानि वर्तन्ते तेषामभिधानमस्ति परार्थ विद्या। अस्य परार्थ साधनस्य माध्यमेन यः स्वार्थं साधयितुं सफलो भवति, स्वार्थे संयमकरणेन '**पुरुषज्ञानम्**'– परमपुरुषस्य परमात्मनो ज्ञानं भवति। अधुना द्रष्टुः स्वस्वरूपेऽवस्थानमेव शेषायते।

**ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते।।३६।।**

तस्य स्वार्थ संयमस्य सिद्धे सति नैकाः सिद्धयः प्राप्यन्ते। यथा–

**१. प्रातिभसिद्धिः** – परमात्मनो निर्देशेन सञ्चालितं ज्ञानम्, येन योगिनः कस्माचित् प्रयासादृते समुपविष्टा सन्तः सर्वं ज्ञातव्यं जानन्ति।

**२. श्रावणसिद्धिः** – योगी दूरस्थानपि ध्वनीन् श्रोतुं शक्नोति। तस्य श्रवणेन्द्रिय दिव्यतामाप्नोति। स दिव्यमेवाकर्णयति।

**३. वेदनसिद्धिः** – योगिनः स्पर्श ज्ञानमपि दिव्यायते।

**४. आदर्शसिद्धिः** – योगी दिव्यरूपदर्शनप्राप्तौ भवति सक्षमः।

**५. आस्वादसिद्धिः** – योगी ब्रह्मरसामृतं पानं कर्त्तुं भवति सफलः। भौतिक षड् रसेषु तस्य रसना न किमपि स्वादं लभते।

**६. वार्तासिद्धिः** – वर्ति धातोरणि प्रत्यये कृते सति प्रथमा बहुवचने वार्त्ता शब्दः सिध्यति। सुगन्धार्थक धातो निष्पन्नत्वात् वार्ताशब्दः सुगन्धि द्योतको बोध्यः। योगी वार्त्तासिध्या दिव्यसुगन्ध्यनुभवे सिद्धहस्तो भवति।

उपर्युक्त सिद्धीनामजाते प्रादुर्भावे योगिभिस्तासु समनुरक्तिर्न विधेया। तेषां दृष्टिर्मात्रैक लक्ष्ये भवेत्। सिद्धयः साधनमुत्साहयन्ति, इमाः साधनापथि प्राप्ताः सुविधाः सन्ति। आसु समनुरक्तोभूत्वा साधकेन स्वकीयं प्रमुखं गन्तव्यं न विस्मर्त्तव्यम्। एतदर्थं महर्षिः सावधानं करोति–

**ते समाधावुपसर्गा व्युत्थाने सिद्धयः।।३७।।**

पूर्वोक्त षट्विधाः सिद्धयः समाधेः सिद्धौ, कैवलस्य प्राप्तौ च सन्ति विघ्नाः, समस्वरूपस्यादितत्त्व परमात्मनः प्रवेशमार्गे व्यवधानस्वरूपाः सन्ति, इमाः सर्वाः सिद्धयो योगमार्गस्य विभूतयः कथ्यन्ते, शोभास्वरूपा इमा दृश्यन्ते, किन्तु येषां साधकानां दृष्टिरस्ति लक्ष्यपरायणास्ते साधकाः पूर्वोक्तं सिद्धिवर्गं

नावलोकयन्ति। इमा विभूतयः साधके प्रविशन्ति हि, एतासां साधके समभिव्यक्तिरप्यावश्यकी, इत्थ साधकानामुत्साहवर्द्धनमपि भवति। किन्तु साधकश्चेदिमा विभूतिरेवोपलब्धिमुररीकृत्यैतासामुपभोगे समासक्तस्तर्हीमा विभूतयः कैवल्यप्राप्तौ तथैव सन्ति बाधिका यथा कामक्रोधरागद्वेषादयः। अतः साधकस्य दृष्टिः सदैव लक्ष्यानुगामिनी भवेत्। अनेनैव सह–

**बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः।।३८।।**

कर्म तथा तज्जनित संस्काररूप बन्धनकारणानां शैथिल्यात् तथा '**प्रचार संवेदनात्**'– चित्तस्य शान्तप्रवाहिताया अवस्थाया ज्ञानेन चित्तस्यापरकाये प्रवेशोऽस्ति सम्भवः। एवभूतचित्तमाध्यमेन कस्याप्यपरस्य जनस्य चित्तं स्वायतं कुरु, तदा तस्य मनसि प्रादुर्भूत संकल्पविकल्पानां ज्ञानं सुलभायते। इमं प्रयोगं पूज्य गुरु महाराजाः प्रायः कुर्वन्तः सन्तो वर्तन्तेस्म। अनुसुइयाश्रमं कश्चिदायातिस्म तदा ते गुरुचरणा मनस्येवोपांशु गुनगुनाकाराव्यक्तध्वनिना, '**काम रूप केहिं कारन आया।**' ते ध्यानद्वारा त्वरितं पश्यन्तिस्म, जानन्तिस्म, तथ्यमुदीरयन्तिस्म च "रे क्षलजीविन्! वकवत् कपटध्यानिन्, पटुपाखण्डिन्।" एतत् परगति ज्ञानप्राप्तिः संयमस्यैवास्ति स्तरविशेषः। परेषा शरीरं चिन्तनेनाबन्ध्य यदैव धारणं साधितं ध्यानं स्थिरायितं समाधौ सुरतसमोजातः संयमः सफलायितस्तदैवापरेषां मनोगतं भावात्यधिगतम्।

**उदानजयाज्जलपङ्ककण्टकादिष्वसङ्गउत्क्रान्तिश्च।।३९।।**

उदानवायुं जीत्वा तं स्वायत्ती कृतेन योगिनः सलिलपङ्ककण्टकादि संयोगो निवर्तते। तस्य भवति गतिरुर्ध्वगा।

उदानवायोः क्षेत्रं कण्ठादामस्तिष्कमस्ति, यदुर्ध्वोन्मुखं करोति गमनम्। वायुरयं जीवं पापपुण्यकर्मानुसारतः श्रेष्ठाधमयोनिषु प्रक्षिपति। अस्मिन् क्षेत्रे सिद्धे संयमे योगी संसारसागरस्य विषयविषवारिणा निलिप्तो सञ्जायते। कामक्रोधादि षड्विकाराणां शूलं तं योगिन न विध्यति न च व्यथयति। तस्य योगिनो गतिः प्रकृत्योन्मुखी नभूत्वा परमात्मोन्मुखीभूय भवति सम्यगूर्ध्वरेताः।

एकस्मिन् स्थाने सत्सङ्गस्यायोजनमासीत्, यथातु प्रायः सत्सङ्गे भवति तथैव श्रोतृगणा अभवन्निद्राक्रान्ताः। सत्सङ्गे प्रवक्ता महात्मोवाच– सत्संगात्

पुष्पाणि वर्षन्ति, सुगन्धाः प्रसरन्ति, पुष्पाणां मधुरगन्धेन श्रोतारो भवन्ति निद्रालवः। नृत्ये गीते च निद्रा न समायाति यतो हि तत्र कण्टक वृष्टिर्भवति। ते कण्टकाः कदाचित् लोभात्मकाः, कदाचिद्रागात्मकाः, कदाचित् कामात्मकाः कदाचित् द्वेषात्मकाः परिदृश्यन्ते। '**ते सब शूल नाम को जाना**' इमे शूलाः सन्त्यनंन्ताः। महापुरुषास्तेभ्यो सतत् भवन्ति निर्मुक्ता निर्लिप्ताश्च।

'**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।**' गीतायां भगवान् श्रीकृष्णः कथयति यत् येन प्रकारेण कमलपत्राणामुपरि लक्षाधिकास्तरङ्गा, आदिवसे समाव्रजन्ति गच्छन्ति च, किन्तु कमलपत्रं सलिल पङ्काभ्यां प्रभावितं न भवति, तथैव महापुरुषेषु विकारा इमे न प्रभवन्ति।

**समानजयाज्ज्वलनम्।।४०।।**

समानवायुं संयममाध्यमेन स्वायत्ती कृते सति योगिनः शरीरं दीप्तियुतं सञ्जायते। ज्योतिमयमस्ति परमात्मा, तस्य परमात्मनस्तेजो तस्मिन् योगिनि प्रस्फुटितं जायते। समानवायुः शरीरे हृदयादारभ्य नाभिपर्यन्तं सन्तिष्ठते। चित्तवृत्तिस्त्वस्त्येकं वायुमण्डलम्। यदा संयमः समवायु समत्वेन प्रवाहितकरणे भवेत् सफलस्तदा योगी सदसदुद्वेगाभ्यां न विचाल्यते ईश्वरीय तेजसोदीप्ति प्रस्फुरायते।

पूज्य गुरुमहाराजाः कथयन्ति स्म, "हो! मम शरीरं कृष्णं कृष्णतमो न जाने कीदृशमासीत्, किन्तु यस्माद्दिनात् स्वरूपे स्थितिः प्राप्ता तदातः शरीरं परिवर्त्तितम्।" '**अवधपुरी प्रभु आवत जानी। भई सकल सोभा की खानी।।**' अवधः इतीदं शरीरमस्ति यस्मिन्नवध्यस्थितेः सूत्रपातः कृतो विद्यते। अस्मिन् मानवदेहे यदा भगवतः प्रादुर्भावस्यायाति कालस्तदेदं शरीरं सम्पूर्ण शोभाधाम सञ्जायते। जीवश्रेणीकाः स्वभाव तिरोहिता जायन्ते, ईश्वरीय वायुमण्डलेन सह तस्य परमात्मनो विभूतय अवतरिता भवन्ति। चित्तं शान्तं समं भवति प्रवाहितम्। अस्यां समतायां सिद्धे संयमे चित्तेनोत्पद्यते समुद्वेगाः। '**ज्वलनम्**'- परमात्मनो ज्योतिर्मय स्वरूपस्य प्रभावशीलः प्रकाशस्तस्मिन् योगिवरे समुद्भासते, योगिनः शरीरं दीप्तिमानं भवति।

**श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम्।।४१।।**

कर्णाकाशयोः सम्बन्धे संयम सिद्ध्या योगिन श्रवणेन्द्रियं दिव्यतामावहति। संयमस्योन्नतावस्था सैव यदा श्रोत्रेन्द्रियं गगनात् शब्दग्रहणे समर्थो भवेत्। तदा श्रोत्रेन्द्रियस्य दिव्यता ज्ञेया, अलौकिकस्य वायुमण्डलस्य स्वायत्तीकरणस्य योग्यता सम्प्रसज्यते। श्रोत्रपदेन केवलं श्रवणेन्द्रियस्य संज्ञावबोधोनोचितः। बधिरत्वदोष युताजना अपि परमात्मनः प्राप्तिं कर्तुमर्हन्ति। या या प्रशक्तिः श्रोत्रेन्द्रियं श्रवणाय प्रेरयति, तस्यां दिव्यतायाः सञ्चारो जायते। एतादृश्यैकावस्था समायाति यत् **'बिन बाजा झंकार उठे तहँ, समुझि पड़े जब ध्यान धरे।'** प्रकृतेः कोऽपि ध्वनिः संगीतलहरीवा तं योगिनं प्रभावितं कर्त्तुं न क्षमते। तस्य श्रोत्रं दिव्यक्षमतायुतं सम्पद्यते।

**कायाकाशयोः सम्बन्धसंयमाल्लघुतूल-**
**समापत्तेश्चाकाशगमनम्।।४२।।**

**'कायाकाशयोः'**- शरीरस्याकाशस्य च सम्बन्धे संयमेन **'लघुतूल समापत्तेः'**- शरीरं तूलवल्लघु भवति तथा चाकाशे, एव सदा गतागतं कर्तुं शक्तिः समायाति। सुरतिराकाशवद्भवति, धारावाहिक रीतिमनुसरति। **'कोउ अवकाश कि नभ बिनु पावइ'** आकाशमेतादृशं द्रव्यमस्ति यत्र सर्वेजनाः शान्तिं विन्दन्ति। अयं कायाकाशचिदाकाशयोः संयमो योगमार्गे प्राप्त्यर्हा विभूतय सन्ति। अस्याः क्षमताया समागते सति देहाध्यासो निवर्तते।

**बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः।।४३।।**

बहिः सृष्टौ यत् किञ्चित् दृश्यते श्रूयते पठ्यते च तत्र कल्पनारहितवृत्तेः प्रवाहितभवनं महाविदेहावस्था समुच्यते। किमपि वस्तुजातं पुरतः समापतेत्, तदर्थं सङ्कल्पौविकल्पौ मा स्यातां यदीदं वस्तु किम्? अस्या महाविदेहावस्थायाः समागमनानन्तरं प्रकाशबाधकमावरणं व्यवच्छिद्यते, द्रष्टुः प्रकाशाभिलाषी साधकस्य चान्तरालस्थमावरणं क्षीयते। आवरणमासीत् सदसतोः संग्रहः, अधुना ग्रहणं निवृत्तं तदावरणं कुतः समागमिष्यति? बुद्धौ यावन्मात्रायामात्मप्रकाशः समुत्पन्नस्तथाग्रे। तद्बोधायाधुना वाधा समाप्ताऽभूत्।

गीतायां भगवता प्रोक्तम्-

**बाह्य स्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।**
**स ब्रह्मयोग युक्तात्मा सुखमक्षयमश्नुते।।** (५/२१)

बाह्य संसारस्य विषयभोगेष्वनासक्तः पुरुष अन्तरात्मनः सुखमासादयति। अत्र महर्षिः पतञ्जलिर्ब्रूते, यत् तस्य प्रकाशस्यावरणं विनश्यति, बुद्धावीश्वरीय प्रकाशस्यागमने यासीत् बाधा सामूद्दूरस्था। अग्रिमे सूत्रे प्रतिपाद्यते–

**स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः।।४४।।**

स्थूलस्य, स्वरूपस्य, सूक्ष्मस्य, अन्वयस्य, अर्थवत्त्वस्य च– ऐषु पूर्वोक्ताषु पञ्चस्ववस्थासु संयमविधानेन '**भूतजयः**'– सकलभूतेषु विजयोपलब्धिः। गीतायामस्ति, '**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। ( १८/६१ )** सर्वेषां भूतानां हृदये निवासोऽस्तीश्वरस्य। भूतस्यास्त्यर्थो जीवितः प्राणी। किन्तु जीवितप्राणिमां मूलकारणभूतानि पञ्चमहाभूतानि (आकाशम्, पृथ्वी, अग्निः, जलम्, वायुः) एतेषां पञ्चमहाभूतानां शब्दगन्धरूपरसस्पर्शेति पञ्च तन्मात्राः स्थूल स्वरूपाणि सन्ति भूतानाम्। यत्रैतेषां दृश्यं दृष्टिगोचरायते तत्र स्वरूपस्य प्राकट्यम्। दृश्यमवलोकितं तदस्ति स्थूलम्, स्वरूपस्य जाते स्पष्टीकरणे तेषां सूक्ष्मावस्था बुद्धियथायिता। तेषामन्वयः तानि सर्वाणि पञ्चभूतानि पृथक् पृथक् विश्लिष्य निरीक्षणमपेक्षते। अन्तिमावस्थार्थतत्वमर्थात्तस्य गुणवत्ता, तत्र वस्तु सजातीयं विजातीयं वेति प्रयोजनवत्ता। अस्य स्वरूपं यत् प्रकटितं तत् क्लेशोन्मुखं नाययति इदमस्ति क्लिष्टम्। यदास्याः अवस्थायाः संयमो सम्पद्यते तदा तदा पञ्चमहाभूतानां विश्लेषणार्हा क्षमता समायाति, तदाभूतानामुपरि विजय-प्राप्तिर्भवति। अयं संयमः क्रमबद्धो भवति। स्थूलरूपं यदा दृष्टिगोचरायितम्, श्रवणगोचरायितम्, स्थूलरूपं समक्षमागतम्, तस्य स्वरूपं कीदृशम्, तस्यान्तराले गाम्भीर्यस्य रहस्यं कियन्मात्रम्, सूक्ष्मता का, विश्लेषणं किम्, प्रयोजनञ्चास्ति किम्? तत्प्रयोजनं सम्यग् बुद्ध्वा बोधोत्तरं यः संयमे प्रवृत्तः स सर्वदास्वरूपोन्मुखधिष्यते। इत्थं पञ्चभूतोपरि विजयोपलब्धिः। एभिरिन्द्रियैः समुत्पन्नमिन्द्रिय ग्राह्यं किमपि दृश्यं योगिनं भ्रामयितुं न शक्नोति, अनेन सहैको विशेषो लाभः सुगमः।

**ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च।।४५।।**

उपर्युक्त भूतजयेनाणिमाद्यष्टसिद्धीनां प्राकट्यम्, काय सम्पदः प्राप्तिः, उक्त भूतानां धर्माद्बाधाविरामः– इत्युक्त त्रिधायोग्यता साधके समायाति। शास्त्रेषु अणिमा, लघिमा, महिमा, गरिमा, प्राप्तिः, प्राकाम्यम्, वशीत्वम्, ईशीत्वम्,

इति क्रमेणाष्टौ सिद्धयः सन्ति वर्णिताः। अष्टधामूलप्रकृतावष्टसिद्धिनां सञ्चारः सम्प्रसज्यते।

सूक्ष्मातिसूक्ष्म वस्तूनां ज्ञानमणिमा सिद्धि समुच्यते। महापुरुषाणां बालवत् स्वभावो लघिमा कथ्यते। यस्याः सन्दर्भे काऽपि सेवा लघ्वी नास्ति। भगवान् श्रीकृष्णः पत्रपात्रं (पत्तलं) अपसारयितुमारभते, भगवान् बुद्धोरोगिणमेकं शिष्यस्नापयति तथौषधिं पाययति। पूज्य महाराजाः व्यथाव्यथितं व्याकुलमेकं शिष्य स्वचरणेन मर्दयामाससेवितः। साधकः ससंकोचमुक्तवान्– महाराज! आप्तो भवान् मां मा स्पृशतु।' किन्तु महाराजेन गलप्रदेशादारभ्यापादं द्विचतुरावृत्या नीपीड्य कथितम्– पश्य नगदो भविष्यति त्वरितम्, पीडापि क्षणानन्तरं पलायिता। ईश्वरस्य महिमा साधके समाविशति, तस्य महिम्नो प्रसारो भवितुमारेभे। संयम सिद्ध्युत्तरं दत्तात्रेयस्याश्रमे जनसमर्दस्य बाहुल्यात् भजनेकीर्तने व्यवधानोपस्थित्या दत्तात्रेयो भगवन्तं प्रार्थयामास, यद् हे भगवन्! इयती जनसंख्या मां कथमनुसरति? भगवतोक्तम्, "तव हृदयेऽहमुपस्थितोऽस्मि, एतदर्थं लक्ष्मीः श्रीमन्तं सेवितुं कामयते।" गरिमासिद्धिरूपेण साधके गौरवपूर्णा समायात्यवस्था। बाधां विनेच्छित पदार्थानामापूर्तिः प्राकाम्यमस्ति। पूज्यदेवा बाम्बे विचरणकाले ठेलोपरि नारिकेलराशिमवलोक्य खादितुमियेष, किन्तु नासीत् पणकमतोऽग्रे गतवन्तस्तथैक नारिकेलद्रुमाधः समुपविष्टाः। तस्मिन्नेव काले, एको वायस उक्त ठेलास्थ नारिकेलराशितः शकलमेकं नारिकेलस्यादाय तस्मिन्नेव वृक्षे तस्थौ। नारिकेल शकलं काक चञ्चुस्त्रस्तः गुरोः समक्षं पपात। दक्षिणोदरे पादे चारेभे स्पन्दनम्, यस्यासीदाशयो यद् गृहीत्वा गरीखण्डं खादय। "**जो इच्छा करिहउ मन माहीं। हरि प्रसाद कछु दुर्लभ नाहीं।।**" सर्वेषु भावेषु स्वामित्वमीशीत्वं समुच्यते, यथा गीतायां क्षत्रिय स्वभाव प्रकरणे वर्णितमस्ति– "**दानमीश्वर भावश्च क्षात्रकर्म स्वभावजम्।। (१८/४३)** इन्द्रियाणां मनसश्च सदैव वशे स्थितिर्वशीत्वं समुच्यते।

'**तद्धर्मानभिघातश्च**'– तेषां भूतानां विषयाः शान्तास्तस्मानजायते धर्मे किमपि व्यवधानम्। कायसम्पदः स्वरूपं सूत्रकारेण स्वयं प्रस्तुतम्–

**रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्।।४६।।**

रूपलावण्यम्, बलम्, बज्रवत् कायसंगठनम्- इतीमानि शरीर सम्पदः सन्ति। संयस्यैव क्रमेणोच्चैस्तरं गते साधके कान्तिः सौष्ठवञ्च समायाति। महापुरुषाणां निवृत्यनन्तरं रोगा भवन्त्येवनहि। एतादृशाः योगिनः कृपालुतया कस्याप्यपरस्य रोगं स्वयं स्वीकार्य रुग्णाः सन्ति भवितुं नान्यथा।

पूज्य महाराजस्य जीवनसम्बन्धिन्येका घटनोक्त तथ्यं समुद्घाटयति। पूज्य गुरुदेवा आसनासीना आसन्। एकस्मिन् दिवसे समीपस्थ ग्रामस्यैवः पण्डितः समाययौ प्रणामं कृतवान्। पण्डितो परिदृष्टिपात् समकालमेव गुरुमहाराजेन पाण्डेयो कथितः- पाण्डेय महानुभाव! सुन्दरमागमनं भवतां, शष्कुलीं परिपाचय। तेनोक्तं महाराज! अहन्तु म्रियमाण इवास्मि। ममतु हस्तोनोत्तिष्ठति। न जाने किमभवत् दिनद्वयान्निद्रानायाता।

महाराजेनोक्तम्- करमितः कुरु। पूज्य महाराजेन तस्य हस्तं गृहीत्वा तस्य करं वारद्वय निपीड्य दृष्टवान् भणितञ्च- विभूतिं भुङ्क्ष्व, गच्छ च सोहालिकां परिपाचय। तेन निर्मितो शष्कुली, भुङ्त्वा भोजयित्वा गृहं जगाम। किन्तु महाराजस्य करे पीडा प्रारम्भा। नवमे दिवसे तु न दिने न च रात्रौ पीडा पिण्डं जहौ। उष्णजलसिञ्चनेन मनाक पीडा विरमतिस्म, प्रतीयतेस्म कल्प्यतामस्थि मध्यतो व्याधिः (फोड़ा) निस्सरन् भवेत्।

गुरुदेवो भगवन्तं पप्रच्छ, "यदायाता निवृत्तिः, पापानि निरस्तानि तदेय मृत्युसदृशकष्टप्रदापीडा किमर्थम्?" भगवतोक्तम्, "द्वादशमासावधिका पीडा कष्टं पाण्डेयेन भोग्यमासीत्, तस्य रोगं भवता गृहीतमतः। द्वादश मासस्थाने द्वादशदिनं यावत् स्वीकृत कष्टमनुभवतु। भगवता कथितम्- कुरुत गणनां कति दिनेभ्यो व्याधेराम्भः? शिष्याः कथितवन्तः- यदद्य नवमो दिवसः। मामहाराजेनोक्तं दशमः, एकादशः, द्वादशः, इति त्रयोदिवसाः पीड़ाभोगस्य सन्ति शेषाः। द्वादशे व्याधिर्विदीर्णा पीडासमाप्ता। एवंभूतानां कतिपय घटनानां पश्यात् कमप्यागतं दुःखिनं महाराजः न स्पृशन्तिस्म। केवलमजस्र प्रदहदग्निधूनितो भस्मप्रदानं कुर्वन्ति स्म, एतेनैव क्लेशाद्भवति स्म मुक्तिः।

**ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः।।४७।।**

ग्रहणम्, स्वरूपम्, अस्मिता, अन्वयः, अर्थवत्त्वम्, इत्येतेषु पञ्चस्वस्थासु पृथक्पृथक् संयमविधानेन मनःसहितसकलेन्द्रियेषु भवति विजयप्राप्तिः।

इन्द्रियाणामस्ति कार्यं स्वस्व विषयस्य ग्रहणम्। चक्षुभ्यामवलोकितो विषयः गृहीतः, श्रवणं कर्णयोग्रहणमस्ति, स्वादस्यावबोधो रसनाग्रहणमस्ति, नासिका गन्धं गृह्णाति। ग्रहणेन तेषां वस्तूनां स्वरूपं भवति सुस्पष्टम्। अस्मिता तेषां वस्तूनां सदसदुपयोगस्यास्ति मिश्रणम्। अन्वये वस्तुनो विश्लेषणम्, तथार्थवत्त्वे वस्तूनां प्रयोजनस्य क्रियते विचारः यदीदं क्लिष्टमक्लिष्टं वा अनेन प्रकारेण विश्लेषणमाध्यमेन साक्षात्करणात् भवतीन्द्रियाणामुपरि विजयः।

अयमेव भावो रामचरितमानसस्य निम्नपङ्क्तिषु द्रष्टव्योऽस्ति–

**जड़ चेतन गुण दोषमय, विश्व कीन्ह करतार।**
**सन्त हंस गुन गहहिं पय, परिहरि वारि विकार।।** ( १/६ )

* * *

**भरत हंस रविवंश तड़ागा।**
**जनमि कीन्ह गुण दोष विभागा।।** ( २/२३२/३ )

भरते सा क्षमतासीद्विद्यमाना, हनुमत्यपि क्षयतेयं तथैवास्ति। तस्य समुद्रलङ्घनावसरे सिंहिका नाम्नी निशाचरी मिलिता, सा तस्य छायां गृहीत्वावरोधं कर्त्तुमियेष। हनुमता तस्याः कपटव्यवहारोज्ञातः, "**ताहि मारि मारुत सुत वीरा। वारिधि पार गयउ मतिधीरा।।**" तं मारयित्वा पराजित्यवा जगामाग्रे। इत्थं विवेकपूर्वक संयमेनेन्द्रियोपरि मिलति विजयः। साधके यदा सदा सावधानता भावस्य क्षमता समागच्छेत् तदेन्द्रियो परि भवति विजयः। इति स्थितौ इन्द्रियाणि विकारोत्पादनेन साधकं पथभ्रष्टं कर्त्तुं न क्षमन्ते। यतोहि साधकः सर्वेषामिन्द्रियाणां गतिविधौ प्राप्तपरिचयोऽस्ति अतस्तानि भ्रमयितुं न शक्नुवन्ति।

**ततो मनोजवित्वं विकरणभावः प्रधानजयश्च।।४८।।**

तदिन्द्रिय जयानन्तरम् '**मनोजवित्वम्**'- मनसस्तुल्या गतिः, '**विकरणभावः**'- शरीरं विनापि विषयाणामनुभवकरणस्य सामर्थ्यम् तथा च '**प्रधानजयः**'- प्रकृतेरुपरि प्रभुत्वम्, इतीमास्तिस्त्रोयोग्यताः साधके समायान्ति।

इन्द्रियाणामुपरि विजयेन '**मनोजवित्वम्**'- मनस्येव साधना भवति गतिशीला, साधकोऽसौ वहिर्न किञ्चिच्चिन्तयते। यदागतिर्मनस्येव जातानिलीना

तदा शरीरस्य सम्बन्धो विभिद्यते। अत्रैव शरीरं विनापि विषयवस्तुनो ज्ञानमाकलयति।

वैष्णवसाधोर्नाभादासस्य गुरुध्याने समासीन आसीत्। तस्य कस्यचिद्भक्तस्य नौः समुद्रे विपन्नाजाता। भक्तेन गुरुंप्रति प्रार्थना सम्प्रेषणं कृतम्। गुरुदेवः संत्रस्त आसीत् यत् कश्चित् सङ्कटापन्नो विद्यते। नाभा महानुभावो गुरुकक्षतो बहिष्ठः सेवायां तत्पर आसीत्, यत् गुरोर्भजनेन कोऽपि समुपस्थापयेत् बाधाम्। नाभानामक साधकेनोक्तम्- महाराज! भक्तस्य तरणिः संकटाद्बहिरागता, अधुना चिन्तात्याज्या भवता। गुरुः कक्षातो बहिरागतः कथितवान् च- "अयं तु मम नाभिस्य वृत्तं ज्ञातवान्। ममान्तर्मनसः समाचारं ज्ञातवान्, अतोऽद्यस्तवनाम नाभाजी निश्चीयते। सम्प्रति तवोपरि मात्रैको ऋणः शेषोविद्यते, अष्टोत्तरशत मणिकायुतां मालां मां परिधायय।" आध्यात्मिकसत्पुरुष आसीत् नाभा महान्। स विचारितवान् यत् वस्तुतो मनसो माला सर्वोत्तमा। ये साधकाः कृतवन्तो मनसो निरोधस्तेषां महापुरुषाणां जीवनचरित्र विलिख्य गुरवे समर्पितवान्। सो हि लिखितो लेखो भक्तमाल नाम्ना ख्याति लेभे। स विनाशरीरं सर्वं ज्ञातवान्।

**सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च।।४९।।**

सत्यसंयुक्तबुद्धेस्तथा पुरुषस्यार्थात् चेतनात्मनः, इत्युभयोर्भिन्नता मात्रस्य ज्ञानं यो धारयति, सबीज समाधिसिद्धः एवंभूतो योगी सर्वेषु भावेषु स्वामिभावं सर्वज्ञस्य भावञ्चादधाति। एतादृशा योगिनः केवलं मनसा सहितमिन्द्रियसमूहोपर्योवनहि प्रत्युत् समस्त प्रकृतेरुपरि नियन्त्रणं करोति। परमतत्त्वतः केवलं मेलनमेवावशिष्यते शेषः, कस्मिन्नेव क्षणे प्राप्तिः सुशका। सर्वज्ञतास्थायीभावापि मार्गस्य विभूतिमात्रमेवस्तः। एष्वपि वैराग्यमयेक्षते। अत उपरि पश्यत-

**तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्।।५०।।**

पूर्वोक्त सिद्धिसमूहं प्रति समुत्पन्ने वैराग्ये, दोषाणां बीजस्य क्षये जाते सति कैवल्य पदस्य प्राप्तिर्भवति। बुद्धौपुरुषे च अर्थात् सेवकेस्वामिनि च

लेशमात्रमपि भिन्नता अवशेषास्ति तर्हि क्वचिन्न-क्वचित् विद्यते रागः, बीजस्य दोषो वर्तते, कुतश्चित्तु ग्रस्तोऽस्ति। यदा तस्मिन्नपि समभवद्वैराग्यं तत्र दोषः समाप्तिं गतः। दोषबीजक्षये सति स कैवल्यपदं लभते। इत्युन्नतावस्थायामपि लोकसंसर्गस्य विघ्नाः समाव्रजन्ति, तेभ्यः संरक्षणाय सावधानं क्रियते-

**स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्।।५१।।**

योगी यस्यां भूमिकायां वर्तते, तस्या भूमिकायाः शक्तयस्तं प्रलोभितं कर्तुं यतन्ते। तत्र स्थानीयाधिकारीभिः प्राप्ते सम्मानेऽपि तेषु रागः अभिमानो वा नकर्तव्यः, यतो हि तन्माध्यमेन पुनऽर्निष्टोद्गमः सम्भवोऽस्ति। यदा योगिनि सर्वज्ञतादि गुणाः प्रविशन्ति, तदा उक्त शक्तीनामधिष्ठातृ देवता भोगानां सुखं प्रदर्श्य अथवा योगिनः प्रशंसामाध्यमेन तं साधकं बध्नन्ति।

महाराजः मनुर्यदा भजनं कर्त्तुं आरेभे, देवाधिदेव ब्रह्मा, विष्णुशिवौ च तदन्तिकं आजग्मुः, ऊचुः- वरं ब्रूहि! '**बहु भाँति लुभाए**' वस्तुतः किमपि ददानाः नासन् प्रत्युत कामक्रोधलोभमोहमदमत्सरा इव षडविकारेषु लोभस्य सम्बर्द्धनं कुर्वाणाः तस्थुः, परन्तु परमधैर्यशीलः मनुर्नबभूव विचलितः। क्षणानन्तरं बभूव नभोवाणी मनुश्च सर्वस्वं प्राप्तवान्।

साधकेन सावधानतया वर्तितव्यम्, तैः प्रलोभनं परित्यक्तव्यम्। तैः साधकैः स्वमनसि भूयोभूयः एतच्चिन्तनं कर्तव्यं यत् जन्मजन्मान्तरेभ्यः कर्मणां भोगं कारकारं परमसौभाग्येन प्राप्तः मानवदेहः। ईश्वरस्य परमानुकम्पया योगपथि लभ्यन्ते सफलताः। इमे भोगाः सन्ति क्षणभंगुराः। इमे भोगाः सर्वदा नस्थास्यन्ति। साधनमार्गात् च्युति समकालमेव एतेऽपि तिरोहिताः भवन्ति। भोगेषु दुःखस्य स्वरूपमवलोकनियम्। स्मयः अर्थात् आत्मप्रशंसाभावोऽपि नोदियात् यत् सम्प्रति तु राजपुरुषा मम चरणं क्षालयन्ति, देवापि सत्कुर्वन्ति। अहं कामपि प्रोन्नतां स्थितिं प्राप्तोऽस्मि। भोगेषु मासक्ति स्वोच्चस्थितेर्हंकारश्च इति दशाद्वये पुनर्निष्टस्य सम्भावना प्रतीयते। कैवल्यार्थं विवेकज्ञानं परमावश्यकम्-

**क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्।।५२।।**

क्षणे तत्क्रमेण संयम विधानेन विवेकजन्यं ज्ञानमुतपद्यते। प्रथम क्षणस्य पश्चात् द्वितीय क्षणागमनस्य यः क्रमोऽस्ति, तयोर्न्तराले अर्थात् प्रथमद्वितीय

क्षणयोर्मध्यकाले नान्यः सङ्कल्पः समुदीयात्। आगतः श्वासस्तदोम्, गतस्य श्वासस्तदोम् अस्य क्रमोच्छेदो माभूत्, विघ्ना नागच्छेयुः। यदा क्षणे तत्क्रमेच संयमः सिद्ध्यति तदा विवेकजनितं ज्ञानं लभ्यते। देवतावर्गतः स्वर्गिकभोग प्रलोभतः शक्तिप्रसुताहङ्कारतः रक्षणाय क्षणमनुक्षणं संयमः संरक्षणीयः। तत्र संङ्कल्पानां प्रवेशोरोधव्यः। अस्य विवेकज्ञाने लाभः?–

**जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः।। ५३।।**

जातेः लक्षणस्य देशस्य च माध्यमेन भेदस्य निश्चये जातेः सन्देहान्विते उभयोः सदृश वस्तुनोर्निश्चयो तद्विवेकज्ञानेन भवति। विवेकज्ञानतः समुत्पन्नावस्थायां जातिलक्षणदेशभेदैश्चापि परिवर्तनं नानेतुं शक्यते। चित्तवृत्तेरेकप्रकारत अन्यावस्थायां परावर्तनं जातिपरिवर्तनमस्ति। एवं क्रमिकपरिवर्तनमाध्यमेन साधकः लक्ष्यपर्यन्तां दूरीं समापयति। एवंभूत कस्याश्चिदवस्थाया अनन्तरं यदि शरीरस्य निधनं जातं तर्हि साधकोऽयं जन्म गृह्णाति। इदम्प्येकं जातिपरिवर्तनमस्ति। किन्तु विवेकज्ञानोत्तरं जातिभेदतः, तस्यानुरूप लक्षणतः, देशपरिवर्तनश्चापि विवेकज्ञाने न्यूनता नागच्छति। तस्य विवेकज्ञानस्य विशेषता वर्ण्यते यत् स उद्धारको भवति–

**तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्।।५४।।**

इदं विवेकजं ज्ञानं संसारसागरात् उद्धारकर्ता, सर्वज्ञः, विविधप्रकारेण बोधकर्ता, काञ्चित पूर्वपरम्परां विनाथवा सहयोगं विना ज्ञाता भवति। अतः परं कैवल्यस्य च समागच्छत्यवस्था–

**सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्।।५५।।**

यदा चित्तपुरुषयोरुभयोः समानरूपेण शुद्धिः सम्पद्यते, उभौ समत्वे स्थितौ भवतस्तदा कैवल्य जायते। इत्थमत्रैव तृतीयपादः समाप्तो भवति।

अस्याध्यायस्येकोनपञ्चशत्तमे सूत्रेऽस्योल्लेखो विहितो विद्यते। बुद्धौपुरुषे च किञ्चिदन्तरमासीत्, अन्तरमात्रस्यैव भानमासीत्, यदानयोरेवं शुद्धि सञ्जाता यदुभौ समानौ बभूवतुः, न सत्यपरायणा बुद्धिर्भिन्नास्ति न पुरुषः तदा तत्कैवल्यमस्ति।

एतदेव श्रीमद्भगवद्गीतायां वर्तते–

**इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।**

**निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः।। ( ५/१९ )**

येषां पुरुषाणां मनः समत्वे स्थितमस्ति, तैः पुरुषैः संसारो विजितो जीवितायामवस्थायाम्। यतो हि तद् ब्रह्म निर्दोषं समञ्चास्ति। इतस्तेषां मनोऽपि निर्दोष समस्थितियुतञ्चाभूत्– **'तस्माद् ब्रह्मणि ते स्थिताः।'** एतस्मादसौ ब्रह्मणि स्थितो भवति। अस्यैव नामा पुनरावर्ती परमगतिरस्ति। इन्द्रियेषु मनसि च सम्यक् प्रकारेण कृते सत्यपि विजये बुद्धिपुरुषयोः किञ्चिदन्तरं विद्यत एव। तस्मिन् समये सर्वज्ञतास्वामीभावादि समुपलब्धयस्तिष्ठन्त्येव। बुद्धिपुरुषयोश्चात्यन्तं शुद्धे भूते सति समागच्छति साम्यावस्था। उभयोर्भिन्न करणं न कदापि शक्यम्। बुद्धेः स्थाने पुरुषः संस्थितोऽस्ति, बुद्धिः पुरुषे समाहिता वर्तते, अस्यैव नाम कैवल्यमस्ति। इत्थमस्मिन् तृतीयाध्याये क्रमतः संयमोत्कर्षेण सह प्राप्तव्यानां विविध सिद्धीनां वर्णनमस्ति, याः सर्वा विभूतिसंज्ञया वर्णिताः। अतोऽस्याध्यायस्य नाम विभूतिपादोऽस्ति। एतासामन्तिमं लक्ष्यं कैवल्यमस्ति।

कैवल्यस्य चर्चा प्रथमाध्यायेऽपि वर्तते। अत्र तु कैवल्यस्य सविस्तारं वर्णनं कृतम्, किन्त्वेतदपि ज्ञानमस्त्यावश्यकं यत् कास्काः परिस्थितिः पारयित्वा साधकः प्राप्नोतीमां स्थितिम्। अस्तु अग्रिमो पादः कैवल्यमस्ति।

## निष्कर्षः

अष्टांग योगसाधनायास्त्रीण्यङ्गानि धारणाध्यानसमाधि संज्ञकानि विभूतिपादस्याङ्गानि सन्ति, यतोहि एषु स्थित्या सहैव योगविभूतिनां प्रस्फुटनं भवितुं प्रारभते। धारणायां ध्येयस्यागते सत्येव ध्यानरूपेणवृत्तिरेकतार क्रमत प्रचलितुं लगति। लक्ष्यमात्रस्याभासः शिष्यते। इत्थं समाधेरवस्था समागच्छति। क्रमशस्त्रिकस्य सिद्धे सति संयमः समुदेति। अस्य संयमस्य सिद्ध्यनन्तरं विभूतयो भवन्ति प्राप्त्यर्हाः। इमा विभूतयः क्रमानुगताल्पाधिकावस्थानुसारेण प्राप्यन्ते। **'त्रयमेकत्र संयमः।'** ( ३/४ ) अयं संयमश्चेद्वारमेकं सिद्धिं गतस्तदा सर्वदा सुरक्षितः सन्तिष्ठते।

योगदर्शनस्यास्मिन् तृतीयेऽध्याये धर्मस्याभिधानं प्रथमवारं कृतं विद्यते। यत्र वृत्तीनां निरोधे, समाधौ, एकाग्रतापरिणामे च संयमो भवति, तम संयमं धर्मलक्षणमवस्था परिणामपि च कथयन्ति। चित्तवृत्तेर्निरोधो योगोऽस्ति, अत्र च निरोध परिणामः प्रत्यक्षमस्ति, तदा धर्मशब्दस्याभूदुच्चारणम्। अस्य पादस्य चतुर्दशतमे सूत्रेऽस्ति, अतीते वर्तमाने भविष्ये योऽनुगतः एकरसः शान्तः प्रवाहितो वर्तते स धर्मोस्ति। यस्तमनुगतं जानाति, स धर्मेस्ति। पञ्चचत्वारिंशत्तमे सूत्रे पुनः धर्मस्यास्ति प्रयोगः। भूतार्थात् क्षितिजलपावकगगनसमीराणां पञ्चमहाभूतानां पञ्चतन्मात्राः रूपरसगन्धशब्दस्पर्श सन्ति, एतासां विजयेन तत् कृत्य शान्ते सति धर्मे नायाति बाधो यतो हि एता एवासन्नवरोधकाः। यदैताः शान्ता बभूवुस्तदा धर्मो भवति निर्बाधः। निरोधःश्चोभयमेकातायाः पर्यायभूतौस्तः।

धर्मे, लक्षणे, अवस्थापरिणामे च संयमसिद्ध्यातीतवर्तमानयोर्ज्ञानं जायते। किन्तु '**प्रातिभाद्वासर्वम्।**' ( ३/३४ ) प्रातिभमर्थात् परायां वृत्तिरेकरसाप्रवाहिता वर्तते। एवंभूतस्य योगिनः कृते केनापि प्रयासेन विना सर्वावबोधो जायते। पूज्य गुरुदेवस्य दिनचर्यायामीदृशान्युदाहरणानि प्रायो मिलन्त आसन्। कस्याप्यागन्तुकस्य हिताहितयो विवरणमागन्तुका गमनात्पूर्वं महाराजा जानन्तिस्म। कदाचिदर्द्धरात्रौ महाराजा निद्रातः समुत्थायोपविशन्तिस्म, कथयन्तिस्म च "देखो (पश्यत्), कश्चिद्भयाक्रान्तश्च चलदागच्छति।" तावत् कश्चिदवश्यमेवायातिस्म।

शरीरस्थो वायुः पञ्चभागेष्वस्ति विभक्तः- प्राणापानव्यानसमानोदानरूपाः। प्रस्तुते पादे, उदानसमानयोरनयोरुभोर्नाम चर्चिते वर्तते, ये साधनानुकूलेऽस्त द्वेऽभिधाने। उदान जयात् प्रकृतिकण्टकेभ्यो मुक्तिस्तथोर्ध्वगतिप्राप्तिः समान जयाच्च ज्योतिर्मयस्य प्रकाशोलब्धुमारभते।

'**बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः।**'- बहिर्देशे दृष्टश्रुतवस्तुषु वृत्तेः कल्पना राहित्यमस्ति महाविदेहावस्था। किमाकार कमपि दृश्यं दृष्टिपथमागच्छेत्, कीदृशोऽपि शब्दः श्रुतिगोचरो भवेत्। दृश्यश्रव्योभयोः सदसदरूपद्वयप्रभावयोर्विषये माभूत् लिप्तता। एवंभूताया महाविदेहावस्थायाः

प्राप्ते सति प्रकाशस्यावरणं भवति नष्टः। ज्योतिर्मयप्रकाशस्वरूपोऽस्ति द्रष्टा। द्रष्टुः साधकस्य मध्ये या यवनिका सा निरस्ता जायते।

भूत जयादष्टसिद्धिस्तथा कायसम्पदः प्राप्तिर्भवति। भूतजयेन भूतानां विविध कृत्यानि भवन्ति शान्तानि। अतो धर्मे न जायते बाधा, बुद्धिः सत्येन संयुता भवति, परम चेतन पुरुषस्य पृथक् प्रतीति मात्रमवशिष्यते। एतादृशायां सबीजायां समाधौ योगिनः सर्वभावोपरि स्वामीभावेन सह सर्वज्ञानं सञ्जायते। अस्मात् स्वामिभावात् सर्वज्ञासिद्धितश्चापि जाते वैराग्ये कैवल्यपदप्राप्तिर्भवति। किन्तु तस्मिन् समये बहवो विघ्ना समायान्ति, देवानां लोकपालानाञ्च समायान्त्यामन्त्राणि। अयमपि योगसाधनाया मात्रैकोऽस्ति स्तरः, न तु लक्ष्यम्। साधकेन भोगेषु रागरहितेन भवितव्यम्, न च स्वस्थितौ गर्वः करणीय। रागगर्वाभ्यां पुनः पतनस्याशंकाधिकायते।

रागभोगादि विघ्नजालेभ्यो मुक्ते सति चित्तस्यैकतारचिन्तने प्रवाहिते सति क्षणानुक्षणयोः क्रमे संयमः सिद्ध्यति, तदा विवेकजं ज्ञानं भवति। आगते श्वासे 'ओम्' गते श्वासेऽपि 'ओम्' नापरो विकल्पः प्रादुर्भवेत्। इयं क्षणानुक्षण क्रमे संयमस्य साधना समुच्यते। इति स्थितौ विवेकजं ज्ञानं प्राप्यते। तद्विवेकजन्यं ज्ञानं संसारसागरात्तारयति। सर्वं सर्वप्रकारेण ज्ञाता स एव।

सत्वसंयुक्ता बुद्धिरर्थात् साधकः पुरुषश्च भिन्नौभिन्नौस्तः एवं भिन्नत्वाभासो यदा समत्वे भवेत् स्थितः, तदैतस्यां स्थितौ साम्यावस्थायां कैवल्यप्राप्तिर्भवति। एतत् सर्वं योगजन्यमस्ति, साधनात्यन्तनिर्मले सति जायते। योगसाधना माध्यमेन सहस्राधिकाः सिद्धयः सन्ति सुलभाः। एतासु सर्वासु सिद्धिषु कैवलस्य सर्वोच्च स्थानमस्ति। यस्मिन् विषये महर्षि योगदर्शनस्य चतुर्थपादे सम्यक् विचारं कृतवान्।

।। ॐ ।।

।।ॐ श्री परमात्मने नमः।।

# चतुर्थोऽध्यायः – कैवल्यपादः

महर्षिपतञ्जलिप्रणीत योगदर्शनस्य प्रथमपादः समाधिपादोऽस्ति। **सम्यक् अधीयते मनः यस्मिन् स समाधिः–** यत्र मनः सम्यक् प्रकारेण समाहितं भवेत् सा समाधिः। समस्यादितत्त्वेन सह समत्वप्राप्तिः समाधिरस्ति। चित्तस्य स्वरूप शून्या स्थितिः, ध्येयमात्रस्य प्रतीतिः समाधिः ज्ञेया। यथा साधकः स्वरूपे संस्थितो भवति, अभय पदस्य प्राप्तिर्भवति। इयमेव समाधेरुत्तमोत्तमं फलम्।

यदा कस्यचिद्वस्तुनः फलं भवति घोषितं तदा तत्र रूचिरुत्पन्ना भवति, तदैव तमासादयितुं प्रयतत इच्छुकः। एतदर्थं समाधिपादस्य वर्णन सर्वप्रथमं कृतम्। यदा बोधे समायाति यदिदं सत्यमस्ति, तदा तस्य साधनार्थं साधनपादः। यत्राष्टाङ्ग योगाः, तेषां योगानां साधनायाः प्रस्तुतिः सविस्ताराः सुवर्णिताः। एवन्तु प्रायः प्रत्येकमध्याये वर्तते साधनायाः समुल्लेखः। नामरूपाभ्यास-वैराग्यप्रभृतिसाधनाः साधकस्य क्षमतानुकूलाः सन्ति वर्णिताः किन्तु साधनपादे साधनायाः स्वरूपं सुस्पष्टायते।

तृतीयाध्याये विभूतिपादश्चर्चितः। साधनेन यदा संयमः सिद्धो भवति, तदा विभूतयः प्रादुर्भवन्ति। विभूतय अर्थादैश्वर्याणि। योगेन प्राप्ताहार्ण्यैश्वर्याणि प्रकटयितुमारभन्ते। भगवतः शङ्करस्य कलेवरे विमला विभूतिः, याञ्चातोऽधिकदानशीलता समुल्लिखिता वर्तते। यथा यथा संयमस्य स्थितिः समायाति, ततोऽष्टधा सिद्धयः प्रकटितुं प्रारभन्ते। सिद्धयः साधनामार्गे सुलभाः सुविधाः सन्ति। साधकानां परमात्मप्राप्ति मार्गे यात्राविश्रमावनिरवश्यमेव निश्चिनुयात्, किन्तु साधकः यदात्रसमुद्ग्रथितो भवति, तदा लक्ष्याच्च्युतो भवितुं शक्नोति। अतएव परमसिद्धिकैवल्यपर्यन्तं यावत् सतर्कता भवत्यपेक्षिता।

आदिशङ्कराचार्यरस्य मतानुसारेण, ''**आब्रह्मस्तम्भपर्यन्त सर्वमायामयं जगत्। सत्यं सत्यं पुनर्सत्यं हरेर्नामैव केवलम्।।**'' ब्रह्मा तथा ब्रह्मणा सृष्टा सकला मरणधर्मा सृष्टिः सर्वाऽलीका, केवलं भगवन्नाम कीर्तनमस्ति सत्यम्, अपरमसत्यं सर्वम्।

भगवता श्रीकृष्णेन प्रोक्तं यदात्मैव परमसत्यं ज्योतिर्मयञ्चास्ति। सोऽस्ति द्रष्टा। तं लब्धुं नियतविधेः, नियत कर्मणश्चानुपालनमावश्यकम्। एतस्य नियत कमर्णश्चतुर्भागेषु विभाजनं वर्णचतुष्टयस्याभूत् बीजम्। स्वस्वभावे प्राप्त क्षमतानुसारेण कर्मणि (नियत कर्मणि) संलग्नः पुरुषः परमसिद्धिमाप्नोति। तामेव सिद्धिं परम नैष्ठिकीं सिद्धिं ब्रुवन्ति सिद्धाः। एनामेव सिद्धिं महर्षि पतञ्जलिः कैवल्यसिद्धिं ब्रूते।

ब्रवीति भगवान् श्रीकृष्णः गीतायाम्–

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**
**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।। (१८/४६)**

यस्मात् परमात्मनः सकलजीवमात्रस्योत्पतिः सञ्जाता, यः तत्वरूपेण सर्वत्र व्याप्तोऽस्ति, तमेवं परमात्मानं '**स्वकर्मणा तमभ्यर्च्य**'- स्वभावादुत्पन्नकर्मणः क्षमतानुसारेणार्चनं कृत्वा मनुष्यः परमसिद्धिं लभते, यदनु किमपि प्राप्तव्यं न शेषायते। इयमेव परमसिद्धिरस्ति। अस्या एव नाम कैवल्यपदोऽस्ति। कैवल्यं कीदृशमस्ति? कदा भवति? कोऽस्ति तत्पदः? अत्र पश्यन्तु– कैवल्यपादम्!

**जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः।।१।**

सिद्धिप्राप्तेर्द्वौ माध्यमौ स्तः– जन्मनः सञ्जायमाना सिद्धिः, औषधिमन्त्रतपः समाधिजन्यासिद्धिश्च। ईश्वरसाधनापथे कदाप्यारम्भस्य नाशो न भवति। साधनं विधिवदबुद्ध्यास्मिन् चेत् पादचतुष्टय सञ्चलनं सफलं जातं तर्हि भावी जन्मनि पञ्चमः पादसञ्चारः सुनिश्चितः। गीतायामस्ति– "**अनेक जन्म संसिद्धस्ततो याति परां गतिम्।।**" (**६/४५**) अनेक जन्मना क्रमानुसारतः साधकस्तत्र प्राप्नोति, यस्या नाम परमगतिरस्ति। अनेक जन्मसु भजनं कारं-कारं यत् प्राप्तिदंजन्मास्ति तन्मम स्वरूपमस्ति, स मयि निवसति। एतादृशा महापुरुषा जन्मग्रहण समकालमेवोक्त शाश्वतपदं संगृह्णन्ति। तेषां कैवल्यपदप्राप्तौ परमसिद्धि पद प्राप्तौ वा कस्यापि साधनस्यावश्यकता न भवति।

उदाहरणार्थम्– महाभारतस्य वनपर्वणः, द्वादशाध्याये भगवन्तं श्रीकृष्णं संस्तुवनुक्तवानर्जुनो यत् पूर्वेभ्यः दशजन्मभ्यो भवान् संततं महापुरुषस्य रूपे

विद्यमान आसीत्। एकस्मिन् जन्मनि भवान् यत्रसायंगृह मुनिरूपेण निरन्तरं भ्रमन्नराजत। यत्र भवतिस्मसायं कालस्तत्रैव भवान् निशायां निवसतिस्म। आजीवनं धृत मौनः भवान् साधनालीनोऽभूत्। एकस्मिन् जन्मनि, एकस्मिन् कल्पे वा भवान् प्रभासक्षेत्रे क्षेत्रीयान् जनान् समुपदिशन् भ्रममाण अशोभत। एकस्मिन् कल्पे पुष्करतीर्थे द्वादश वर्षं यावत् समुत्तिष्ठन् यज्ञं चचार। एकस्मिन् जन्मनि कल्पे वा भवान् बद्रिकाश्रमे ध्यानस्थ अराजत। तस्मिन् समये ऋषि द्वयस्य साहचर्य्यमासीत्– एको नरः, अपरो नारायणः। भवान्नारायणः सन् स्तरोन्नयने जाते भवानेव वामनः तथा विष्णुरमन्यत लोकेः– इत्थं मया व्यासत अश्रौषि।

अस्तु भगवतः श्रीकृष्णस्य भजनं तस्य पूर्वजन्मन्येव सम्पन्नतामगात्, केवलं प्राप्तिरासीदवशेषा। एवदृशा महापुरुषाः स्वजन्मग्रहण समकालमेव प्राप्तव्यं प्राप्नुवन्ति। तेषां पूर्णतायां केवलं जन्मैव माध्यमस्ति न तु साधनम्। भगवतः साधनायामासन्नवशिष्टानि त्रीण्यहनि। ते बद्रिकाश्रमंगता दिनत्रयं ध्यानस्था बभुवुः। भगवान् कृष्णः प्रातर्निशाया ब्राह्ममूहूर्ते सार्द्धद्वय वादनावसरे परमात्मनो ध्याने संल्लगतिस्म। स आदौ स्वचक्षुषोरुपरि जलबिन्दुभि संसेचन करोतिस्म, तदुत्तरं ध्याने समुपविशतिस्म। ध्याने कृष्णो नितान्तं सर्वं विहाय परमात्मलीनो भवतिस्म।

ध्रुवो भगवदर्शनानन्तरं भगवन्तं पप्रच्छ, "भगवन्! मुनिजनाः जन्मजन्मान्तरं भवत्प्राप्तेरनवरत यत्नं कुर्षते, तदा कदाचित् भवद्दर्शनं प्राप्नुवन्ति, परन्तु षणमासावधावेव भवता दर्शनं दत्तम्। एतादृश्यनुकम्पा कस्मात् कारणात्?" "वत्स! ममाभिमुखसन्नवलोकय। (भगवानेकस्मिन् पर्वतेऽअङ्गुल्या संकेतिवान् यत्रास्थिपञ्जराणामम्बार आसीत्।) इमे त्वदीया अस्थिपञ्जराः सन्ति। त्वया बहुवारं जन्म गृहीतम्, अत्रैव कृतं भजनम्, अत्रैव त्यक्तं शरीरम्। अस्मिन् जन्मनि केवलं षण्मासाः शेषा आसन्, अतो जन्मना सहैव त्वमुपलब्धिं लब्धवान्।

महापुरुषाणामेतादृशं जन्म जन्मनः सिद्धेरन्तर्गतमायाति। ते धारणाध्यानसमाधेरवस्थातः पारङ्गता भवन्ति। नैवं भवति यत्तैः कदापि भजनं कृतमेव नहि। सिद्धेरेको माध्यमोऽस्त्यौषधिः। प्रकृतौ विधाता विधातुरुत्पन्ना

सृष्टिरस्ति नश्वरा। गीतायामस्ति, "**आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।**" (८/१६) सृष्टेः प्रणेता विधाता, ततः समुत्पन्नं यावन्मात्रं सकलं जगत् परिवर्तनशीलमस्ति, दुःखाकरं क्षणभङ्गुरं नश्वरञ्चास्ति। तर्हि कस्यचिन्मायिक वस्तुनः प्रयोगेण कथं कैवल्यपदस्य प्राप्तिर्भविष्यति?

भगवान् श्रीकृष्णः कथयति, उक्त नियतकर्मणो विधानं विना पुरा न कोऽपि परमात्मानं प्राप्तुं शशाक न च भविष्ये कोऽपि प्राप्तं कर्त्तुं शक्ष्यति, यतो हि प्राक्काले यावन्तो महर्षयो मनीषिणश्चाभवन् एत नियतं कर्म सम्पद्यैव बभुवुः। अर्जुन! नियतकर्मणां परिणामे ज्योतिर्मयोऽयमात्मा भवति विदितः, आत्मातृप्तो भवति, भवति चात्मस्थितिः, तदर्थं न कश्चित् कर्त्तव्यो न शेषः, प्राप्तव्येषु न किमप्यप्राप्यम्। अत उक्तानुष्ठानं विना परमात्मानं न कोऽपि प्राप्तं कर्त्तुं शक्नोति, तर्हि नश्वरभूतानामौषधिवनौषधीनां तथापरोपायानां प्रयोगेणासौ परमात्मा कथं सिद्धो भविष्यति?

वास्तवेन बाह्ये जगति येनप्रकारेणानन्ताः शारीरिकाः सन्ति रोगाः तथैव केचन् मानसिका रोगा अध्यात्म-संसारं प्रभावयन्ति। ये रोगा मुहुर्मुहुः नानायोनिषु गर्भयातना भोगार्थं तथा कीटपतंगादि पर्यन्तोच्चाधम शरीरधारणाय भवन्ति हेतवः। एनमेव भवरोगः कथयति लोकः। रामचरितमानसे साधुशिरोमणिना श्री तुलसीदासेनैतेषां रोगाणां परिचयं ददानेन निरुपितमस्ति यदेतेषां रोगाणां मूलं मोहः, अज्ञानञ्चास्त। "**मोह सकल व्याधिन्ह कर मूला। तिन्ह ते पुनि उपजहिं बहु शूला।।**" समस्त व्याधीनां मूलमस्ति मोहः, यतो अनन्त शूलानां भवति सृष्टिः।

**काम बात कफ लोभ अपारा। क्रोध पित्त नित छाती जारा।।**
**प्रीति करहिं जौं तीनिउ भाई। उपजइ सन्निपात दुखदाई।।**

मन्यतां कामोवायुविकारोऽस्ति, क्रोधः पित्तविकारोऽस्ति, कफः लोभोऽस्ति। चेत्त्रयाणां प्रकोपो जायते तदा सन्निपातस्य मृत्योर्वाथवासन्न प्राण घातको दुःखदो रोगः प्रादुर्भवति। '**अहंकार अति दुखद डमरुआ।**" अहङ्कारोऽति कष्टप्रदः सन्धिवात रोगोऽस्ति। तृष्णाः, उदरसम्बद्धः शूलरोगोऽस्ति। विंशपञ्चविंशति रोगाणां चित्रणं कृत्वान्ते तेनोक्तम्- "**मानस रोग कछुक मैं**

**गाये।''** मनसोऽनन्तरोगाणां मध्यतः केषाञ्चित रोगाणां मया नामोल्लेखः कृतः। **''है सबके लखि विरलन्ह पाये।।''** (मानस, ७/१२०/२) इमे रोगाः प्रायः सर्वेषु वर्तन्ते, किन्तु विरलाः केचनेमान् द्रष्टुं पारयन्ति। **''जाने ते छीजहिं कछु पापी। नास न पावहिं जन परितापी।।''** एतान् ज्ञात्वा ते किञ्चिन्निर्बला जायन्ते, किचिद्भवन्ति क्षीणाः परन्तु नष्टा न भवन्ति। एतेषां रोगाणामौषधयो वर्ण्यन्ते– **''नेम धर्म आचार तप, ज्ञान जग्य जप दान। भेषज पुनि कोटिन्ह नहिं, रोग जाहिं हरिजान।।'' ( उत्तरकाण्ड, १२१ख )** नियमः, धर्मः, सदाचरणम्, तपः, ज्ञानम्, दानम् तथा अन्यापि कोटिशः सन्त्यौषधयः परन्तु हे गरुण! उक्तौषधिभिरपि नेमे रोगाः मुञ्चन्ति। अस्य भवरोगस्य निरसनाय मात्रैकोपायोऽस्ति– **'राम कृपा नासहिं सब रोगा।'**– भगवदनुकम्पया रोगाः पलायन्ते। **'जौं एहि भाँति बनै संजोगा।।'** यद्येतादृशः संयोगः संगच्छेत्। कीदृशः संयोगः? **''सदगुरु बैद बचन विश्वासा। संजम यह न विषय कै आसा।।''** सद्गुरुरस्ति वैद्यस्तस्य वचने विश्वासः करणीयः, विषयाणां कामना न कर्त्तव्या, एतदेव पथ्यम्। **''रघुपति भगति सजीवन मूरी। अनूपान श्रद्धा मति पूरी।।''** भगवतो भक्तिः सञ्जीवनी मूलमस्ति। श्रद्धायुता बुद्धिरेवौषधिना सह ग्राह्यं पथ्यमस्ति। **''एहि विधि भलेहिं सो रोग नसाहीं। नाहिं त जतन कोटि नहिं जाहीं।।''** अनेन विधिनेमे रोगा अवश्यमेव नङ्क्ष्यन्ति, अन्यथा कोट्युपायैरपीमे न त्यक्ष्यन्ति। एतेषां वास्तविकोपचारः ईश्वरभक्तिरेवास्ति। भक्तेरेवंदृशः प्रभावोऽस्ति, यत् **''राम भगति मनि उर बस जाके। दुख लवलेस न सपनेहुँ ताके।।'' ( मानस, ७/१९, ख ५ )** स्वप्नेऽप्यसौ मनागपि न विषीदति।

विभक्तस्यार्थोऽस्ति विभाजनम्, भक्तेश्चाशयोऽस्ति संयोजनम्। नियमधर्माचरणा इमे सर्वे भक्तौ सुतरां भवन्ति सम्पन्नाः, किन्तु यदि श्रद्धासमर्पणयोरस्त्यभावस्तदा सर्वं व्यर्थायते। भगवान् श्रीकृष्णः संब्रूते गीतायां यच्छ्रद्धा नास्ति तर्हि तप्तं तपः, कृतं कर्म, जपितं जपः सर्वं भवति निरर्थकम्, कल्पयतु किमपि नाभूत्। अस्तु सम्पूर्ण समर्पणस्य नामास्ति भक्तिः। इदमीश्वर प्रणिधानं भवरोगस्य महौषधमस्ति, यस्मिन्नेश्वरप्रणिधाने परमात्मनः करयन्त्रो भूत्वा भवति सञ्चलनम्। औषधिभिर्महर्षिपतञ्जलेरयमेवाशयः।

सिद्धेरेको माध्यमो मन्त्रोऽस्ति। मननेन यः साधकमवति सो मन्त्र कथ्यते। मन्त्राणां समुल्लेख उक्त महापुरुषैः स्वयं कृतोऽस्ति– **'तस्य वाचकः प्रणवः।' (१/२७), 'तज्जपः' (१/२८)** तस्येश्वरस्य वाचकं नाम प्रणवोऽस्ति, तस्य जपः कर्त्तव्यः। 'मनस् अन्तरे यस्य स्थितिः स मन्त्रः' जपं कुर्वन् कुर्वन्नेका स्थितिरेतादृशी समायाति यन्नाम मनः स्वान्तराले स्थानं ददते। तस्मिन् समये तन्नाम मन्त्रस्य संज्ञामादधाति। क्रमश उन्नतावस्थायाम्, परावाण्याः प्रवेशकाले इदं नाम मनः स्वान्तराले श्लिष्टायते ध्रुवसिद्धिप्रदश्च भवति।

तपः सिद्धेरेकमावश्यकमुपकरणमस्ति। साधक इष्टं प्रति समर्पितो भवति, मन्त्रं जपति, किन्तु सेन्द्रियं साह्यं न ददाति। कदाचिदावृणोति निद्रा कदचिच्चालस्यं प्रभवति। अतो मनसा सहेन्द्रियदलमिष्टानुकूलं तापनं तपः समुच्यते। सत्यसन्धेन सह संलग्नतायाः नाम तपोऽस्ति। **'कायेन्द्रिय सिद्धिरशुद्धिक्षयात्तपसः।' (२/४३)** तपसा शरीरेन्द्रियाणां विकारा निर्गच्छन्ति। शरीरमिन्द्रियाणि च सिद्धायन्ते।

अंततः समाधिः सिद्धया संलग्नं सोपानं भवति, यस्मिन् मुख्यं प्रयोजनमर्थाल्लक्ष्यमात्रस्याभासः, चित्तस्य निजस्वरूपस्य विलयनम्, कैवल्याख्यानामयपदस्य प्राप्तिस्तत्र स्थितेः स्थितिर्भवति। सारांशतो भवरोगस्यौषधिर्भक्त्यस्ति। तत्सहयोगिना मन्त्रेण तपसा च क्रमशः समाधि माध्यमेन सिद्धिः प्राप्ता भवति। इमानि कैवल्यप्राप्तेरुपकरणानि सन्ति। प्रश्नः समुदयति यत् किमस्ति जन्म? कथं भवति जन्म? जन्मपरिवर्तनस्य कारणं किमस्ति? अत उपरि प्रकाशः प्रस्तूयते–

**जात्यन्तरपरिणामः प्रकृत्यापूरात्।।२।।**

**'जात्यन्तर परिणामः'–** एकस्माज्जन्मनोऽपर जन्मनि परिवर्त्तनं जात्यन्तर परिणामोऽस्ति। इदं प्रकृतौ पूर्णतायाः सम्पन्नतया सम्भवति। प्रकृतिश्चित्तं प्रबाध्य निरुणद्धि। यैर्विकारैः सन्निरोधितवती ते शान्ता भवन्तु, अग्रिमोन्नता स्थितिः ग्रहीतुं सुगमा भवेत्, चित्तस्येदमेव परिवर्त्तनं जन्मपरिवर्त्तनमस्ति। अनेनोत्कर्षेण सह चेच्छशरीरं भवेत् पञ्चत्वलीनं तदा तेन स्तरेण भविष्यति जनिः। पूर्व प्रकृतेः शान्ति प्रापणम्, अग्रिमोन्नत प्रकृतेर्जागरणं जन्मपरिवर्त्तनमस्ति। चित्तस्यैकावस्थाया द्वितीयावस्थायाः परिवर्त्तनं जन्मपरिवर्त्तनमस्ति।

आरम्भकाले चित्तवृत्तेर्धरातलं मलिनं भवति। साधनायाः प्रारम्भे साधको भवत्यल्पज्ञः। एतादृगवस्थावन्तः साधकास्तत्त्वदर्शिनो महापुरुषस्य सेवां कुर्युः। सेवायाः, समर्पणस्य, सान्निध्यस्य, साधनश्रवणस्य च प्रभावेण भजनं जागर्ति। हृदयेन चिन्तनस्य विधिर्भवति जागृता। तदेवाल्पज्ञ शूद्रश्रेणीवान् साधको वैश्यश्रेणीको भवति। एकाप्रकृतिरनयारीत्या परिपूर्णा जाता द्वितीया चाभूज्जागृता, इदमेकं जन्मपरिवर्त्तनं संवृत्तम्।

एतद्विध्यनुसारेण प्रवृत्ते सत्येव साधको दैवी सम्पदश्चयनं कर्त्तुं प्रारभते। क्रमशः स्वभावे धैर्यशौर्यसाहसानां संघर्षं वोढुं क्षमता समायातुं प्रारभते, तदा स एव साधकः क्षत्रियश्रेणीको भवति। तस्यां क्षत्रियश्रेण्यां प्रवर्त्तमानः साधको विकारसमूहं समाप्तं करोति। धारणाध्यानसमाधिस्वभावे प्रविशति, ब्रह्मणि विलयस्यार्हता नैसर्गिकः स्वभावः सम्पद्यते। तस्मिन् काले क्षत्रिय प्रकृतिः पूर्णा प्रतीयते, एकस्याः समुन्नतायाः प्रकृतेरभूज्जागरणम्। सम्प्रत्यसावेव साधकोऽस्ति ब्राह्मणः।

एकाकार-दिनचर्य्यातश्चित्तस्यापरदिनचर्य्या प्रकारे परिवर्त्तनम्, पूर्व प्रकृतेः शान्तभवनम्, उन्नत प्रकृतेश्च जागरणम्, एतदेवास्ति जात्यन्तरपरिणामस्तस्य साधकस्य द्वितीयजन्मजातम्। अन्ततो विदितो भवत्यात्मा तथा समायाति आत्मस्थितिः। तस्मिन् समये सर्वाः श्रेणयः समाप्तिं गच्छन्ति। प्रकृतिर्भवति समाप्ता, सम्प्रति न निकृष्टा प्रकृतिर्नचोत्कृष्टा। अस्याः समुपलब्धेः पूर्वं कदाचिच्छरीरं मुच्यते तदा शरीररूपं वस्त्र भूयो मेलिष्यति, तदस्तरानुकूला साधना स्थास्यति। एतदेव जन्मपरिवर्त्तनस्यास्ति रहस्यम्। भगवान् श्रीकृष्णो वदति-

**त्रैगुण्य विषया वेदा निस्त्रैगुण्यो भवार्जुन।**
**निर्द्वन्द्वो नित्य सत्त्वस्थो निर्योगक्षेम आत्मवान्।। ( गीता, २/४५ )**

अर्जुन! वेदानां प्रकाशावधिस्त्रिगुणसीम्न्येव संसरते, त्वं त्रिगुणसीम्नः पारं समुत्तिष्ठ। कथमुत्तिष्ठेयम् ? भगवान् निर्दिशति- नित्यसत्त्वपरमात्मनि श्रद्धां सुस्थिरीकृत्य योगक्षेमयोश्चिन्तामकुर्वाणो भवात्मपरायणः। अनेन विधिना त्वत्रिगुणेभ्य उपरि स्थास्यति, वेदाधिकृतत्रिगुण क्षेत्रत उपरि त्वं राजिष्यसे। तत्र

गत्वा किं लप्स्यसे, वेदेभ्य उपरिष्टाद्गतः कं किं लब्धवान् ? अत उपरि कथयति भगवान् श्रीकृष्णः –

**यावानर्थ उदपाने सर्वतः संप्लुतोदके।**
**तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।। ( गीता, २/४६ )**

सर्वतः परिपूर्णे स्वच्छे जलाशये प्राप्ते सति गर्त्तप्रतीकभूत लघुतर जलाशयात् मानवस्य यावत् प्रयोजने शेषायते, सम्यक् प्रकारेण ब्रह्मज्ञानिनो ब्राह्मणस्य वेदैस्तावदेव प्रयोजनं शेषं भवति। उदाहरणं प्रस्तूयते– राजस्थाने वृष्टिजलमाध्यमेन जलद्रोणीषु जलं प्रपूर्य जलावश्यकता पूर्यते, तत्र चेत् स्वच्छगङ्गाजलधारया जलद्रोणयः परिपूरिताः सन्तु तदा तत्रत्याः जलकुण्डस्य कियत् प्रयोगं करिष्यन्ति? किन्तु ते जलाशया अवश्यमेव वर्तिष्यन्ते। वेदाः पृष्ठस्थानां कृते मार्गदर्शनार्थं तु सन्त्येव। यो वेदेभ्य उपरिष्टात् समुतिष्ठन्नस्ति, ब्रह्म जानाति, स ब्राह्मणो भवति। अर्जुन! त्वं वेदपरिधित उपरि उत्तिष्ठ, ब्रह्म जानीहि, ब्राह्मणो भव। एतदेषास्ति जात्यन्तरपरिणामस्वरूपम्। अर्जुनस्त्वासीत् क्षत्रियः, तस्मै जातो निर्देशः, यत् त्वं ब्राह्मणो भव।

इमाः क्रमोन्नत श्रेणयः सन्ति। एकश्रेणीका प्रकृतिः यथा यथा अवरायते, तथा तथा द्वितीयायाः प्रकृतेः समुदयः भवितुमारभते। चित्ततस्तामसी प्रकृतिः दूरायते द्वितीया सात्विकी प्रकृतिः प्रबलायते। एतदेवास्ति जन्मपरिवर्त्तनम्। किमुपर्युक्त जन्म, औषधिः, मन्त्रः, तपः, समाधिश्चेति पञ्चसाधनानि प्रकृतिं ह्रासवृद्धया प्रभावयितुं शक्नुवन्ति? अत उपरि महर्षि पतञ्जलिः ब्रूते– नहिं,

**निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्।।३।।**

निमित्ते, औषधिमन्त्रतपःसमाधयः प्रकृतिनां नियामकान्युद्वा सञ्चालकानि न सन्ति। इमानि निमित्तानि सन्त्येतादृशानि यथा क्षेत्ररक्षकः कृषकः '**वरणभेदः**'– आवरणस्य भेदनं करोति। कृषकः क्षेत्रं सिञ्चति। प्रणाल्यां यत्र कुत्र चिदवरोधो दृश्यते, कृषकस्तमवरोधमपसारयति, जलन्तु स्वतः प्रवहमानोऽग्रेसरति। इत्थमेव साधकस्य संयमो यावत्यां मात्रायां साधितो भवति, तदनुपातेन प्रकृतिः पराङ्मुखायते, प्रकृतेरावरणं छिद्रान्वितायते, ज्योतिर्मय परमात्मनः सहजः प्रकाशः प्रादुर्भवति। साधकः प्रकृतौ न किमपि परिवर्त्तनं विधत्ते प्रत्युत् कृषकवत्

कृषिक्षेत्रेऽभीष्टगोधूमादीनां विकासे हानिकरान् विजातीयान् घासादीन् निर्मूलनीकरणेन कृषिं गो पायति। तथैव साधकः साधने हानिकरान् प्रकृतिजान् साधना विजातीयान् पदार्थान् समूलमुन्मीलयति– "**कृषी निरावहिं चतुर किसाना। जिमि बुध तजहिं मोह मद माना।।" (रामचरितमानस)**

**निर्माणचित्तान्यस्मितामात्रात्।।४।।**

चित्तस्यैकस्मात् प्रकारादपरस्मिन् प्रकारे नियुक्तता निर्मितचित्तं कथ्यते। निर्मितचित्तम् '**अस्मिता मात्रात्**'– अस्मितां यावत् सीमितमस्ति। आत्मनस्तथा वृत्तीनां मिश्रणमस्मिता समुच्चते। यावद्विव्यतेऽस्मिता, तावत् चित्तमेकावस्थादपरस्यामवस्थायां परिवर्त्तमानं निर्मायमाणञ्च प्रतीयते। यदेदं मिश्रणं भवति समाप्तं तथा चित्तस्य निर्मितौर्भवति विरामः, चित्तमेव समाप्तिमेति। चित्ते नानावृत्तीनां प्रवाहो वरीवर्त्ति, तत्कथं स्थैर्यमाप्नुयात्?–

**प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्।।५।।**

चित्तवृत्तयः सन्त्यनन्ताः। क्लिष्टा वृत्तयो लक्ष्यात् परिभ्रंशयन्ति, अक्लिष्टा वृत्तय इष्टे युञ्जन्ति। चित्तस्यानेकाः प्रवृत्तीर्विभिद्यताः सर्वाः स्थिरयितुमेकं चित्तं भवति– एकस्मिन् लक्ष्ये समर्पितं चित्तं तदुच्यते। निर्मित चित्तानां कार्याणि बहुविधानि भवन्ति, पुनरपि एकं मूलचित्तमेव तेषां सर्वेषां नियन्त्रकं भवति प्रेरकञ्च सञ्चालकमपि ज्ञेयम्। साधनायां शनैः–शनैः समुत्कर्षकराणि चित्तानि नष्टानि भवितुं शक्नुवन्ति, किन्तु ध्याने समाहितं चित्तं न कदापि नश्यति, अत उपरि प्रकाशः प्रस्तूयते–

**तत्र ध्यानजमनाशयम्।।६।।**

एकं चित्तं तदस्ति यत् सर्वाः प्रवृत्तीर्विभेद्यनियुनक्तीष्टे, तत्र विनियोजयति, तत्रापि ध्यानजनितं चित्तम् '**अनाशयम्**'– वासनासंस्काराभ्यां विरहितं भवति, तन्न कदापि क्षिणोति। पूज्य महाराजाः कथयन्ति स्म, "यदाहं नष्टं भवितुमिच्छानि तदा भगवान् मां न नाशयिष्यति।" सम्पूर्णानि साधनान्येकत्रीभूय परिवर्तिते ध्याने चित्तं वासना संस्काराभ्यां भवति विनिर्मुक्तम्। प्रकृतौ नैतादृशं किमपि वस्तु जातं यत्र नाशयितुं शक्नुयात्। मायाक्षेत्रे न किमप्युपद्रवमस्ति यत्तं निर्मूलयितु पारयेत्। एतादृशा उपद्रवा महाराजस्य समक्षं वारम्वारमाजग्मुः, किन्तु जुगोप

परमात्मा। अर्थादुक्तावस्थासम्पन्नो योगी कर्मसंस्काराभ्यां भवति निर्मुक्तो निर्विघ्नोवा।

सम्प्रति ध्यानोत्तर–योगस्थितौ प्रकाश प्रस्तुतिः –

**कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्।।७।।**

ध्यानानन्तरं य इष्टप्रापको योगी वर्तते तस्य लक्षणं वर्णयन् महर्षिर्बवीति यत् योगीनां कर्माण्यशुक्लान्यकृष्णानि भवन्ति, अपरेषा कर्माणि भवन्ति त्रिधा।

योगिभिः कृतेन कर्मणा न शुभं परिणामं भवति न चाशुभ संस्कारोत्पत्तिः। भगवान् श्रीकृष्ण गीतायां ब्रूते– य आत्मतृप्तः, आत्मस्थितः, यस्य योगः परिपूर्णस्तेन कृतेन कर्मणा न कोऽपि लाभो न च कर्मत्यागेन कापि हानिः, यतो हि तस्मै प्राप्तव्य वस्तुषु किमपि वस्तु नास्त्यप्राप्तम्, तदा कमाकारयिष्यति? निर्विकारत्वादसौ कस्य विकारस्योच्छेदं करिष्यति?

गीतायां भगवता श्रीकृष्णेनोदीरितम्, '**चातुवर्ण्यं मया सृष्टम्**'– चत्वारो वर्णा मया रचिता। '**तस्य कर्त्तारमपि मां विद्धय कर्तारमव्ययम्**'– तस्यकर्त्तारं मामव्ययकर्त्तारं जानीहि। कर्माणि मां न लिम्पन्ति कुतोहि कर्मफले न मे स्पृहा। अस्य नियत कर्मणः फलं परमात्मास्ति स च मत्तः पृथक् नास्ति। अग्रे न किमप्यवशिष्यते तदा किमर्थमिच्छा भविष्यति। एतदेव महर्षिः पतञ्जलिरपि कथयति यत्– योगीनां कर्माशुक्लानि तथाकृष्णानि भवन्ति। तेषां कर्मणा शुभाशुभं किमपि फलं न भवति।

योगस्य पन्थाः, वृत्तीनां संयमस्यास्ति। कोऽपि साधको यो भगवतो निर्देशे वर्तते, स उक्त पन्थानं लभते। कबीर लेखने पठने शून्य आसीत् किन्तु यदासौ स्थितिं लेभे तदोक्तवान्, "**आँख न मूदूँ कान न रुँधू, काया कष्ट न धारों। उघरे नयना साहब देखूँ, सुन्दर रूप निहारों। सन्तो! सहज समाधि भली।**"

इतर जनानां कर्माणि त्रिधा भवन्ति। गीतायामपि तद् वर्णितम्–

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।**
**भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्।।** (१८/१२)

सकामानामपरेषां पुरुषाणां कृत कर्मणां श्रेष्ठम्, अश्रेष्ठम्, श्रेष्ठाश्रेष्ठम्, इति त्रिप्रकारकं कर्मफलं निधनोत्तरमपि भवति, जन्म-जन्मान्तरेष्वपि मिलति, किन्तु '**संन्यासिनाम्**'- सर्वस्वस्य न्यासकर्त्तृणां पूर्णरूपेण त्यागीनां पुरुषाणां कृते कस्मिन्नपि काले कर्मफलानि न जायन्ते, अर्थात् योगवतां कर्माण्यशुक्लान्यकृष्णानि भवन्ति। पुनः सामान्यजनानां कर्मविषये सविस्तरं प्रकाशः प्रस्तूयते-

**ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्।।८।।**

उपर्युक्त त्रिधा कर्मभिः फलभोगकालेऽनुकूल वासनानामेवाभिव्यक्तिः सम्भवति। अर्थात् ताः सर्वा वासनाः स्वानुकूलं वातावरणं क्षेत्रञ्च सम्प्राप्य भवन्ति प्रकटिताः। यस्मिन् यासां वासनानां प्रादुर्भावस्य समायात्यवसरस्तस्मिन् समये ता एव प्रकटिष्यन्ति, शेषाः सर्वाः सञ्चिताः स्थास्यन्ति। ये न सन्ति योगिनः, सम्प्रति वाह्यस्तरे विद्यन्ते तेषां कर्मणां फलं त्रिप्रकारकं भवति- सात्विकं, राजसं तामसञ्चेति। एतदेव कृष्णशुक्ल मिश्रितरूपं त्रिप्रकारकं फलम्। ते भोगा मिलन्त्यवश्यमेव, न तत्र कापि बाधा; यतो हि-

**जातिदेशकालव्यवहितानामप्यानन्तर्यं**
**स्मृतिसंस्कारयोरेकरूपत्वात्।।९।।**

जातिदेशकालानां व्यवधाने सत्यपि संस्कारेषु '**आनन्तर्यम्**'- व्यवधानं न समायाति, यतो हि स्मृतिसंस्कारयोरुभयो स्वरूपमेकमेवास्ति। स्मृतौ तदेवाङ्कुरायते यद्भवति संस्कारनिहितम्।

तस्मिन् काले स्मृतिः सम्यक् प्रकारेण शुद्धतामेति यदोक्त संस्कारामाविर्भवनं विरमेत्। '**स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का।' (१/४३)** स्मृतिस्तस्मिन् समये पूर्णरूपेण भवति शुद्धा यदा चित्तस्य स्वरूपं शून्यायते, ध्येयघटक लक्ष्यैकमात्रस्यावशिष्यते, आभासः। इयं निर्वितर्क समाधेरवस्था कथ्यते, बीजमन्त्र विद्यमानमवसेयम्। यदान्तराले न कोऽपि संस्कारः शेषस्तदेदानीं स्मृतौ किमङ्कुरेत्?

संस्काराणां गतिरस्त्यबाधा। इयं गतिर्जन्मजन्मान्तरेषु यत्र तत्र सर्वत्रानुसरति कर्त्तारम्। काकभुशुण्डिनेकानि जन्मानि धारयामास्, नाना देशान् जगाम, कालचक्रे

चिरं वभ्राम् किन्तु न किमपि व्यवधानं प्रभावितवान्। "**कवनेउँ जन्म मिटिहि नहिं ग्याना। सुनहि सूद्र मम बचन प्रवाना।।" ( उत्तरकाण्ड, १०८, घ-८ )** कस्मिन्नपि जन्मनि ज्ञानं न विनष्टम्। अवश्यभाव्यमेतत्–

**तासामनादित्वं चाशिषो नित्यत्वात्।।१०।।**

'**तासाम्**'– तासां स्मृतीनां तेषां संस्काराणाञ्चैक्यमर्थात् कर्मसंस्कारेषु व्यवधानाभावः '**अनादित्वम्**'– अनादितोऽस्ति, यतो हि स्मृति संस्कारयोरुभयोरेकमेवास्ति स्वरूपम्। वासनाषु स्मृतीनामङ्कुरणमनादिरस्ति, आरम्भतोऽस्ति। एतस्माद्धेतोः प्राणिषु सन्ततं जीवनेच्छा नित्यं सबला परिलक्ष्यते। गीतायामस्ति–

**प्रकृतिं पुरुषं चैव विद्धयनादी उभावपि।**
**विकारांश्च गुणांश्चैव विद्धि प्रकृति सम्भवान्।। ( १३/१९ )**

प्रकृतिं पुरुषञ्चोभयमनादिं जानीहि। सम्पूर्णान् विकारानपि त्रिगुणात्मक प्रकृतितः समुत्पन्नान् विद्धि।

जिजीविषायाः सुखसंसाधनतृष्णायाश्चान्तस्योपायः?–

**हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः।।११।।**

हेतुफलाश्रयावलम्बनैभिश्चतुर्भिः संस्काराणां संग्रहो भवति। येन वासना गतिशीला भवति, एतेषां पूर्वोक्तानां चतुर्णां जाते समापने संस्कारोऽपि समाप्तो भवति।

वासना तथा वासनाजनित संस्काराणां कारणानि सन्ति अविद्यादिजनित क्लेशाः, तथा तज्जनितानि कर्माणि साधना प्रसूतानि कर्माण्यपि सन्ति। एतत्सर्वं सम्मिल्य सदसत् संस्कारान् ददन्ते। एतेषां फलं पुनर्जन्म, जीवनम् (आयुः) भोगश्चास्ति। इमे चित्तमाध्यमेन भवन्ति सक्रियास्तेनैतेषामाश्रयं चित्तमस्ति। यस्य प्रेरणया चलनमेतेषां तथैतेषां धारकानि, आलम्बनानि विषयाः शब्दादयः सन्ति। आलम्बनोद्दीपनानुभावविभावसञ्चारी भावैः रसानामुद्रेकः सम्भवति, येन चित्तं द्रवीभूतोभूत्वा संस्कारैः संश्लिष्टायते। उपरि वर्णितैश्चतुर्णां माध्यमानामभावैरुक्त–वासनानां संस्काराणाञ्च भवति सामस्त्येनाभावः। उक्तैतेषामभावेन सह धर्मस्योदयो भवति। अत्र महर्षिणा धर्मशब्दस्य कृतः पुनः प्रयोगः –

**अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्।।१२।।**

'**धर्माणाम्**'- धर्मेषु '**अध्वभेदात्**'- कालस्य भेदो भवति। अस्मात् कारणात् येऽतीता वासनादयः ये '**अनागतम्**'- आगन्तुका इदानीं यावदप्रकटिताश्च तेष्वपि स्वरूपेण धर्मः सन्तिष्ठते। धर्मे भवति कालस्य भेदः। अस्माद्धेतोरविद्यावासनाचित्तवृत्तयश्च या अभूवन्नतीतास्तथा भजनद्वारा ये संस्कारा निवृत्ताः, ये चाद्यावधि न प्रकटिताः, आगन्तारः सन्ति, स्थितिः या मिलितुं सम्भाव्यते तस्यामपि धर्मः स्वस्वरूपेण विद्यते। परम चेतनः परमात्मैवास्ति धर्मः। '**धर्म न दूसर सत्य समाना**'। '**सर्वधर्मान्परित्यज्य**' (१८/६६) अर्जुन! समस्तधर्माणां चिन्तां विहाय एकमात्रं मम शरणागतं भव। ईश्वरस्य शरणमेव एको प्रमुखोधर्मः। किन्तु स धर्मः –

**ते व्यक्तसूक्ष्मा गुणात्मानः।।१३।।**

ते धर्मा व्यक्तानां स्थितौ सूक्ष्मायां स्थितौ च गुणस्वरूपा एव सन्ति। गुणानां यादृशं सात्विकं राजसं तामसं मलिनं मध्यमं समुन्नतञ्च प्रभावः प्रसरति तादृशमेव तस्य रूपं भवति यथा प्रथमपादस्य चतुर्थे सूत्रे वर्णितमस्ति- **वृत्ति सारूप्यमितरत्र**। यथाकारकं वृत्तिरूपं तदेव भवानपि, किन्तु यदा गुणत्रयाणां प्रभावः समत्वं गतः, तदा तदुपरि कथ्यते-

**परिणामैकत्वाद्वस्तुतत्त्वम्।।१४।।**

किन्तु '**परिणाम एकत्वात्**'- परिणामस्यैकतया नासौ सात्विकः, न राजसः, न तामस एवाऽस्ति। एतेषां कार्यं बभूव शान्तः, तदा '**वस्तु तत्त्वम्**' यद्विषयवस्त्वस्ति- योगयोगाभ्यास तत्वरूपेण प्रकटो भवति। अर्थात् सत्य वस्तु द्रष्टारमात्मानं परमात्मात्मानं विदितं कर्त्ता दर्शयिता च भवति।

भगवान् कृष्णो विषयेऽस्मिन्नदात् बलम्– अर्जुन! इदं कर्म (नियतं कर्म) सम्पादनं विना सृष्टौ न कोऽपि तं प्राप्तुं शशाक न च भविष्ये प्राप्स्यति। जनकादि ऋषय इदं नियतं कर्म कृत्वा नैष्कर्म्यां स्थितिं प्राप्नुवन्, किन्त्वभ्यास इयान् समुन्नतो जातो यत् कर्मपरिणामेषु विदितः स आत्मा, आत्मतृप्ता आत्मस्थितास्ते बभुवुः। तादृश पुरुषस्य कृते न किमपि कर्त्तव्यं शेषायते, प्राप्तव्यं किमपि वस्तु नाप्राप्यं भवति। इदमेवास्ति '**परमतत्त्वम्**'। गुणानां कार्यसमाप्तौ तद् वस्तु तत्वं प्रकटं भवति।

**वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः।।१५।।**

अत्र वस्तुपदेन परमात्मा बोध्यः। '**वस्तु साम्ये**'- वस्तुनः समायां स्थितौ ''**चित्तभेदात्**''- चित्तस्य भेदः प्रत्यक्षमस्ति। अतः ''**तयोर्पन्थाः विभक्तः**'' चित्तस्य तन्माध्यमेन दृश्यमानं वस्तु च, इत्युभयोः पन्थाः पृथक्-पृथगस्ति। वस्तु पूर्णमस्ति, चित्तं तस्मिन् विलीयते। प्रकृतिस्तस्मिन् वस्तुनि परिवर्तिता भवति। ''**तयोर्पन्थाः विभक्तः**''- अनयोरुभयोः पन्थाः पृथक्-पृथगस्ति। चित्तं त्रिगुणयावत् प्रकृतिंयावत् करोति कर्म। स द्रष्टास्ति व्यापकः। पुनस्तस्मिन् चित्ते प्रकाशः क्रियते–

**न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्।।१६।।**

एतदतिरिक्तं परमात्मापरपर्यायं वस्तु कस्याप्येकस्य चित्तस्याधीनं नास्ति, कुतो यदा यद्वस्तु चित्तविषयातिरिक्तं स्यात्तदा तस्मिन् समये '**किम् स्यात्**'- चित्तस्य क उपयोग शिष्यते? तच्छान्तं प्रवाहितञ्च वर्तते। अतो यदा वस्तु प्रमाणितं भवति तदा चित्तस्य पार्थक्येन किं कर्म? चित्तं चेतन प्रसारणकेन्द्ररूपेण विराजते।

**तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्।।१७।।**

चित्तमुपरागापेक्षी, स्वस्मिन् वस्तुनः प्रतिबिम्बपातस्यापेक्षावानस्ति। एतस्माच्चित्तद्वारा वस्तु कदाचित् ज्ञातं कर्हि चिदज्ञातं प्रतीयते। अर्थात् कदाचित् ध्यानं दृढायते कदाचिच्च पलायते। यावन्मात्रकं भगवतः प्रतिबिम्बं समागतं तावदवलोकयति, नागतं प्रतिबिम्बं तर्हि न पश्यति। किन्तु भगवान् सर्वं जानीते, भगवान् यावद्बोधयति चित्तन्तु तावदेवावगच्छति।

**सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्।।१८।।**

तस्य चित्तस्य स्वामी पुरुषो नास्ति परिणामी, अर्थात् तस्य कोऽपि परिणामो न प्राप्यते। अतश्चित्तवृत्तयस्तेन सदा ज्ञायन्ते। '**तत्प्रभोः**'- तच्चित्तस्य स्वामी एकरसोऽस्ति तस्मात् स चित्तवृत्तीः सदैव जानाति, यत् का वृत्तिः कुत्र कदा वर्तते तथा ताः वृत्ती सदा सञ्चालयति। चित्तं यत् जानाति तत् द्वारैव–

**न तत्स्वाभासं दृश्यत्वात्।।१९।।**

तच्चित्तं स्वप्रकाशेन प्रकाशस्वरूपं नास्ति, यतो हि तत् '**दृश्यत्वात्**'- दृश्यमाध्यमेन निरीक्षते। चित्ते यः प्रकाशोऽनुभूयते स पुरुषद्वारा प्रसारित दृश्य द्वारैवास्ति। चित्ते स्वस्य न कोऽपि प्रकाशः न च स्वभासः।

चित्तं यत्किञ्चित् निरीक्षते, चित्ते यः प्रकाशः दृष्टिपथायते, तत् दृश्यमाध्यमेनैवास्ति। इदं दृश्यं द्रष्टादृश्यसंयोग मात्रमेवास्ति, यत् हेयहेतुः ज्ञेयः। दृश्य तादृशमस्ति यत् प्रकाशक्रियास्थितिः प्रदापयति, या स्थितिः अस्यात्मनो भोगस्य, अपवर्गस्य, परममुक्तेश्च सम्पादनं करोति। एतत् सर्वं पुरुषेण सञ्चालितमस्ति, येन चित्तं वेद्यते। चित्ते यः प्रकाशः स अनेन दृश्येन बोध्यते। अन्यथा मानवोऽन्धोऽस्ति। वृत्तिस्तु वृत्तिरेव- "**गो गोचर जहँ लगि मन जाई। सो सब माया जानेहु भाई।।" ( मानस, ३/१५-३ )** अतः कश्चित् जनः स्वतः काञ्चित् कल्पनां चेत् करोति, तर्हि सा मायैवास्ति, अन्धकारोऽस्ति, तत्रेषदपि प्रकाशो न विद्यते, यत् किञ्चिदस्ति तत् '**दृश्यत्वात्**'। दृश्यस्य कार्यमस्ति- पुरुषस्य हेतवे भोगव्यवस्थापनम्। किमेतादृशाः भोगा भवन्ति सहायकाः मोक्षे? श्रीकृष्णः कथयति गीतायाम्- "**भोक्तारं यज्ञ तपसां सर्वलोक महेश्वरम्।। ( ५/२९ )**" तेषां साधनाक्षेत्रे प्रविष्टानां साधकानां यज्ञतपःसंयमाः सन्ति भोगाः। तत् दृश्यं मुक्तेः पूर्णरूपेण करोति सम्पादनम्। अस्तु चित्ते यः प्रकाशो वर्तते तत् दृश्यद्वारैवास्ति।

**एकसमये चोभयानवधारणम्।।२०।।**

'**उभय अनवधारणम्**'- एकस्मिन्नेव समये चित्तदृश्ययोरुभयोः स्वरूपस्य ज्ञानमपि न भवितुं सम्भवः कुतो हि चित्तन्तु चित्तमेव। दृश्यं यदाऽपि समायाति स्वतन्त्ररूपेणागच्छति। कदा किं प्रसारितं भवितु मर्हति तत् सर्वं युगपन्न ज्ञातुं सुशकः। तत्तु प्रामुख्येनानुभवे प्रत्युत्पन्नेऽएव भवति बोधगम्यः।

**चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च।।२१।।**

'**चित्तान्तर दृश्ये**'- चित्तस्य एकस्मात् प्रकारात् अपरस्मिन् प्रकारे परिवर्त्तनं दृश्यस्य माध्यमेन भवति तथा '**बुद्धिबुद्धेरतिप्रसंगः**'- बुद्धौ बौद्धिक विकासस्य योऽन्तरङ्गः प्रसङ्गोऽस्ति, तदपि दृश्यमाध्यमेन प्रकटितो भवति, अपरञ्च स्मृति सङ्करश्च- स्मृतावस्य मिश्रणं सम्भवति। स्मृतिस्तदैव पूर्णा भविष्यति

यदा भजनमपि पूर्ण भविष्यति। अतएव पूर्वविचारेषु साधनात्मक दृश्यस्य मिश्रणं सुगमायते।

**चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्।।२२।।**

यद्यपि चेतनशक्तिः पुरुष क्रियातोऽसङ्गाविरहिता चास्ति, पुनरपि '**तदाकारापत्तौ**'- तदाकारस्थितातायाः, एकाग्रतायाः समागते सति सा शक्तिः स्वचित्तस्य ज्ञानं लभते। ''**स्वबुद्धिसंवेदनम्**''- तदाकारजातायां बुद्धि स्वस्वरूपस्थितिवती भवति। स्वस्वरूपस्य बुद्धौ संवेदनं चलितुमारभते।

**द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्।।२३।।**

द्रष्टदृश्ययोरुपरक्तं चित्तम् ''**सर्वार्थम्**''- सम्पूर्णार्थस्य दैवी वैभवस्य प्राप्तकारकं भवति, यतो हि द्रष्टुः दृश्यस्य च संयोग आत्मने मुक्तेः सम्पादनकारको जायते। अतएव द्रष्टुः दृश्यस्य च संयोगः '**सर्वार्थम्**'- सम्पूर्णार्थयुतस्य कैवल्यपदस्योपलब्धिं कारयति। अस्मिन्- **अन्तवन्त इमे देहा नित्यस्योक्ता शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।। (गीता, २/१८)** अविनाशिनः, अप्रमेयस्य, नित्यस्वरूपस्य, आत्मनः, इमे देहा नश्वराः कथिताः सन्ति, एतस्मात् भरतवंशोत्पन्नार्जुन! त्वं युद्धं कुरु। आत्मैवामृतः, अविनाशी च यस्य कालत्रयेऽपि न भवति नाशः। आत्मैव सत्यमस्ति। ''**द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्**'' द्रष्टायश्चैतन्यं निर्मलञ्चास्ति, तथा च दृश्य पुरुषार्थं भोगापवर्गयोः साधनसंग्रहो यस्यास्ति प्रयोजनम्, क्रियायां स्थिति प्रदानमेवास्ति यस्य प्रयोजनम्- इत्युभाभ्यां सञ्चालितं चित्तं सर्वार्थशीलं भवति, सम्पूर्णार्थः, नैष्ठिकीं सिद्धि प्रदापको भवति। अग्रे समुच्यते-

**तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्।।२४।।**

तच्चित्तमसंख्यवासनाभिश्चित्रिते सत्यपि परार्थस्यार्थात् परमार्थस्य सिद्धावुपकारको भवति, यतो हि तत् समस्त वासनानामुच्छेदकोऽस्ति। यस्य चित्तं द्रष्टिदृश्ययोः संयोगोपरक्तमस्ति, एवंभूतो योगी नानावासनाभिः संसर्गे भूतेऽपि स्वलक्ष्योपरि दृढो भवति। वासनाभिः स नोपरज्यते '**पद्मपत्रमिवाम्भसा**'- कर्दमेन वारिणाचानवरतं प्रक्षालितमपि कमलपत्रं न भवति जलार्द्रम्, सन्तिष्ठते चामलम्, तथैवेमे महापुरुषा अपि सदा स्वच्छाः,

निर्मलाः गोचरायन्ते। तेषा साहचर्य्ये यः समायात्यसावपि कल्याणभागी भवति। पूज्य गुरुणां वासो नृशंसदस्यूनां तथा वन्यकोलभीलानां मध्य एवासीत् किन्तु महाराजस्य साहचर्य्य प्रभावतस्तेषां हृदये सम्बभूव परिवर्त्तनम्, तेषां बर्बरता समाप्तिमगात् तथा तेऽपि भजनेचिन्तने च संलग्ना बभूवुः।

**विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः।।२५।।**

''**विशेष दर्शिनः**''- तस्य विशेष पुरुषस्य दिदृक्षावतां योगिनां चित्ते न तिष्ठत्यात्मभावः, यदहमस्मि योगी, समर्थः, आत्मवान् चास्मि, यतो हि स जानाति यत् कर्त्ताधारकश्चासावीश्वरोऽस्ति। देहाध्यासो भवति समाप्तः। इति स्थितिवतां योगिवर्याणां चित्तस्य कीदृशी स्थितिः?—

**तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्।।२६।।**

तस्मिन् समये योगिनश्चितं विवेकोन्मुखं भवन् सन् कैवल्यपदप्राप्तये भवत्यग्रेसरः। विशेषदर्शनानुभवेन सह योगिन आत्मश्लाघा भावना भवति विनिवृत्ता, किन्त्विदानां यावत् दर्शन मात्रस्य प्रस्फुरणं सम्पन्नम्, स्वरूपस्थितिर्नोपलब्धा। तस्मिन् काल चित्तं गम्भीररूपेण भवति विवेकयुक्तः, तथा कैवल्यभिमुखं करोति गमनम्। एवम्भूत चित्तेन शुभाशुभस्य न भवति निर्माणम्। किन्तु तस्मिन् चित्ते ये समुद्वेगा उत्पद्यन्ते ते के? इति प्रकाश्यते—

**तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः।।२७।।**

तस्य समाधिस्थस्य चित्तस्यान्तराले विपरीतवस्तूनां प्रस्फुरणं पूर्वसंस्कार प्रभावात् भवति। चित्तन्तु विवेकोन्मुखमस्ति अर्थात् सबीजायाः समाधेरवस्था वर्तते। ''**तच्छिद्रेषु**''- तस्यान्तराले ये विजातीय छिद्राः सन्ति, अथवा पर पदार्थस्य ज्ञानमस्ति, तत् पूर्व संस्कारात् एव जायते। कामं स्वल्पमेवास्ति, निरोधस्य संस्काराः सन्ति किन्तु सन्ति सजीवाः। तत्र ये विरोधिनोभावा अन्तराले समुत्पद्यन्ते, ते संस्कारजाः सन्ति। नूतनकर्मसञ्चयस्तुभवत्येव नहि, पूर्व संस्कारादेव जनिस्तेषाम्, नव्यं न किमपि भवति।

**हानमेषां क्लेशवदुक्तम्।।२८।।**

एतेषां संस्काराणां क्लेशवद्विनाशायस्ति निर्देशः। यावद्धानिप्रदाः क्लेशादयः सन्ति, तथैवेमेऽपि। एतेषां विनाशः क्लेश इव करणीयनावश्यकमस्ति।

अभ्यासे न प्रमादो विधेयः। अमीषां संस्काराणामुच्छेदेन सहै धर्ममेघ नामा समाधिरस्ति–

**प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः।।२९।।**

यस्य योगिनो वैराग्य विवेक–ज्ञान महिम्न्यपि सञ्जायते, तस्य विवेक–ज्ञानं सर्वथा प्रकाशमानत्वात् तस्मै धर्ममेघ समाधि–प्राप्तिर्भवति– यत्र धर्म एव धर्मः चिदाकाशे सर्वत्र धर्मस्य छायाऽनुभूयते।

**ततः क्लेशकर्मनिवृत्तिः।।३०।।**

उपर्युक्त धर्ममेघ समाधि प्राप्ति समकालमेव क्लेशस्य, अविद्यायाः, अस्मितायाः, रागस्य, द्वेषस्य, अभिनिवेशस्य च तथोक्त क्लेशादिभिः समुत्पन्न संस्काराणां सर्वथा नाशो भवति।

**तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्।।३१।।**

तस्मिन् काले यस्य साधकस्य सकलावरणस्य मलस्य च सामस्त्ये न निवृत्तिः सम्पद्यते, एवम्भूतं ज्ञानमसीमनन्तञ्च वोभवीति, एतस्माद्धेतोः **'ज्ञेयं अल्पम्'–** ज्ञेयपदार्थस्य परमात्मनस्तथा साधकस्य मध्येऽत्यल्पा दूरी शेषायते।

**ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्।।३२।।**

द्रष्टुरनुभूतिस्तदनन्तरं ज्ञेयस्यानुभूतिरल्पदूरीयुता यासीत् साऽपि परिपूर्णा जाता– इत्थं यदा साधक भवति सफल मनोरथः, सिद्धकार्यश्च तदेतादृश पुरुषस्य समक्षं गुणानां प्रभावः परिणामक्रमश्च समाप्तो भवति। सत्वरजस्तमासि त्रयोगुणाः क्रमशः श्रेष्ठमध्यमाधमप्रभावं कर्त्तुं यतन्ते एवं प्रभावकारी क्रमश्चलति। किन्तूक्तावस्थायां क्रमोऽयं समाप्तिं याति, असौ योगी गुणातीतो भवति। तदा साधनाक्रमः कीदृशः?–

**क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः।।३३।।**

यः क्षणप्रतियोगी वर्तते तथा "**परिणामापरान्तनिर्ग्राह्यः**"– यस्य स्वरूपं परिणामान्ते प्रतीयते, सक्रमो बोध्यः। प्रारम्भे साधको भजने घन्टामितधारयत्यासनं किन्तु किञ्चिन्मिनटं यावत् भजनं भवितुं सम्भवति। कदाचिद्भजनोन्नतावस्थायां

कतिपय मिनटानि यान्ति व्यर्थानि, शनैः-शनैः परिपक्वेसंयमे श्वासागमे ओम, श्वासबहिर्गमनेऽपि ओम, मध्ये न कोऽपि श्वासः निरर्थकमत्येति, इत्थं साधको भवति क्षण प्रतियोगी, एव प्रतिक्षणोपरि साधकस्य नियन्त्रणं सम्पद्यते। तस्मिन् समये क्रम परिणामोऽन्तिमपरिणामपर्यन्तं निर्गाधुः भवति नास्य कोप्युपयोग शिष्यते। इदानीं क्षणक्रमः किमपि न गृह्णाति। अनेन परिणामेन सह पुरुषार्थः परिपूर्णो जायते।

**पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं**
**स्वरूपप्रतिष्ठा वा चितिशक्तेरिति।।३४।।**

येषा पुरुष हेतवे किमपि करणीयं नावशिष्यते, तदा साधनापूर्णा बोध्या, गुणानां स्वकारणे विलयेन द्रष्टुः स्वस्वरूपे समवस्थानम् कैवल्यमस्ति।

गुणाः स्वकारणे जाताविलीनाः '**चितिशक्तेः स्वरूप प्रतिष्ठा**'- द्रष्टुः स्वस्वरूपे समवस्थितिः। '**कैवल्यम्**'- कैवल्यपदमस्ति। गुणा अपरं किमपि न जनयन्ति, स्वकारणे जाता विलीना। अत्र द्रष्टा स्वस्वरूपे स्थितो भवति, इदमेव कैवल्यपदमुच्यते, साधना जातासम्पन्ना।

अस्य शास्त्रस्यारम्भे '**योगश्चित्तवृत्ति निरोधः**' इति या प्रस्तावना आसीत् ''**तदा द्रष्टुः स्वरूपेऽवस्थानम्**'' इत्यस्य या प्रस्थापना, आसीत् तस्या एवात्रास्ति समापनम् यत् द्रष्टा स्वस्वरूपे संस्थितो जातः, इयमेव कैवल्यस्य स्थितिः। अनया स्थित्या सह योगी शाश्वतं जीवनं शाश्वतीं शान्तिं शाश्वतीं स्थितिं प्राप्नोति। इत्थमिदं कैवल्यपाद व्याख्यानं पूर्णम्।

## निष्कर्षः

सिद्धयः सन्त्यनन्ताः। सांसारिक जीवनशैलीतो विलक्षणता प्राप्तिरेव सिद्धिः समुच्यते। एतासु सिद्धिष्वष्टसिद्धीनां तथेतरासां सिद्धीनां समुल्लेखो योगदर्शनस्य तृतीयपादे कृतो विद्यते, किन्तु परमसिद्धिस्तु सैवास्ति, यस्यां परमतत्त्वस्य परमात्मनः समवबोधः सञ्जायेत्। सिद्धिरियं जन्मजन्मान्तरेभ्यः साधने रतानां साधकानां साधनस्य परिपक्वावस्थायां सुसम्पन्नायां जन्मना सहैव (भगवतः श्रीकृष्णस्येव) भवति सुलभा। साधनेऽवस्थाभेदानुसारेण शेषसाधकाः भक्त्या, मन्त्रेण, तपसा, समाधिना च शनैः सफलतां प्राप्नुवन्ति।

पूर्व प्रकृतेः पूर्णत्वे सम्प्राप्ते, अग्रिमोन्नत प्रकृतेः सञ्जाते प्रजागरणे जन्मनः परिवर्त्तनं सञ्जायते। एवं या प्रकृतिश्चित्तं प्रबध्नाति, सा शान्ता जाता, समुन्नतायाः प्रकृतेः समभवत् प्रादुर्भावः, इदमेवा जन्मपरिवर्त्तनम्। इत्युक्तायामवस्थायां चेच्छरीरं विमुक्तं तर्हि तत् स्तरानुसारेण जायते जनिः। जन्म, भक्तिः, मन्त्रः, तपः, समाधिश्चैतानि सर्वाणि निमित्तनि सन्ति। एतेषां माध्यमेन प्रकृतेः सञ्चालनं न भवति प्रत्युत् समुपस्थितावरोधो निराक्रियते, येनोन्नता प्रकृतिः स्वयं भवति प्रसारिता। इत्थं चित्तस्यैकस्मात् प्रकारादपरस्मिन् प्रकारे परिवर्त्तनं जात्यन्तर परिणामोऽस्ति, जातिपरिवर्त्तनं जन्मपरिवर्त्तनञ्चास्ति, एका रचना समुदीर्यते पूर्वपरिवर्त्तनप्रकारः। एतच्चित्तनिर्मितिरस्मिताश्रया, आत्मवृत्योः सम्मिश्रणं समुच्चय अस्मिता। चित्तस्य कार्यमस्ति बहूनां प्रवृत्ति-समूहानां स्थिरीकरणम्, एकस्मिन्नेवेश्वरे समपर्णम्, एकस्मिन्नेवेश्वरे मनोनियोजनञ्च। उपर्युक्तासु स्थितिषु क्रमशो ध्यानस्थितिः सम्प्राप्ता चेत्तर्हि ध्यानजनित चित्तस्य '**अनाशयम्**'- न भवति कदापि विनाशः, कुतो हि एवम्भूतस्य योगिजनस्य कर्माण्य शुक्लान्यकृष्णानि भवन्ति।

अपरेषां जनानां कर्माणि त्रिप्रकारकाणि भवन्ति। तत् सर्वकर्मजातं वासनाः सञ्जनयन्ति। अनेकेषां जन्मनां परिवर्त्तने, बहुकालान्तराले जाते सत्यपि तानि कर्माणि नियत समये भवन्ति प्रकटितानि, तथा हि स्मृति संस्कारयोः स्वरूपमेकमेवास्ति। स्मृतौ तदेव प्ररोहति यत् संस्कारान्तराले प्रच्छनं भवति। एतेषामेकत्वमनादिकालादेवास्ति, अतः सदा "**नित्यत्वात्**"- नित्यं स्वरूपं प्राप्नुवानि, भावनेयमत्र सदा मिलति विद्यमाना। हेतुफलाश्रयवलम्बनानां संस्काराणां वासनाञ्चैभिरेव भवति निर्माणम्। उक्तैतैश्चतुर्भिरभावैः सह वासनाः संस्काराश्च शाश्वतिक रूपेण विलीयन्ते।

संस्काराणां हेतवोऽविद्यादि क्लेशाः सन्ति। फलरूपेण पुनर्जन्मायुभोगाश्च सन्ति। एतेषामाधारश्चित्तमालम्बनश्च विषयसमूहोऽस्ति। एतेषामभावेन सह संस्कारा इमे शाश्वतरूपेण भवन्ति विनष्टाः। एतेषा विलयसमकालमेव धर्मस्याभिधानमागतम्, यत् कालभेदे सत्यपि, अतीत हेतु फलाश्रयावलम्बनानाम् '**अनागत**'- चतुर्णां येषां प्राकाट्यमिदानं यावन्नास्ति, यथा स्वरूपस्य स्थितिः-

स्वरूपप्राप्तिः, इत्यादयः, एषु सर्वेषु धर्मः '**स्वरूपतोऽस्ति**'- सदास्वरूपेण विद्यमानः प्रसारितश्च वर्तते। गुणानामानुसारेणेमे धर्मा उत्तममध्यममलिना स्ववस्थासु दृष्टि पथायन्ते, किन्त्वेमे स्थिरत्वं प्रत्यक्षत्वञ्च न जहति। परिणामस्यैकत्वे '**वस्तुतत्त्वम्**'- ये योगसाधना संलग्नाः सम्बभुवुः, यथा साधनया सम्प्राप्तं वस्तुनः, चेतन द्रष्टुस्वरूपेण प्रकटीभवनं सुसम्भवमस्ति। '**वस्तु साम्ये चित्तम्**'- वस्तुनः साम्यावस्थायां चित्तस्य भेदः स्पष्टायते, यच्चित्तस्य पन्थाः पृथगस्ति, तथा वस्तु चित्ततः पृथगस्ति। वस्तु पदेनात्र परमात्मा गृह्यते, इदं चित्तं परमात्मस्वरूपवस्तुनः प्रतिबिम्बमपेक्षते। वस्तुनो यन्मितं प्रतिबिम्बं चित्ते प्रभवति चित्तन्तु तदेव जानाति अन्यथा न जानाति किन्तु तद्वस्तु परमात्मस्वरूपं द्रष्टुस्वरूपञ्चास्ति, अर्थात् परमात्मास्ति। चित्तवृत्तयस्तेन सदैव ज्ञायन्ते। चित्ते यः प्रकाशो दृष्टिगोचरायते, स प्रकाशः द्रष्टृदृश्ययोमाध्यमेन सुलभायते। चित्ते यन्मितं दृश्य भवति प्रसारितं तन्मितमेव जानाति चित्तम्, ततोऽग्रे नहिं पश्यति।

यद्यपि सा चेतन-शक्तिः क्रियारहिता निःसङ्गा चास्ति, तदापि तदाकारायां जातायां शक्तौ '**स्वबुद्धि संवेदनम्**'- बुद्धौ स्वरूपस्य लभते संवेदनम्। तत्सम्वेदनं कथं प्राप्नोति? कस्य माध्यमेन प्राप्नोति? एतदर्थं वावद्यते महर्षिणा- द्रष्टुर्दृश्ययोरनुञ्जितं चित्तम् '**सर्वार्थम्**'- सम्पूर्णमर्थं प्रापयिता भवति। अयमेवास्त्यनुभवः। द्रष्टादृश्येनोपरञ्जितम् '**परार्थम्**'- परमार्थिकमर्थं सुसम्भवं कर्त्तुं भवति समर्थः, यतोह्यमनुभवः सकलवासनामण्डस्यास्ति विखण्डकः '**विशेष दर्शिनः**'- क्लेशकर्ममुक्तो विशेषपुरुषः परमात्मनो द्रष्टा भवति। एतादृशं चित्तं तं साक्षात्करोति। तस्मिन् काले तस्य साधकस्यात्मभावः, यदहमस्मि योगी, अयम्भावः शाश्वत समयाय भवति परमार्जितः। तस्मिन्नवसरे चित्तं विवेकेऽवलम्बितं कैवल्यस्वरूपोन्मुखं सन्तिष्ठते।

इत्थं चित्ते यदाकदा यत् किञ्चित् स्फुरणमाविर्भवति, सूक्ष्मसंस्काराः प्रस्फुटिता भवन्ति। इमे संस्कारा अपि क्लेशवत् भवन्ति भयङ्कराः। साधकेनानवधनता प्रमादश्च न करणीयौ। एतेषामतिसूक्ष्म संस्काराणामपि विनाशः क्लेशवदनिवार्योऽस्ति। साधकैरेतेषामुन्मूलनावधौ साधनायां तत्परतया स्थातव्यम्।

एतेषां सूक्ष्मसंस्काराणामुच्छेदे जाते सत्यपि योगी विवेकज्ञानमहिम्ना वैराग्यस्य परमवैराग्यस्य च स्थितिं प्राप्नोति। तस्य योगिनो विवेकज्ञानं सर्वथा देदीप्यमानतया '**धर्ममेघ समाधि**'– गगनसन्निभा स्थितिः भवति सुलभा। इदृशीमवस्थां प्राप्ति समकालमेव समस्तक्लेशानां तथा सकलशुभाशुभ कर्मणां भवत्यन्तः। तस्मिन् यस्य योगिनः सकलमावरणं मलञ्च समाप्तिं गतं वर्तते– एतादृशं ज्ञानमनन्त सीमारहितं प्रतिपद्यते। '**ज्ञेय अल्पम्**'– ज्ञेयोज्योतिर्मयोद्रष्टा न्यूनमात्रायामबोधः शेषायते। सर्वं ज्ञातं वर्तते, इषद्भेदोऽस्ति, यदा तदपि भवति बोधगम्यस्तदा योगी कृतार्थो भवति, तस्य कर्त्तव्यं भवति परिपूर्णम्– ''**ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्।'' ( ४/३२ )।**

अतः परं स्वकार्यं प्रपूर्य गुणानां परिणाम–क्रमस्य समाप्तिर्जायते। सम्प्रति गुणाः किमपि परिणामं दातुं न भवन्ति सक्षमाः। तस्मिन् समये योगिनः प्रतिश्वासोपरि प्रतिक्षणोपरि नियन्त्रणं सम्पद्यते। पुरा साधकः घन्टामित समयस्यासीत् प्रतियोगी, हस्तगते साधने क्षणक्षणस्य भवति प्रतियोगी। एकोऽपि श्वासो न व्यर्थो जायते। एतस्य परिणामानन्तर '**निर्ग्राह्य कर्म**'– कर्माणि न किमपि निर्माणं ग्रहणञ्च न कुर्वन्ति, न हितमनहितञ्च विदधति। एतदेव तस्य परिणामः। अत्र पुरुषार्थः पूर्णो जाता साधना च पूर्तिंगता।

''**पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति।'' ( ४/३४ )** येषा स्वरूपार्थं पुरुषार्थः, योगसाधनस्यक्रमः, परिश्रमश्च पूर्तिमगात्, तदा गुणानां स्वरूपे विलीनता द्रष्टुर्वा स्वस्वरूपे प्रतिष्ठापनमेव कैवल्यपदमस्ति। यत्र जन्मनास्ति, मृत्युनास्ति, सुखनास्ति, दुःखं नास्ति– प्रत्युत् अभयपदम्, अमृतमयपदम्, शाश्वतिकी शान्तिरस्ति। ''**तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।'' ( गीता, १८/६२ )** भगवान् श्रीकृष्णो ब्रूते, अर्जुन! हृदयस्थितमीश्वरशरणं याहि। तस्य कृपया त्वं परमां शान्तिं प्राप्स्यसि। तं स्थानं प्राप्स्यसि शाश्वतं सनातनमस्ति।

।। ॐ।।

# उपशमः

## ● द्विप्रकारकौ पुरुषौ

गीतानुसारतः, ''**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।**'' ( १५/१६ ) संसारे द्विप्रकारकौ पुरुषौ स्तः- क्षरोऽक्षरश्च। तृतीयस्तूत्तमपुरुषोऽस्ति, असावस्त्यनिर्वचनीयः। स परमात्मा पुरुषोत्तमश्च समुदीर्यते, किन्त्वस्त्यनिर्वचनीयः।

साध्वनयारीत्या महर्षि पतञ्जलेर्योगदर्शने पुरुषस्य द्वौस्वरूपौ वर्तेते- एकस्तु कालातीतात्मस्वरूपे द्रष्टुः स्थितिः, द्वितीयस्तु यथा वृत्तिप्रवाहोऽस्ति तथैव भवते स पुरुषः - स एव भवद्रूपः, स एव द्रष्टुः रूपोऽस्ति।

महर्षिरादौ वृत्तिस्वरूपं कथिवान्, ते द्विप्रकारिके- क्लिष्टा तथा अक्लिष्टा। अनयोर्वृत्योनिरोध एव योगस्यास्ति लक्ष्यम्। योगशास्त्रस्योपक्रमं विदधानो महर्षिः ब्रूते, '**अथ योगानुशासनम्।**' सम्प्रति धेयं यत् योगः किमस्ति? योगोऽनुशासनमस्त्येकम्। कमनुशासितं कुर्याम्? '**योगश्चित्तवृत्ति निरोधः।**' ( १/२ ) चित्तवृत्तीनां निरोधो योगः समुच्यते। केनचित् कृतश्रमः, अभ्यासवैराग्यो साधितौ- तस्मात् जातो वृत्ति निरोधस्तेन को लाभः? '**तदा द्रष्टुः स्वरूपेऽवस्थानम्।**' ( १/३ ) निरोधेनैव सह द्रष्टा स्वरूपे भवति स्थितः। योऽस्ति चैतन्यम्, अविनाशी, निर्लेपश्च तस्य स्वरूपस्य स्थितिः प्राप्यते। अस्य निरोधात् पूर्वं द्रष्टुः किं स्वरूपम् ? '**वृत्तिसारूप्यमितरत्र।**' ( १/४ ) अन्यस्मिन् समये यथा वृत्तिस्वरूपमस्ति, तथैव भवतेऽस्ति द्रष्टा।

यावत् कालं वृत्तयो वर्तन्ते तावच्छरीरपरिवर्त्तनमनिवार्यम्। '**जात्यन्तर परिणामः प्रकृत्यापूरात्।।**' ( ४/२ ) जातिरर्थात् जन्म। अस्य जन्मनोऽपर जन्मनि परिवर्त्तनं जात्यन्तरपरिणामोऽस्ति। अयम् '**प्रकृत्यापूरात्**'- प्रकृतेः पूर्णत्वे सति भवति। यया प्रकृत्या जीवो निगडायितः तस्याः प्रकृतेः शान्तभवनमुन्नतप्रकृते प्रादुर्भावश्च- इदमेव जातिपरिवर्त्तनमर्थात् जन्मपरिवर्त्तनमस्ति, जात्यन्तरपरिणामोऽस्ति। क्रमश उन्नतिं विदधच्चित्तस्य एकस्मात् प्रकारादपरस्मिन् प्रकारे परिवर्त्तनं जन्मपरिवर्त्तनमस्ति। अस्य परिणामस्य

यस्यां स्थितौ शरीरत्यागो भवति पुनस्तस्यामवस्थायां शरीरं मिलति, किन्तु पुरुषस्य रूपद्वयमेवास्ति। वृत्तीनां निरोधसमकालमेव द्रष्टा स्वाविनाशी परमात्म स्वरूपे स्थितो भवति, कैवल्यपदमासादयति। अन्यथा यथा वृत्तीनां प्रवाह स्तथैव भवते द्रष्टुः स्वरूपमस्ति भवान् च स एव तदेव भवत् स्वरूपमस्ति। वृत्तीनां कारणादेव जन्मपरिवर्त्तनमस्ति।

## ● भजनस्यारम्भः कुतः?

''**तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।**'' (२/१) **तपः-** मनसा सहेन्द्रियदलमिष्टानुरूपं संयमितकरणमस्ति तपः। **स्वाध्यायः-** कियत्या मात्रया मनः संलगेत्, भजनेऽहं कियान् संलग्नोऽस्मि, एतस्य सम्यग्रूपेणाकलनं कुर्वन् भजने प्रवृत्तिरस्ति स्वाध्यायः। **ईश्वरप्रणिधान-** मात्रैकेश्वरं प्रति समर्पणमेवेश्वरप्रणिधानमस्ति। इत एव योगक्रियायाः प्रारम्भो भवति। योगाङ्गानामानुष्ठानेनाशुद्धेर्जाते सति विनाशे तस्य ज्योतिर्मयस्य परमात्मनो ज्ञानस्य प्रकाशो विवेकख्यातिपर्यन्तं सञ्जायते। (२/२८)

## ● अभ्यासः

''**स्थिरसुखमासनम्।**''- स्थिरम्, दोलनचलनविरहितं यस्मिन् सुखं प्रवाहितं स्यात् इत्थमचलस्थिरमुपवेशनं सुखासनं स्मृतमासनं साधनासनं भवेत्। ऋजुस्थिरोपवेशनेन क्वचित् सुखं मिलति? सहजसुखं मात्रैक परमात्मनि विद्यते। यदासनं चिन्तनोपकारकं भवेत्तदैवासनसिद्धिः। ''**प्रयत्नशैथिल्यानन्त-समापत्तिभ्याम्।**'' (२/४७)- उक्तासनं प्रयत्नस्य शिथिलतया तथानन्ते परमात्मनि मनसः संलग्नेन भवति सुस्थिरम्। अहिंसायाम्, सत्ये, अस्तेये, ब्रह्मचर्ये, अपरिग्रहे, शौचे, संतोषे, तपसि, स्वाध्याये, ईश्वरप्रणिधाने च यः प्रयत्नः चलन्नासीत्, तस्मिन्नभ्यासे शैथिल्यमागच्छेत्, प्रयत्नो न भवेत् करणीयः, सहजरूपेणैकस्मिन् परमात्मनि मनो लगेत्, तदासनं सिद्ध्यति।

क्लिष्टाक्लिष्टभेदाभ्यां चित्तवृत्तिद्विधा। एतासां निरोधोऽभ्यास वैराग्याभ्यां भवति। इत्युभयोश्चित्तस्य स्थिरीकरणस्य प्रयासोऽस्त्यभ्यासः। ईश्वरस्य शरणारगत्यनन्तरम्, ओमित्यस्य जपेन, योगाङ्गस्य स्वाध्यायेन च सह अभ्यासारम्भो भवति। अभ्यासममुं दीर्घकालं यावत् सादरं साङ्गोपाङ्ग श्रद्धापूर्वकं

विधानेन '**दृढभूमिः**'- दृढावस्थावान् भवति साधकः। यदा चित्तमचलां स्थिरा स्थितिं प्राप्नोति तदासनं सिद्ध्यति।

कैवल्यस्य प्राप्तिपर्यन्तमभ्यासस्यान्तिमो चरणश्चलति- **पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति। (४/३४)** '**पुरुषार्थ शून्यानाम्**'- यस्य पुरुषस्य कृते किमपि कर्त्तव्य नास्त्यवशिष्टम्, चित्तस्य निरोधना यः प्रयत्न क्रियमाण आसीत्, तत्र यः पुरुषार्थो भवति स्म स पुरुषार्थ पूर्णतां प्राप्नुयात्- अयमेवाभ्यासस्य पूर्तिकालः। तस्मिन् समये गुणानां स्वकारणेषु विलयनमस्ति कैवल्यस्वरूपम्। उद्वा द्रष्टुः स्वस्वरूपे प्रतिष्ठापनमस्ति कैवल्यपदम्। यत्र न तु जन्म न च मृत्युर्नसुखं दुःखमपि न तत्र पूर्णतां प्राप्नोत्यभ्यासः।

## ● वैराग्यम्

अनन्तचित्तवृत्तीनां निरोधोऽभ्यासवैराग्याभ्यां भवति। ''**अभ्यास वैराग्याभ्यां तन्निरोधः।''(१.१२)** किमस्ति वैराग्यम्? समाधिपादस्य पञ्चदशे सूत्रे महर्षिणा कथितम्- ''**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।**'' सृष्टौ यत् किञ्चित् दृष्टिपथमायाति ततोप्यधिकभोगविशेषमहिमा मण्डिते स्वर्गेवैकुण्ठे च श्रूयमाणभोगजातं तद्विषये तृष्णारहित प्रवाहः- चित्तस्य वशीकारावस्थायाः नामास्ति वैराग्यम्।

अभ्यासः सहचलन्नस्ति। अभ्यास्तत्रोपस्थितो यत्र परमतत्त्व परमात्मा विदितोभूतः, तदा प्रकृतिगुणगणं प्रति तृष्णायाः सर्वथा भवत्यभावः। '**तत्परं पुरुषख्यातेर्गुण वैतृष्ण्यम्।।**' पुरुषेऽर्थात् परमपुरुष चेतने, निर्मल परमात्मस्वरूपस्य ज्ञानानन्तर प्रकृतिगुणान् प्रति सर्वथा तृष्णायाः सम्पद्यत अभावः, यदसावस्त्येव नहि तदा तत्र किमन्वेषणीयम् ? यदा किमप्यस्त्येव नहि तत्र तृष्णायाः सर्वथाभावः सुसङ्गतः- इदं वैराग्यस्य पराकाष्ठाभूतं परवैराग्यमस्ति।

विभूतिपादे पुनः वैराग्योपरि प्रकाशः प्रस्तूयते- ''**सत्त्वपुरुषान्यताख्याति मात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च।'' (३/४९)** बुद्धिपुरुषयोः, अर्थात् साधकसाध्ययोः भिन्नतामात्रस्यास्ति यत्र भानम्, एवं सबीज समाधिप्राप्त

योगिनः समस्तभावोपरिस्वामिभावः सम्पद्यते, अयं योगी सर्ववेत्ता भवति, यदा स्वामित्व सर्वज्ञतेति स्थलद्वये जायेद्वैराग्यं तदा दोषस्य बीजानां सर्वथा नाशो भवति कैवल्यस्य प्राप्तिरपि च। अर्थादिदं वैराग्यं कैवल्यपदस्य शाश्वतधामं यावदनुसरण करोति सहैव चलति। अतो वैराग्यस्यानुपालनमस्त्यनिवार्यम्।

## ● ईश्वरः

योगदर्शने परमचेतनपरमात्मानम्, आत्मा, द्रष्टा पुरुष, चितिशक्ति इति संज्ञा द्वारा सम्बोधितं कृतमस्ति। उदाहरणार्थं साधनापादस्यैकचत्वारिंशत्तमे सूत्रेऽस्ति यत् शौचे सति प्रतिष्ठिते योग्यता समायात्यात्मदर्शनस्य। समाधिपादस्य तृतीये सूत्रेऽस्ति चित्तवृत्तीनां सम्पन्ने निरोधे द्रष्टा स्वस्वरूपे भवति स्थितः। कैवल्य पादस्य सप्तदशे सूत्रेऽस्ति यत् चित्तस्य स्वामी पुरुषोऽस्त्यपरिणामी, अतोऽयं सदैव चित्तवृत्ति समूहं जानाति। अस्य पादस्यान्तिमे सूत्रेऽस्ति यत् द्रष्टा चितशक्तेः स्वस्वरूपे प्रतिष्ठित भवनमस्ति कैवल्यम्। अनेन प्रकारेणेमं परमतत्त्वं परमात्मानं द्रष्टा, चित्शक्तिः, पुरुषः, प्रभुः, आत्मा च कथयित्वा सम्बोधितं कृतमस्ति। ज्योतिमयः, तत्त्वस्वरूपोऽस्ति यः।

किन्त्वस्मिन् शास्त्रेऽस्त्येक ईश्वर शब्दः। एकोपलब्धिरसावितो भिन्ना। तदेव स्वरूपोऽयमप्यस्ति। परमचेतनपरमात्मास्ति सहजः, किन्त्वीश्वरोऽयमेकोपलब्धिः। उदेति प्रश्नः, अभ्यासवैराग्योरहं कस्य सहायतां स्वीकरवाणि? '**ईश्वर प्रणिधानाद्वा।**' (१/२३) ईश्वरशरणागत्येयं निर्बीज समाधिर्भवति सिद्धा।

ईश्वरः कः समुच्यते? '**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।**' (१/२४) अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्चेति सन्ति पञ्चक्लेशाः। तदुत्पन्न कर्म, कर्मसंग्रहः, तस्य परिणामः वासना चेति चतुर्भिर्यः सम्बधितो नास्ति समस्तपुरुषेषूत्तमो योऽस्ति स विशेषपुरुष ईश्वरोऽस्ति। पुरा कदाचिदेभिश्चतुर्भिरासीत् सम्बन्धः, सम्प्रतिनैभिर्नास्ति सम्बन्धः, अयमेव विशेषपुरुष ईश्वर अर्थादस्ति स्वामी।

गीतायां क्षात्रधर्मोल्लेखावसरे विद्यते वर्णितम्- '**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।**' (१८/४३) शौर्यम्, तेजः, धैर्यम्, युद्धेदाक्ष्यम्- अर्थात् साधनायां दक्षता, दानमर्थात्

सर्वस्वसमर्पणम्, ईश्वरभाव अर्थात् सर्वभावोपरि स्वामीभावः, इमानि क्षत्रियाणां स्वभावजन्यानि सन्ति कर्माणि। अत्रेश्वरस्यार्थोऽस्ति स्वामी।

**'तत्र निरतिशयं सर्वज्ञबीजम्।'** ( १/२५ ) तस्मिन्नीश्वरेऽत्यन्तं सर्वज्ञताया भावो विद्यते। तस्मिन् सहजास्ति सर्वज्ञता। तस्य समक्षं किमपि वस्तुजातं नास्ति निलीनम्। अहं सर्वज्ञोऽस्मि नेत्थभानमस्ति तस्य। तस्मिन्नयं स्वाभाविकः, आदिकालतः सद्गुरु स्वरूपोऽयमेव।

**'पूर्वेषामपि गुरुः कालेनानवच्छेदात्।'** ( १/२६ ) स ईश्वर आदिकालत एव पूर्वजानामप्यस्ति गुरुः। यतो हि कालस्तस्य नास्त्यवच्छेदकः। कालनिर्लिप्तोऽयं पुरुषः, सद्गुरोरियमेव स्थितिः, अकालपुरुषस्येयमेव स्थितिः।

**'तस्य वाचकः प्रणवः।'** ( १/२७ ) तस्येश्वरस्य वाचकं नाम प्रणवः ओम वा। प्राप्त्यनन्तरं प्रत्येक महापुरुषस्य नामोमस्ति। यस्मिन् स्थितोऽस्ति सः, जपस्तु तस्यैव ओम्, मन्त्रस्यास्ति करणीयः, **'तज्जपस्तर्थभावनम्'** ( १/२८ ) उक्तोम् मन्त्रस्य जपः अर्थस्वरूप परमेश्वर सद्गुरोश्चिन्तन–ध्यानमस्त्यनिवार्यम्। एवं कृते सति **'अन्तरायाभावः'**– विघ्नानां भवत्यभावः, अन्तरात्मनः स्वरूपे प्राप्यते स्थितिः, भवति ज्ञानं तस्य परमात्मनः।

जनाः कथयन्ति यत्, योगारम्भः कुतो भवति? अत उपरि कथितवान् महर्षिः **''तपः स्वाध्यायेश्वर प्राणिधानानि क्रियायोगः।'** ( २/१ ) तपसास्वाध्यायेनेश्वर शरणागत्या ये त्रिभिर्योगक्रियारम्भो भवति। ईश्वरप्रणिधानं तथा सद्गुरौ समर्पणं विना भजनं न जागर्ति।

## ● अन्तरायः ( विघ्नः )

महर्षिः पतञ्जलिः समाधिपादस्याष्टाविंशतित्तमे सूत्रे निर्देशं ददौ **'तज्जपस्तदर्थभावनम्'**– ईश्वरवाचकस्य तस्य प्रणवस्योमित्यस्य जपं कुरुत, तस्यैवार्थस्वरूपेश्वरस्य ध्यानं धरतः, सद्गुरुप्रतिश्रद्धां दृढयत। ध्यानस्य प्रयासं सर्वे कुर्वन्ति किन्तु मनो न लगति। मनस अन्तराले केचन सन्त्येतादृशा विघ्ना उद्वेगं जनयन्ति ये। ओम्, इत्यस्य जपेन सद्गुरुध्यानेन **'अन्तरायाभावः'**– अन्तराले समुत्पद्यमानाः (ये वाह्यरूपेण न दृष्टिगोचरायन्ते, अन्तर्मानस एव घटन्ते) इत्थमन्तरायाभावत् अन्तरात्मा स्वरूपस्य ज्ञानं भवति।

येषामन्तरायाणां भवत्यभावस्ते के सन्त्यन्तरायाः? अस्मिन् विषये महर्षि समाधिपादस्य त्रिशत्तमे सूत्रे कथयति– व्याधिः, स्त्यानम्, संशयः, प्रमादः, आलस्यम्, अविरतिः, भ्रान्तिदर्शनम्, चालब्धभूमिका अनवस्थितत्त्वम्, इमे चित्तस्य सन्ति नवविक्षेपाः। एत एव कथ्यन्तेऽन्तरायाः।

**व्याधिः –** शरीरे, इन्द्रिये च कस्यापि रोगस्य जन्म, येन चिन्तनाच्चित्तं विचलितं भूत्वा रोगचिन्तायां संलगति।

**स्त्यानम् –** साधनायां प्रवृत्तिबाधकं स्वभावं कथयन्ति स्त्यानम्।

**संशयः –** स्वशक्तौ योगस्य फले च सन्देहोऽस्ति संशयः।

**प्रमादः –** योगसाधनानुष्ठानामवहेलनम्, निरर्थक चेष्टासु समययापनमस्ति प्रमादः।

**आलस्यम् –** भजनं पुनः करिष्यामि कदाचित्, इत्थं समयपरिवर्त्तनं भोजनाधिक्यादपि जायते तदालस्यम्।

**अविरतिः –** तीव्रवैराग्याभावोऽविरतिरस्ति। यदा–कदा जाते विषयसंसर्गे वैराग्यस्थाने विषयेन्द्रियरागोऽविरतिः कथ्यते।

**भ्रान्तिदर्शनम् –** साधनेयं समीचीना न वा– योगसाधनायां तथ्यमतथ्यरूपेण चिन्तनं भ्रान्तिदर्शनमुच्यते।

**अलब्धभूमिकत्वम् –** कृते सत्यपि साधने योगपूर्वपीठिकायां स्थितेरप्राप्तिरलब्धभूमिकत्वमस्ति।

**अनवस्थितत्वम् –** योगे सम्यक्रूपेण स्थिरे चित्ते सहसोच्चाटनोदयः, कारणं विनैव पञ्चसप्त मिनटात्मकोद्वेगस्य संस्फुरणमनवस्थितत्वं समुच्यते।

इमे सन्त्यन्तरायाः, वाह्यतो न कस्यापि संगदोषः, नाघातः कस्यापि विषयस्य, अन्तरतः एते समुद्वेलयन्ति, एतेषां पञ्चापरे सहायकाः सन्ति विघ्नाः। एष्वस्ति प्रथमः –

**दुःखम् –** दैहिकदैविकभौतिका इति त्रितापा एव सन्ति दुःखानि। दैहिकं शरीरे भवं दुःखम्, भूकम्पातिवृष्ट्यनावृष्ट्यात्मकं दैविकमस्ति दुःखम्, भूतप्राणिसंसर्गजदुःखं भौतिकं समुच्यते।

**दौर्मनस्यम् -** स्वाभीष्टस्यपूर्त्यभावे द्वैविध्ये मनसः प्रधावनं मनसि क्षोमोत्पत्तिः दौर्मनस्यमुदीर्यते।

**अंगमेजयत्वम् -** चिन्तने सुतरा समुपवेशनावसरेऽङ्गेषु समुत्पन्नकम्पनमङ्गमेजयत्वं कथ्यते। यदा कदा सम्पूर्ण शरीरं समुच्छलति। योगस्याष्टांगानामसन्तुलनमप्यङ्गमेजयत्वं बोध्यम्।

**अनियमित श्वासप्रश्वासौ -** श्वासस्तु स यो गृह्यते यस्तु त्यज्यते स प्रश्वासः। साधकः सजातीयप्रवृत्तिं गृहणाति, विजातीयप्रवृत्तिं परित्यजति। यदा-कदा अनिच्छित वाह्यविद्याजनित स्वराभ्यन्तरे प्रवाहिता भवन्ति। साधकेच्छा विपरीतमाभ्यन्तराविद्याजनित स्वरा बहिः प्रस्फुरिता भवन्ति। स उपदेशं दातुं प्रयतते।

उपर्युक्त विजातीय तर्कवितर्का यदा यमनियमयोरनुष्ठाने बाधां प्रापयन्तु तर्हि '**वितर्कबाधने प्रतिपक्षभावनम्।**' ( २/३३ ) तेषां प्रतिपक्षी विचाराणां भूयोभूयः चिन्तनं करणीयम्। अहिंसाया स्थाने हिंसा, हिसायाः स्थानेऽहिंसा, सत्यस्थानेऽसत्यादिविकारा वितर्काः सन्ति। इमे विपरीता विजातीयास्तर्काः कदाचित् स्वयं क्रियन्ते कदाचित्तु परैः कार्यन्ते। यदा-कदा केवलमनुमोदनकरणमपि भवति वितर्कः। एतेषां कारणं क्रोधमोहलोभाः सन्ति। एषु विकारेषु कश्चिदल्पः कश्चिन्मध्यमः कश्चिद्दीर्घतमो भवति। सर्वे विकारा दुःखरूपमज्ञानरूपमनन्त फलदाः सन्ति। एतादृश्या भावनयोक्त विचारेभ्यः संरक्षणमस्ति प्रतिपक्ष भावना। यथा- इमे विकारा दुःखदास्तथानन्तयोनियात्रा कारणानि सन्ति। एतदेवेतेषां निकृष्टं फलमस्ति। इत्याकारक भावनाकरणमस्ति प्रतिपक्षभावना। अनया भावनयापि न्यूनायन्तेऽन्तरायाः। शनैः-शनैः पलायन्ते, भवन्ति निष्प्रभावा च। किन्तु ते चिन्तनैव निर्मूलायन्ते, द्रष्टुदृश्यसंयोगतो दूरायिता भविष्यन्ति। असाविष्टः कामयते किम्- तेषां निर्देशानुसारेण चलनेन, ईश्वरादेश पालने च नश्यन्तीमेऽन्तरायाः।

## ● चित्तशुद्धेरुपायः

ओमित्यस्य जपात्, ईश्वरंप्रति पूर्णश्रद्धार्पणात् सम्यक् प्रकारेणन्तरायाः शान्ताः भवन्ति। किन्तु साधकस्य दिनचर्य्या कीदृशी भवेत्, एषामन्तरायाणामाशु

निवारणाय महर्षिरनेकोपायानां परामर्श ददाति। सर्वप्रथममस्ति तस्य महर्षेः परामर्शः, इत्युक्तन्तरायाणां वारणाय नामरूपादि कस्याप्येकस्य तत्त्वस्य सततमभ्यासाः करणीयः (१/३२)। एतदतिरिक्तं सुखदुःखपुण्यपापाख्य भावान् प्रति क्रमशः मित्रतादयानन्दोपेक्षाख्य भावान् संधारणीयम्। सुखीजनैः साकम् (वास्तविकं सुखं मात्रैक परमात्मनः साम्मुख्ये वर्त्तते, एव जनै) मित्रतां, अनेन प्रकारेण संसारासक्तान्, दीनान्, दुःखी जनान् प्रति दयाभावोधार्यः पुण्यवंतः जनानवलोक्य हर्षानुभवः करणीयः, पापी जनान् प्रति तटस्थाया भावः स्वीकार्यः। समाजे निवसतैव साधकेन भवति करणीयं भजनम्। एतदर्थं साधक व्यवहारस्योल्लेखः कृतः। महर्षिणा तृतीय परामर्श प्रदत्तः, यत् प्राणवायोः वारम्वारं बहिर्निःसारणेन तथावरोधनस्याभ्यासेन चित्तं भारहीनं गुरुतामुक्तं भवति। तेषामस्त्याशयो यत् प्राणवायुं बहिः निःस्सार्य यथाशक्ति बहिरेवरोधनीयः, पुनः श्वासग्रहणं बहिर्निसारणमवरोधञ्चैवं त्रिवारं वारचतुष्टयम्वाभ्यासेन शरीरान्तराले स्थितो वायुस्तेन सह विजातीयं संकल्पा अपि बहिर्निगच्छन्ति। भारहीनं प्रतीयते शरीरम्। अनेनाभ्यासेनैव सह चिन्तने प्रवर्त्तनीयम् नाम्नि रूपे च कुत्रापि मनः संयोजनीयः, मनो लगिष्यतीमे विकारा बाधां प्रस्तोतुं न शक्ष्यन्ति।

योगसाधनमस्ति साधकस्य प्रमुखो विषयः, यथा चित्तवृत्तीनां निरोधः, द्रष्टुरुपलब्धि, स्वरूपे स्थितिः, साधकस्याभीष्ट कैवल्यपदविषये सहायक प्रवृत्तीनां चिन्तनमपि चित्तं निर्मलयितुं मनः स्थिरयितुं भवति सहायकम्। **'समिटि समिटि जल भरहिं तलावा। जिमि सद्गुन सज्जन पहिं आवा।।' (रामचरित मानस, ४/१३/४)** गुणदोषमया सृष्टिरस्ति। कोटि-कोटि दुर्गुणान्तराले कतिपयार्थादेकादिगुणोऽवश्यं मिलति। साधकस्य दृष्टिः मात्र तद्गुणोपरि भवति। साधनोपयोगी गुण ग्रहणेमपि चित्त भवति निर्मलम्।

साधनायाः समुन्नयने सम्पन्ने शोकोन्मुक्तज्योतिमयेनपरमात्मना सन्देश सम्प्रेषणं क्रियते, प्राप्ते सन्देशे चेतस्योत्साहोमङ्गौ प्रविशतः। तदाश्रयेण प्रस्थानात् चित्तं निर्मलं भारहीनञ्च भवति।

एतदितिरिक्तं चेत् कश्चिद्रागरहितोनिवृत्ततृष्णो महापुरुषं संगमोपलब्धिस्यात् तदा तस्य दर्शनं संसर्गः, वाणीश्रवणम्, स्पर्शः, सेवाकरणम्, इति विधिनापि अन्तरायाणामपसारणे नामरूपयोश्चिंतने सहायता मिलति।

स्वप्नन्तु सर्वे पश्यन्ति किन्तु योगी कदापि न पश्यति स्वप्नम्। स स्वप्ने यत्किचिन्निरीक्षते भविष्यं भाव्यञ्चावलोकयति। भगवान् द्रष्टृदृश्यसंयोगेन कथयति। जागृतावस्थायामपि तत् दृश्यं प्रस्तौति, साधका यदा शेते तदापि तस्य मनोजागर्ति। तस्य स्वप्नसंसारं भगवान् धारयति। तत्राप्यसौ स्वप्नप्रसारणे तत्परः सन्तिष्ठते। अतः साधकेन बोधः करणीयो भविष्यति यत् स्वप्नः किं कथयति? अस्यास्ति किमाशयः? निद्राकाले स्वप्नरूपेणागन्तुकानां दृश्यानामाशयं जानानश्चलनेनान्तरायस्यान्तो नाम्निरूपे चित्तस्य संलगनं सहैव सम्पद्यते।

मनसः स्थिरीकरणपरिप्रेक्ष्ये महत्वपूर्णमेकं सूत्रमवतारयति महर्षिः- '**यथाभिमतध्यानाद्वा।**' (१/३९)- साधकस्य स्वाभिते ध्यानेन मनः स्थिरायते। साधकस्यास्ति मतानुकलमभ्यास, वैराग्यस्य पालनम्, योगस्यानुष्ठानम्, चित्तवृत्तीनां निरोधः, द्रष्टुः स्वरूपेऽवस्थानम्, तदनुरूपं कश्चिद्विचारः, कश्चिदृष्टान्तः कश्चिद्भावो मिलति तर्हि तेन साधकः सहयोगं लभेत्। उदाहरणार्थं भगवान् दत्तात्रेयस्य जातः कुक्कुरसंगमः, खगो मिलितः, अजगरो मिलितः, असौ मुनिः सद्गुरु विद्यानुरूपमुक्त कुक्कुरादितो योगसाधनानुरूपं गुणं जग्राह। स कालान्तरे महायोगेश्वरः, अवतारश्च स्वीकृतः। इत्थमेव साधकः प्रकृतिघटनाचक्रात् स्वयोगानुकूलं सहयोगमाददान एकस्मिन्नीश्वरे श्रद्धा तस्योमनाम्न जपं कुर्वनभ्यासवैराग्यसाहाय्येन सततमग्रे वर्धते। एतादृशो योगी परमाणुतः समारभ्य परं महत्तत्त्वं यावत् भवति सक्षम वशी। स महतो महति, सूक्ष्मात् सूक्ष्मे वस्तुनि यदेच्छेत्, यस्मिन्नपि क्षणे निजचित्तं तत्ररोद्धुं शक्नोति। इमे साधनायाः सहायकाङ्गानि सन्ति न कापि पृथक् साधना।

सृष्टौ साधकस्य पुरतो नैकानि प्रस्फुन्तः सन्त आयान्ति, किन्तु साधकेन तेषामाशयं योगपरकं निर्माय धारणीयः। उदाहरणार्थमर्जुनः शस्त्रानुसन्धानार्थं देवराजेन्द्रस्यामवतीमासीत्। इन्द्रस्य सभायामर्जुन उर्वशीं ददर्श पश्यन्नेवावस्थितः। सभावसाने देवा उचुः, देवेन्द्र! भवतोक्तं मम पुत्रस्त्याग्यस्ति, तपस्वी चास्ति, जितेन्द्रियोऽस्ति। अयन्तु यदागतवती साप्सरास्तामेववलोकयन्त आसीत्। अस्मिन्नैतदबोधो यदियं पवित्रा परिषदत्र के सन्ति विराजमानाः? इन्द्रेनोक्तमहमपि पश्यन्नासम्। स एव प्रष्टव्यस्तेन किमवलोकितम् ? नृत्यं कीदृशमासीत् ? देवैः कृते सति प्रश्ने प्रकृतिस्थो बभूवार्जुनः, देवान् सादरं प्रणम्योवाचः- "क्षम्यतां

मया नृत्यं न दृष्टम्।" देवाः सस्मितं पुनः पप्रच्छुस्त्वं किं पश्यन्नासीत् ? अर्जुनेन कथितम्, "मातु कुन्तीतो विरहितस्य मेऽनेकवर्षाण्यतीतानि, यदा देवीं प्रति यातः दृष्टिपातो मयानुमितो यत् कदाचिन्मे जननी समागता, तदातोऽहं मातृस्नेहे निमग्नोऽस्मि।" आसीत्तु साप्सराः किन्तु पार्थस्तां मातृवत् दृष्टवान्। सा शप्तवती किन्तु शापोऽपि वरदानायते। यदा साधको लक्ष्यमाप्तुं दृढोऽचलश्च भवति, तदा शापोऽपि भवति आशीर्वचनम्। विपदपि भवति सम्पद्। इत्थं योगपरकार्थग्रहणेन साधकस्य चित्तं शान्तं स्थिरं भवति।

## ● क्लेशः

तपसास्वाध्यायेनेश्वरप्रणिधानेन च समाधेर्भावना भवति स्थिरा तथा '**क्लेशतनूकरणार्थश्च**'– क्लेशान् क्षीणयतुमपि क्रियायोगस्यावश्यकता भवति। किमस्ति क्लेशः? '**अविद्यास्मितारागद्वेषअभिनिवेशाः क्लेशाः।( २/३ )**' अविद्यास्मितारागद्वेषाभिनिवेशा– इमे पञ्चक्लेशाः सन्ति। एषां क्लेशानां मूलमविद्यास्ति। शेषाः सर्वे क्लेशा अविद्यया सह चलन्ति।

**अविद्या –** अनित्ये नित्यस्य, अपवित्रे पवित्रस्य, दुःखे सुखस्य, अनात्मनि आत्मभावस्य च प्रतीतिः समुच्यतेऽविद्या।

**अस्मिता –** दृग्‌दर्शनशक्तीनामेकरूपतास्ति अस्मिता, अर्थात् प्रकृतिपुरुषात्मनां सम्मिश्रणमस्मिता कथ्यते।

**रागः –** अनुकूलसुखकर वस्तुनामाभिमुखं धावनशील मनसः प्रवाहः समुच्यते रागः।

**द्वेषः –** यस्मात् मिलति दुःखं तस्य त्यागप्रयत्नोऽस्ति द्वेषः, यो दुःखस्यानुमानं करोति।

**अभिनिवेश –** 'स्वरसवाही' यः परम्परया प्रचलन् समायाति, तथा मूढवत् विवेकशील पुरुषेस्वपि सदा विद्यमानं दृश्यते, सोऽस्त्यभिनिवेशः, अर्थात् पूर्वसांसारिक जीवनमस्ति, यं प्रत्यद्यापि पूर्ववत चलनायात्यनुरागः। प्रकृतिस्थ जीवनं नास्ति मम गृहम्, किन्तु मया स स्वनिवासः स्वीकृतो विद्यते। ममास्ति वास्तविकं गृहं किमिति, कबीरस्य शब्दे द्रष्टव्यम्– '**तवन घर चेतो हो भाई। तोहरा आवागमन मिटि जाई।**' एतदेव भगवता कृष्णेन समुदीरितम्, '**स्थानं**

**प्राप्स्यसि शाश्वतम्।**' शाश्वतस्वरूपमेवास्त्यस्माकं धाम किन्त्वस्मिन् संसारे यत्राहं निवसामिस्म तं प्रत्यभिरुचिरस्त्यभिनिवेशाः। अयमस्त्यकः क्लेशः, श्वः प्राप्तिः सम्भाव्यते पुनरप्यद्यावधि स समाकर्षति। अग्रिमे पले प्राप्तिः सुगमा तावदनुगमनं करोति। अतो मूढ़ानामिव विवेकशीलेष्वपि दृश्यतेऽयमभिनिवेशः।

तपःस्वाध्यायेश्वरप्रणिधानैरिमे क्लेशाः क्षीणा भवन्ति, न तु नश्यन्ति। सूक्ष्मावस्थां प्राप्तेमाः क्लेशाः प्रणाशयितुमर्हाः। एतेषां पूर्ववृत्तीनामभावो ध्यानेन जायते।

क्लेशोऽस्ति यस्य मूलम्, ततः समुत्पन्नं संगृहीतं कर्मसंस्कारसमुदायम्, पुनर्जन्म, आयुः, भोगश्च ददानस्तिष्ठति। ते जन्ममृत्युभोगाः कदाचिद्धर्षं कदाचिच्छोकं ददन्ते। यतो हि पाप पुण्य कर्माणि तेषां कारणानि सन्ति। पुण्यकर्म यदाह्लादं जनयति तदपि दुःखरूपमेवास्ति, यतो यत्र पुण्यकर्म संस्कारो भवति शान्तः, ततः पापकर्मणां संस्कारारम्भो प्रारभते। परिणामतः पुनः दुःखं स्वाभाविकम्। अतो विवेकीना कृते सर्वं जातं दुःखस्वरूपमेवास्ति।

**हेयं दुःखमनागतम्** ( २/१६ )– यद्दुःखमागमनशीलमस्ति, तद्विनाशयितुं योग्यमस्ति। एतेषां क्लेशानां विनाशस्योपायो द्रष्टृदृश्य संयोगोऽस्ति। तपःस्वाध्यायेश्वरप्रणिधानस्य क्रिया प्रचलन्त्यासीत्, तया क्लेशाः क्षीणायिता अभूवन्। किन्तु महर्षिः नूतनमेकं सूत्रं प्रादात् यत् द्रष्टुः दृश्ययोश्च संयोग एवोक्त क्लेशानामन्तस्यैकमात्रोपायः। एतानि दृश्यानि कानि? प्रकाशक्रिया स्थितिश्चास्ति येषां स्वभावः, अर्थात् ईश्वरीयप्रकाशः प्रकाशोन्मुख सम्वर्धनकारी क्रिया प्रकाशे च स्थिति प्रदानमस्ति येषां स्वभावः, भूतानीन्द्रियाणि च येषाप्रस्फुटं स्वरूपमस्ति। अर्थादिन्द्रियेषु विविधस्वरूपेषु येषामुदाहरणवत् प्राकट्यम्। कदाचिल्लिङ्गमात्रं कदाचिदलिङ्गार्थात्, आकाशवाणीत्यादि माध्यमेन चलन्ति। पुरुषार्थं भोगमोक्षसम्पादनमस्ति यस्य प्रयोजनम्, '**भोक्तारं यज्ञ तपसां**'– श्रद्धायज्ञतपःस्वाध्याय इति पुरुषस्य भोगाः सन्ति। तेषां व्यवस्थां सम्पादयन्, अपवर्गस्य परमश्रेयसः प्राप्तिनिष्पादनं दृश्यस्यास्ति प्रयोजनम्।

द्रष्टा चेतनमात्र ज्ञानस्वरूपोऽस्ति। द्रष्टा स्वभावतः सर्वथा शुद्धो निर्विकारश्चास्ति, किन्तु बुद्धिवृत्यनुकूल पश्यत्यसौ, अर्थाद्बुद्धेरुपरि यथा पतति प्रभावस्तदनुरूपमेवासौ दृश्यप्रसारयति।

द्रष्टुः दृश्यस्य च संयोगस्यायमभिप्रायोऽस्ति, अनुभवः। यं परमात्मानमहं कामये, यस्मिन् धरातलेऽहं स्थितोऽस्मि, मम साधना, तपः, स्वाध्यायः, ईश्वरप्रणिधानम्, लगनम्, एतत् सर्वमनुरागपूरित हृदयेनेत्थं भवेत् येन सजागृयात्। स निर्विकार द्रष्ट्रिदृश्ययोः प्रसारं कर्त्तुं लगेत्। परमात्मा स्वपक्षतः दृश्यं प्रस्तोतुमारभेत्। स अर्जुनवत् दिव्यदृष्टिं वितेरत्, संचारं यच्छेत्, स्वविभूतिवर्गं बोधयेत् एतेदवास्ति द्रष्टुः दृश्ययोश्च संयोगः। भजनस्य जागृतकरणम्, परमात्मनो जागृतभवनम्, रथी भवनम्, द्रष्टुः दृश्योः संयोगोऽस्ति। '**जाके रथ पर केशो, ताको कौन अंदेशो।**' तस्य परमात्मनः निर्देशप्राप्तिकरणम्, तस्य संरक्षणे पथि प्रस्थाने क्लेशानां भवत्यन्तः। यत् क्लेशान्तः कस्यचिन्तत्वदर्शी-महापुरुषमाध्यमेनैवास्ति सम्भवः।

येषामात्मतृप्तानाम्, आप्तकामानाम्, महापुरुषाणां भोगापवर्गयोः कार्यं परिपूर्णतां गतं विद्यते, तेषां कृते तत् दृश्यस्य किमपि प्रयोजनमेव न संघटते। किन्त्वपरेषां साधारणपुरुषाणां कृते तस्य महापुरुषस्यान्तर्जगतः एव दृश्यं प्रसारितं भवति। कैवल्यपादे पुनरपि विषयेऽस्मिन् बलं प्रदत्तम् यत् द्रष्टुः दृश्ययोश्च संयोगतः प्रभावितं चित्तं '**सर्वार्थ**'- सम्पूर्णानर्थान् ग्रहणं कारयति तथा तच्चित्तमसंख्य वासनावृत्तोऽपि परमार्थिकमर्थं ग्रहीता '**विशेष दर्शिनः**'- विशेष पुरुषस्येश्वरस्य दर्शनकर्त्ता भवति। स आत्मभावतः, अहं भावतः, ऊर्ध्वमुत्थाय कैवल्याभिमुखं भवति।

विवेकदक्षेण, कैवल्याभिमुखेन चित्तेन किमपि शुभाशुभं निर्माणं न क्रियते। किन्त्वेवमवस्थायामपि स्फुरणं भवत्यन्तराले, समायान्त्यन्ये संकल्पास्ते '**संस्कारेभ्यः**'- संस्कारादायान्ति। संस्कारस्यान्तर्गर्भे वर्त्तत अतिसूक्ष्मं निधानम्। तदेव प्रस्फुरति। '**हानमेषां क्लेशवदुक्तम्।**' (४/२८)- एषां संस्काराणामुन्मूलनं क्लेशानामिव करणीयम्। यतो हि संस्काराणामेषां मूलं क्लेशोऽस्ति। यस्य परिणामः, आयुः, पुनर्जन्मादयः भोगश्चास्ति।

इमे सूक्ष्मसंस्कारा भवन्ति कदा नष्टाः? यस्य योगिनो विवेकज्ञानस्य महिम्न्यपि भवति वैराग्यं तस्मिन् समये तस्य वैराग्यं सर्वथा भवति देदीप्यमानम्, स धर्ममेघ समाधिमासादयति। चिदाकाशे सर्वत्रैव धर्म एव प्रकाशते, नान्यत् किमपि। तस्य प्रभावतः कालस्य, क्लेशस्य, कर्मणाम् सर्वथा भवति विनाशः।

सारांशतो महर्षिपतञ्जलेः कथनानुसारेणाभ्यासवैराग्ययमनियमासनतपः-स्वाध्यायेश्वरप्रणिधानादीनां विधिवदनुष्ठानेन क्लेशाः क्षीणायन्ते, न भवन्ति सर्वथा नष्टाः। अस्मदीया श्रद्धा भवेदीयती प्रबलाप्रौढ़ा च परमात्मा जागृतो भूत्वा स्वदृश्यं प्रसारयितुं प्रारभेत् यः पुरुषाय मुक्तिसाधनं सम्पादयति। तन्माध्यमेन सञ्चालितो क्लेशानां सर्वथा भवति विनाशनम्। अर्थादिष्टजागृतिरनिवार्याः। तपःस्वाध्यायेश्वर-प्रणिधानैरयं क्लेशनाशः सम्भवः। महर्षि पतञ्जलेरनुसारम् 'ईश्वरः' पूर्णत्वप्राप्त योगिनः महायोगेश्वरस्यैकः स्वरूपोऽस्ति तथा द्रष्टा, चेतनः, प्रभुः, आत्मा, अविनाशी, चितिशक्ति इत्यादि एकस्य परमात्मनः शाश्वत ब्रह्मणः सम्बोधनमस्ति।

## ● योगस्याष्टाङ्गाः

योगस्य विभिन्नाङ्गानुष्ठानेन तथानुष्ठानं कारं-कारमशुद्धेर्भवति नाशः, तास्मिन् काले ज्ञानस्य प्रकाश विवेकख्यातिपर्यन्त सम्पद्यते। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय एतेऽष्टावङ्गा सन्ति। एतेष्वष्टस्वङ्गेषु प्रथमाङ्गोऽस्ति यमः। यमस्यापि सन्ति पञ्चाङ्गाः - अहिंसासत्यब्रह्मचर्यास्तेयापरिग्रहाः।

**अहिंसा -** शरीरमेकं वस्त्रमस्ति। जीवनमृत्यु संस्कारोपरि समाश्रितोऽस्ति। संस्कारे जाते जीर्ण प्राचीनं वस्त्रं परिवर्त्तते। एकस्मिन् दिवसे एतेभ्यो शरीरेभ्यो परं शुद्धं स्वरूपप्राप्त्य सह शरीरधारणक्रमो विरमति। अहिंसायास्तात्पर्यमस्ति यत् निजात्मनमधोगतिं न प्रापणम्। अहिंसायाः स्थितौ समायातायां दृढतायां तस्य योगिनमन्तिके '**तत्सन्निधौ वैरत्यागः**'- सर्वे प्राणिनस्त्यजन्ति वैरम्। वैरिणः सन्ति कामक्रोधलोभमोहमदमत्सराः। महापुरुषशरणं गते सत्येवेमे विकाराः साधकं मुक्तकर्त्तुं लगन्ति।

अर्जुनः पृष्टवान्, "प्रभो! कस्य प्रेरणया मनुष्यः पापाचरणं करोति?" भगवतोक्तम्, "**काम एष क्रोध एष रजोगुण समुद्भवः। महाशनो महापाप्मा विद्धयेनमिह वैरिणम्।। (३/३७)**" अर्जुन! कामक्रोधावग्निसदृशौ भोगात् सदातृप्तौ निरन्तरवैरिणौ स्तः। दुर्जेयावुभौ वैरिणो। दृढ़वैराग्यरूपिणा शस्त्रेणोभौछिन्धि। रागद्वेषयो वशे न स्थातव्यम्। इमौ तव प्रतिपान्थिनौ विरोधिनौस्तः। अहिंसायाः दृढां स्थितिं पारंगतस्य महापुरुषस्य शरणसान्निध्ये प्राप्ते सत्येव पुरुष एतयोस्त्यागं कर्त्तुं प्रारभते।

**सत्यम्** - संसारो नश्वरमस्ति। केवलं परमात्मेव सत्यम्, नित्यम्, परमत्त्वम्, सनातनम्, द्रष्टा, ध्येयमस्ति। सत्ये समायातायां दृढ़स्थितौ समर्पणेन सम्बन्धे प्रारम्भे '**क्रियाफलाश्रयत्वम्**' योग-क्रियायाः फलमस्ति यः परमात्मा, तस्याश्रयः, संरक्षणाञ्च मिलति। भगवान् योगक्षेमयोर्व्यवस्था कर्त्तुं लगति।

**अस्तेयम्** - चौर्यस्य तथा तिरोहनस्याभावो अस्तेयं समुच्यते। गीतायामस्ति- **तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः।। (३/१२)** एतेषा दैवी गुणानां समृद्ध्या विना यः कथयति प्राप्तवानहम्, सोऽस्ति निश्चयरूपेण चौरः। यदा न लब्धवान् तदा मोक्ष्यसि किम् ? अस्मान्मार्गात् मुखनिलीनकर्त्ता निश्चयतश्चौरः। साधके चौर्याभावोऽनिवार्यः।

पूज्य गुरुमहाराजा कथयन्ति स्म यत् सद्गुरोः समक्षं यद्भवेत् हृदये तदेव जिह्वातो निःसारणीयः। हृदये किमप्यन्यत् जिह्वायामन्यत्, एवंदृशो योगी नासादयति सफलताम्।

अस्तेये सफले जाते '**सर्वरत्नोपस्थानम्**'- सर्वाणि रत्ना भवन्ति प्रकटितानि। इमानि रत्नानि सन्ति विवेकवैराग्यशमदमज्ञानतपश्चरित्राणि प्रभृतयः। इमे दैवीगुणाः सुलभाजायन्ते।

महावीर उक्तवान्, 'राजन्! त्रिरत्नं धार्यताम्।' '**ज्ञानतपश्चरित्राणि**' अर्थात् साधनाया विधिबोधः, इष्टे श्रद्धा, तपश्चरणम्, ईश्वरपथ पथिकस्यैमानिरत्नानि सन्ति।

समुद्र-मन्थने नैकानि समुत्पन्नानि- **श्री मणि रम्भा वारुणी, अमिय संख गजराज। कल्पद्रुम शशि धेनु धनु, धनवन्तरि विष बाज।।** कदाचिदेषां रत्नानां मध्यतो रम्भावारुणी प्राप्तौ भवेतां तदा साधकः किं करिष्यति? योगपथस्य रत्नानि तानि सन्ति, यैः सुलभानि भवन्ति साधनानि।

भगवान् काकभुशुण्डिनं दर्शनं दत्वा प्रोवाच-

**ज्ञान विवेक बिरति बिग्याना। मुनि दुर्लभ गुन जे जग जाना।।**
**आजु देउँ सब संसय नाहीं। मागु जो तोहि भाव मन माहीं।।**

**(उत्तरकाण्ड, ८३/१)**

वस्तुत एते गुणा एव सन्ति रत्नानि। अस्तेयेन सम्पूर्णसाधनविभूतय सुलभायन्ते।

**ब्रह्मचर्यम् –** ब्रह्मणि चरति यः स ब्रह्मचारी। यः ब्रह्मण आचरणमात्मनि समवतारयति स ब्रह्मचारी। शाश्वतस्य सनातनस्य ब्रह्मणः कृते यः प्रयत्नशीलः स ब्रह्मचारी। '**यदिच्छन्तो ब्रह्मचर्यं चरन्ति**'– तस्य शाश्वतस्य परब्रह्मणो यथार्थ रहस्यं ज्ञातुं यानि साधनानि सन्ति, तेषासाधनानां स्वस्मिन् सम्प्रेषणस्य सन्निवेशस्य वा व्यक्तिर्यस्माद्दिनादारभते, तस्माद्दिनादसौ ब्रह्मचारी बोध्यः। केवलं जननेन्द्रिय संयम एव ब्रह्मचर्यं नास्ति। साधकस्य मुख्यं लक्ष्यमस्ति स परमात्मा यमासादयितुं सर्वेषामिन्द्रियाणां बहिर्मुखीं प्रभावमवरोधव्यम्, इति साधकस्य प्रमुखं लक्ष्यं स्यात्। तस्य परमात्मनो निरन्तरस्मरणेन जननेन्द्रियस्यैव न भवति संयमः प्रत्युत् सकलेन्द्रियाणां भवति संयमः। नेत्रे नान्यत् किमपि पश्यतः, श्रोत्रे नापरं किमपि शृणुतः, त्वचा न जायते परस्पर्शः, न मनसि भवति कस्याप्यन्यस्य विकल्पस्य प्रादुर्भावः, केवलमिष्टोन्मुखी प्रवृत्तिर्भवति जागृता, एवं ब्रह्मचर्यस्य दृढ़ायां समायातायां स्थितौ '**वीर्यलाभः**'– सम्पूर्ण सामर्थ्यस्य लाभो भवति।

उपस्थेन्द्रियस्य (जननेन्द्रियस्य) संयमोऽस्त्यनिवार्यः। संयमोऽयं ब्रह्मचर्यव्रतान्तर्गतोऽस्ति। केचन् हठपूर्वकं जननेन्द्रिय संयमं तु साधयन्ति, किन्त्वपरैरिन्द्रियैर्विषयस्य चिन्तन भवत्येव। सर्वेषां विषयाणां चिन्तनविरामो विशुद्धब्रह्मचर्यमस्ति।

भगवान् श्रीकृष्ण आह यत् ये हठात् संयम्येन्द्रियं मनसा विषय चिन्तनं कुर्वन्ति ते दम्भिनः पाखण्डिनश्च सन्ति। अतः समस्तेन्द्रियसमूहं ब्रह्मणो वृहत्तत्त्वरूपस्य परमात्मनोऽनुरूप प्रवाहितकरणमस्ति ब्रह्मचर्यम्। यदा च ब्रह्मचर्यव्रतस्यायाति दृढावस्था तदा सामर्थ्यवीर्यशौर्यपराक्रमाणां लाभा भवति। स भवति धैर्यवान्, विपदोऽपि समागछन्तु नाम स मीराप्रह्लादयोरिव न भवति व्यग्रो न पृष्ठानुगामी भवति। नैतादृश्यः विपदः सन्त्येव नहिं यास्तं पदच्युतं कर्त्तुं शक्नुयुः। सोऽस्ति अजातशत्रुः।

**अपरिग्रहः –** सामाजिकसन्दर्भे स्वार्थसिद्धि दृष्ट्या प्रयोजनादधिकवस्तूनां संग्रहत्यागोऽपरिग्रहः समुच्यते। अपरेषां वस्तु स्वीकृतिरपरैरनुग्राह्यताभारः

समापतति। दानग्रहणेन दातुः पापग्रहणस्य सम्भावनापि सुसङ्गता प्रतीयते। अतः परिग्रहत्यागात् मनः शुद्धं स्वाधीनं विहरति। परन्तु योगीनां कृतेऽपरिग्रहस्यास्ति विशेषायः। ध्यानस्थिते जागृते सति, ध्यानजनित चित्तम् **'अनाशयम्'- (४/६)** न भवति नष्टम्, कुतो हि योगिना कर्माणि भवन्त्यशुक्लान्यकृष्णानि। कर्मणां फलं न शुभं न चाशुभं मिलति। तस्मिन् समये सोऽपरिग्रहस्थितिवान् भवति। तस्य कर्मभिर्नशुभस्य ग्रहणं भवति न चाशुभस्य जायते निर्माणम्। तस्मिन् समये नूतना रचना तु भवत्येव नहिं किन्तु पूर्वजन्मनः संस्कारान्तले किमस्ति निलीनम्, तत् कियत् कालं स्थास्यति, कियत्या साधनया तत् भविष्यति शान्तम्, इति वृत्तस्य ज्ञानं जायते। महर्षिः पतञ्जलिः कथयति, **'अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।' (२/३९)** अपरिग्रहे यातानां दृढ़ स्थितौ 'पूर्वजन्मानि कथमभूवन्'- इत्यस्य सम्यक् रूपेण भवति बोधः। एवभूताच्चित्तात् किमपि नवनिर्माणतुभवत्येव नहिं पुनरपि केचन स्फुरणाः स्फुरन्ति- **तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः। (४/२७)** अपरेषां पदार्थानां दृश्यं भवन्ति प्रकटितास्ते संस्कारहेतुतः, तेषां संस्काराणां भवति ज्ञानम्। अपरिग्रह स्थितौ तेषां संस्काराणां भवति समवबोधः, यतो हि तावदेव भवति स्फुरणम्।

## ● नियमः

पञ्चयमानामिव नियमा अपि पञ्च सन्ति- शौचसंतोषतपःस्वाध्यायेश्वर-प्रणिधानानि। एष्वस्ति प्रथमः शौचः-

**शौचः -** शौचविषये पूर्वोक्त महापुरुषैरुभे सूत्रे प्रदत्ते स्तः। साधनपादस्यै-कचत्वारिंशत्तमेसूत्रे ते ब्रूवन्ति, यच्छौचपरिपालेन स्वाङ्गे वैराग्यं तथान्यसंसर्गेभ्यः पृथक्त्व स्थितेर्भावना भवति जागृता। एकचत्वारिंशत्तमे सूत्रे शौचस्य महत्वमस्ति वर्णितम्। यच्छौचेनान्तःकरणस्य शुद्धिः, मनसि प्रसन्नता, चित्तस्यैकाग्रता, इन्द्रियसमूहस्य वशीभवनम्, आत्मसाक्षात्कारस्य योग्यताङ्कुरणम्, समासाद्यते।

वस्तुतः तपःस्वाध्यायेश्वरप्रणिधानैरन्तःकरणे पूर्णशुद्धता प्रशान्तता भवति प्रवाहिता। अस्यैवास्ति नाम शौचः। शौचोऽस्ति शुद्धिरन्तःकरणस्य। मनबुद्धिचित्ताहङ्काराणि चत्वारि अन्तःकरणानीष्टानुकूलानि प्रवाहितानि भवेयुस्तदा स्वशरीरादपि जायते वैराग्यम्। एतादृशा महापुरुषा आवर्षं स्नानं न कुर्युस्तदापि

न किमप्याश्चर्यम्। ते शेरते तु शेरत एव पदाधारीकृत्योत्थितग्स्तूत्थितैव। ते जानन्ति यदियं शरीरन्तु '**साधन धाम मोच्छ कर द्वारा**'- शरीरमिदमस्त्येकंधाम, वस्त्रमस्ति, अतो जीवजगति सन्ति यावन्ति शरीराणि तेषां संसर्गात् पृथकतायाः क्षमता समागच्छति। तदा मनसि प्रसन्नता, चित्ते एकाग्रता, इन्द्रियाणां वशीभवनम्, आत्मदर्शनस्य क्षमता च समाव्रजति। देहाध्यासो निवृत्तौ भवति। कीदृशोऽपि समागच्छेत् संगदोषः, तथाप्यसङ्गवासस्य क्षमता समायाति। वाह्यशरीरस्य प्रक्षालनम्, सुसज्जितीकरणम्, अलङ्करणम्, एतत् सर्वं भयङ्कर देहासक्तेः, देहतृष्णायाः प्रतीकमस्ति। आन्तरिक शुद्धिवतां महापुरुषाणां स्नानं प्रक्षालनं किमपि बुद्धौ न समायाति। ते अन्ततो दिगम्बरा अपि दृश्यन्ते। कस्यचित्पादपस्याधः सन्त्युपविष्टाः। महावीरस्योपरि जनाः पङ्कंपप्रक्षिपुः भगवतोगुरुदेवोपरि कङ्कड़ं निक्षिपुः, किन्तु ते तथैवाचलाः।

सांसारिका जनाः शारीरिक सम्बन्धमाश्रित्य सदुपदेशेन भवन्ति क्रुद्धतमाः किन्तु यदैवेतेषां महापुरुषाणा साधनायां भवन्ति बाधाकारकास्तदैव ते चिन्तिता भवन्ति। सत्पुरुष कबीरस्यानुभवं पश्यन्तु- **एक अचम्भा ऐसन देखा, मुरदा रोटी खाय। सनकारे ते बोलत नाहीं, मारे ते चिल्लाय।।** चिन्तनपरायणाः साधकः सन्ति मृतप्रायाः। किमपि ब्रुवन्तु तं तव वचनेन नास्ति तेषां किमपि प्रयोजनम्। एते आभासरहिताश्चिन्तयन्ति। कदाचित् पूर्वसंस्कारजमुद्वेगं जनयेत् कश्चित्तदेमेचीत्कुर्वन्ति प्रार्थयन्ते वा।

**सन्तोषः** - सन्तोषे दृढ़ायाः स्थितेवर्णनं कुर्वाणो महर्षिराह, '**सन्तोषादनुत्तम सुखलाभः।**' **( २/४२ )** यस्मादुत्तमं न किमपि सुखम्, एवंभूतस्य सर्वोत्तम सुखस्य लाभः सन्तोषादुत्पद्यते। सर्वोत्तमं सुखं परमात्मदर्शने तथात्मस्थितौ च। '**राम विमुख सुख सपनेहुँ नाहीं।**' यन्नास्ति तस्य प्राप्तिः कुतः? सन्तोषस्यार्थोऽस्ति, यः समोऽस्ति, यत्र नास्ति विषमता। स एकं परमतत्त्वं परमात्माऽस्ति। ततस्तोषस्य तृप्तेर्वा प्राप्तिरस्तिसन्तोषः। स सर्वोत्तम सुखस्यास्ति स्रोतः। अस्मिन् सन्तोषे प्रभोर्प्रभावो दृश्यते-

**उमा राम सुभाव जेहिं जाना। ताहिं भजन तजि भाव न आना।।**
**कह हनुमंत विपति प्रभु सोई। जब तव सुमिरन भजन न होई।।**

**( मानस, ५/३२-३ )**

स चिन्तनेन सहजसुखं लब्धुं प्रारभते। अतः स वाह्यसुखस्यापेक्षां परित्यजति।

**तपः** - तपसा यदाशुद्धेर्भवतिनाशस्तदा '**कायेन्द्रियसिद्धिः**'- शरीरेन्द्रियाणां जायते सिद्धिः। शरीरेन्द्रियाणि च इष्टानुरूपं चलितुं सामर्थ्ययुतानि भवन्ति। इन्द्रियाणि सिद्ध्यनुकूलानि शरीरं सिद्ध्यनुकूलञ्च सम्पद्यते। साधनायां साह्यकरत्वं वहन्ति।

इष्टानुरूपं मनसासहेन्द्रियाणां तपनं तपः समुच्यते। साधको यदा परीक्षणेऽस्मिन्नुत्तरति तदा शरीरं साधना हिताय भवति, इन्द्रियाण्यपि भवन्ति साधना हितावहानि। यन्मनः सम्प्रति न लगति तदेव तप उत्तरं सहजरूपेण साधनायां लगति, इन्द्रियाणि सहायता विदधति अर्थात् मनसि तथेन्द्रियदले भवति नियन्त्रणम्।

**स्वाध्यायः** - स्वस्याध्ययनमस्ति स्वाध्यायः। साधकः स्वस्याध्ययनं करोति, यत् चित्तेन कियल्लगनीयम् तथा ललाग कियत्, एवमध्ययनं कुर्वन् यत्र तत्र वर्त्तते न्यूनता ततः परावर्त्य पुनः साधनायां नियोजनम्, अग्रेवर्धनमुच्यते स्वाध्यायः। एवंभूत स्वाध्यायस्य पराकाष्ठायामिष्टदेवताया साक्षात्कारो भवति, '**इष्ट देवता संप्रयोगः**'- इष्टदेवतायाः सम्यक् प्रकारेण भवति सम्बन्धः। योगसाधनायां स्वाध्यायो महत्वूपर्णमङ्गमस्ति।

**ईश्वरप्रणिधानम्** - ईश्वरप्रणिधानमर्थादीश्वरशरणागत्या समाधेः सिद्धिर्भवति। योऽस्ति समः, आदिश्च तेन सह समत्वं भवति समुपलब्धम्। क्लेशकर्मविपाकाशयेभ्यो य उर्द्धवं सन्तिष्ठते, एवंभूतः पुरुष ईश्वरोऽस्ति, यस्यावच्छेदको कालो न भवति। सः कालातीतः, गुरुणामपि गुरुः परमगुरुरस्ति। इदमेवादिमं गुरुपदमस्ति। एतान् प्रति समर्पणेन साकं साधना विधानेन शीघ्रं सिद्धिर्भवति। यतो हि साधनस्य सिद्धिभार ईश्वरोपरि सम्पद्यते। ते योगक्षेमं सम्भालयितुं भवन्ति संलग्नाः। इम एव सद्‌गुरवः।

**आसनम्** - यमनियमोत्तरमायात्यासनक्रमः। स्थिररूपेण दोलनकम्पन रहितं सुखपूर्वकोपवेशनस्य नामासनमस्ति। '**प्रयत्न शैथिल्यानन्त-समापत्तिभ्याम्।**' प्रयत्नस्य शिथिलतया, अर्थात् यमे, नियमे, शौचे, सन्तोषे, तपसि, स्वाध्यायादौ यः प्रयत्नः प्रचलित आसीत् तस्य प्रयत्नस्य शिथिलतया

तथानन्ते परमात्मनि मनसः संलग्नतया सिद्धं भवत्यासनमिदम्। अनन्ते मनसः संलग्नतया सुस्पष्टमेतत् यदियं स्थिरतामात्रशरीरस्यैव नहिं प्रत्युत् मनसः स्थिरताऽस्ति। यमनियमयोरियानभ्यासो भवेत्, यत्तौ स्वाभाविकौ स्याताम् प्रयासो न करणीयो भवेत्। परमात्मनि संलगिते मनसि सिद्ध्यत्यासनम्।

**प्राणायामः** – आसनस्य सिद्धेरनन्तरमेव श्वासप्रश्वासयोर्गतिरोधक्रिया प्राणायाम उदीर्यते। पूर्वसिद्धिर्जातासनस्य, तदनु समागतावस्था प्राणायामस्य। श्वासोयोगृहते, पश्चाद्बहिः क्रियते स प्रश्वासः, इत्युभयोगत्यवरोधोऽस्ति प्राणायामः। साधकोऽक्लिष्ट वृत्तिं दैवी संपच्च गृह्णाति, क्लिष्टां वृत्तिमासुरीं सम्पच्च त्यजति। अयं ग्रहणत्यागक्रमो भवेच्छान्तः, अनयोः श्वासप्रश्वासयो गतागतयोरवरोधोऽस्ति प्राणायामः। अयं साधनायाः एकः स्तरोऽस्ति, एनलङ्घनीयम्।

अयं प्राणायामो बाह्यवृत्तौ, आभ्यन्तरवृत्तौ स्तम्भवृत्तौ च देशकालसंख्यामिधै माध्यमैः प्रकार त्रयेण सम्यक् प्रकारेण दृश्यमानः लम्बायमानः, दीर्घः, लघुः सम्पद्यते। रागद्वेषकामक्रोधगर्भा वाह्यवृत्तिः कं देशं गता, कियत् कालं स्थिता, संख्यामाध्यमेनावलोकयन् नियोजयेत्। विवेकवैराग्यशमदमधारणाध्यानगर्भाभ्यन्तरवृत्तिः विवेकादि षण्णां मध्यतः कस्य विश्लेषणे संलग्ना वर्त्तते, वृत्तिः कियत् कालं तत्रस्थिता संख्यामाध्यमेन तां निरीक्षेत्, तत आभ्यन्तरवृत्तिमपसार्य स्तम्भवृत्तौ नियुनक्तु। सम्यक् रूपेण दृश्यमानोऽयं प्राणायामः दीर्घः, सूक्ष्मश्च भवति। अत उन्नतावस्थायाम् **'बाह्याभ्यंतर विषयाक्षेपी चतुर्थः।'** ( २/५१ )– प्रकृतिजन्यो वाह्यविषय यदा क्लेशेन प्रवाहितो भवति, तदा स अविद्याजन्यः क्लिष्टोऽस्ति। तथाभ्यन्तरवृत्तिः दैवी सम्पद्, अक्लिष्टः, इत्युनेवृत्तीशान्ते भवेतां समे जायेताम्, अनयोरुभयवृत्योपरि विरामोऽलगत्, चित्तमेकस्मिन्नायामे प्रवाहितमभूत् अस्यास्ति नाम प्राणायामः।

**'धारणासु च योग्यता मनसः।'** ( २/५३ )– प्राणायामस्य सफलतोत्तरं धारणकरणस्य योग्यतायाः प्रादुर्भाव। प्रारम्भिक साधक नामरूपं वा मनसि धारणस्य प्रयासं करोति, किन्तु कालान्तरेऽल्पकाल एव नामरूपं वा विस्मरति, लुप्तो भवति, तदा न जाने किं किमायातुं लगति। किन्तु सिद्धे सति प्राणायामे चित्ते धारणायाः क्षमता समायाति।

**प्रत्याहारः - '‌स्वविषयासम्प्रयोगे'** स्वविषयाणां सम्बन्धं त्यक्तवा इन्द्रियाणाम् **'चित्तस्य स्वरुप अनुकार इव'** चित्तस्य स्वरुपानुकूलवत् प्रवाहित भवनं प्रत्याहारोऽस्ति। चित्तं यत्र लगति, इन्द्रियाणि तस्मिन्नेवरङ्गेः भवन्ति प्रत्याहारोऽस्ति। चित्तं परित्यागं समकरोत्, अस्य नामास्ति प्रत्याहारः। तस्मिन् समये परं वश्यताभवतीन्द्रियाणाम्, अर्थात इन्द्रियाणामुपरि पूर्णरूपेण जयः प्राप्यते।

**धारणा -** विषयेभ्यो विनिवृतानीन्द्रियाणि चित्तानुकरण कर्तृत्व सम्पन्ने सति चित्ते धारणायाकरणस्य क्षमता आयाति। **'देशबन्धश्चित्तस्य धारणा।'** **( ३/१ )** यस्मिन् कस्मिन् देशे, नाम्नि, रूपे, ब्रह्मविद्यायाम्, योगस्यापराङ्गेषु कस्मिन्नप्यङ्गे चित्तावरोधो धारणा कथ्यते।

**ध्यानम् - 'तत्र प्रत्ययैकतानता ध्यानम्।' ( ३/२ )** यत्र चित्तस्य नियोजन भवेत् तस्मिन् ध्येये वृत्तेरेकतार चलनम्, क्रमस्यानवच्छेदः ध्यानं कथ्यते। तैलधारावत् वृत्तिश्चलितुं लगेत्, नान्य संकल्पोदयो भवेत्।

ध्यानः अस्त्येकः परिणामः। **'तत्र ध्यानजमनाशयम्।' ( ४/६ )** ध्यानजनितं चित्तम्, आशयराहित्येन न भवति नष्टः। भगवान् गुरुदेवः कथयतिस्म– "हो, अहं चेत् पतितं भवितुं वाञ्छानि तदाऽपि भगवान् भवितुं स्वीकृतिं न दास्यति।" अभ्यासकाले प्रकृत्यावरणानि प्रभावयन्ति तत् सर्वं मम पूर्वजन्मनः सन्ति संस्काराः किन्तु साधनस्योन्नतावस्थायां यदा ध्यानस्यावस्था समायाति, ततो नूतनाः संस्कारा न रच्यन्ते। अतो ध्यानादुत्पन्न चित्तस्य यावस्थास्ति, तस्याः कदापि विनाशो न भवति। यतो हि **'कर्माशुक्लाकृष्णम् ( ४/७ )**– एवंदृश योगीनां कर्माणि, अशुक्ला, अकृष्णाश्च भवन्ति।

**समाधिः -** पातञ्जल योगदर्शने समाधेर्वर्णनं न्यूनातिन्यूनतमष्टवारं कृतमस्ति **'वितर्क विचारानन्दास्मितानुगमात् सम्प्रज्ञातः।' ( १/१७ )**– वितर्कविचारानन्दास्मिताभिः संयुक्ता समाधिः सम्प्रज्ञात समाधिरस्ति। **'तत्र शब्दार्थ ज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः।' ( १/४२ )**– शब्दार्थज्ञानाख्यैस्त्रिभिर्विकल्पैः संकीर्णस्य अर्थात् मिश्रित चित्तस्य समाधानाय सवितर्क समाधिरस्ति। **'स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा**

**निर्वितर्का।**'( १/४३ )– चित्तस्य स्वरूपं यदा शून्यं भवति, केवलमर्थमात्रस्य (लक्ष्यमात्रस्य) आभासः शेषायते, तस्मिन् काले स्मृतिः पूर्णशुद्धा सम्पद्यते सैव निर्वितर्क समाधिरस्ति। '**एतयैव सविचारा निर्विचारा च सूक्ष्म विषया व्याख्याता।**' ( १/४४ ) '**एतया एव**'– अनयैव सवितर्कनिर्वितर्केतिद्वाभ्यां समाधिव्याख्याभ्यां सूक्ष्मतर विषयवत्योः सविचारनिर्विचार समाध्योर्व्याख्या सम्पन्ना, किन्तु '**ता एव सबीजः समाधिः।**' ( १/४६ )– ताः सर्वाः सबीजा समाधयः, एतासु समाधिषु पूर्वकर्मणां प्रकृतिबीजं न भवति नष्टम्, बीजं विद्यमानं शिष्यते, किन्तु इयमेव निर्विचारसमाधिरत्यन्तनिर्मलतया योगिने '**अध्यात्म प्रसादः**'– आत्मन आधिपत्ये चलितुं महानप्रसादः प्राप्तो भवति। अथ च '**तस्यापि निरोधे**' ( १/५१ )– तस्यापि जाते निरोधे '**सर्व निरोधात्**'– प्राक्तनस्य नूतनस्य समस्त संस्कार जातस्य निरोधे सति निर्बीज समाधिर्भवति। अधुना प्रकृतेरन्तिमं बीजम् यत् जन्ममृत्योः कारणमस्ति शान्तो भवति। अनेन प्रकारेण समाधिपादे समाधेः पूर्वस्य पीठिका, समाधेरारम्भः, शनैः-शनैरुत्कर्षस्तथा निर्बीजसमाधेश्चित्रणमस्ति।

तृतीयाध्यायस्य विभूतिपादीय द्वितीयसूत्रे वदति महर्षिः यत् चित्तवृत्तेरेकतारचलनं ध्यानमस्ति। तदेव ध्यानं यदा सूक्ष्मावस्थायां प्रविशति, "**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।**" ( ३/३ )– यदा केवलं ध्येयमात्र भवति प्रतीतिश्चित्तस्य निजस्वरूप शून्यं सम्पद्यते तदा तदेव ध्यानं समाधौ परिवर्तितं भवति। "**सम आदि स समाधिः**"– यः समोऽस्ति, यत्र नास्ति विषमता, यदादितत्त्वमनादितत्त्वञ्चास्ति स एव परमात्मा। तस्मिन् समये ध्यान परमात्मनि प्रवेशप्रदापनस्यावस्था युतो भवति।

चतुर्थाध्याये कैवल्यपादस्येकोनविंशतितमे सूत्रे महर्षिः ब्रूते यत् यस्य योगिनः, विवेकज्ञान महिम्नि, अपि वैराग्यं भवति, तस्य विवेकज्ञानस्य सर्वथा प्रकाशमानतया तस्य योगिनः कृते धर्ममेघसमाधे प्राप्तिः भवति। तस्मिन् समये चिदाकाशे केवल धर्म एव धर्म समाच्छादयति। सृष्टेरन्ये विकल्पा समायान्त्येव नहि। परमधर्मः परमात्मास्ति, तस्य व्यापकताया बोधो जायते। तस्मिन् समये निखिल क्लेशकर्मभ्यो जायते निवृत्तिः। ज्ञेयोऽल्परूपेणाज्ञातो प्रतीयते, तस्मिन्नपि जातायां सफलतायां गुणानां परिणामक्रमः समाप्तो भवति। योगी क्षणानां भवति

प्रतियोगी, अस्या अवस्थायाः पश्चात् '**कर्म निग्राह्य**' भवन्ति। कर्मभ्यः कापि रचना न भवति। '**पुरुषार्थशून्यानाम्**'– पुरुषार्थे किमपि करणीयं नावशिष्यते। अभ्यासस्य पूर्तिकाले गुणाः सम्प्रति न किमपि जनयन्ति। स्वकारणे भवन्ति विलीनाः। अस्यैव नाम कैवल्यमस्ति, अनेन प्रकारे समाधे परिणामः कैवल्यमस्ति। द्रष्टा स्वरूपे सन्तिष्ठते।

सारांशतो योगमार्गे गुणानां विलयपर्यन्तं समाधिपर्यन्तञ्च नितान्तावश्यकोऽस्त्यभ्यासः।

## ● संयमः

अभ्यासक्रम साधयन् सन् धारणाध्यानसमाधीनां त्रिकाणामेकीकरणमस्ति संयमः। उदाहरणाय सुरते नामरूपयोः धारणं क्रियते, वृत्तिं सुरतेन संयतो विधीयते। तस्मिन्नाम्निरूपे च वृत्तेरेकतारचलनं ध्यानमस्ति, ध्येयलक्ष्यमात्रस्याभासवशेषता समाधिरस्ति। क्रमशः सधमानानां त्रयाणामेको भवनमस्ति संयमः।

संयमस्य सिद्धावस्थायामेव विभूतीनां प्रादुर्भावो भवितुं प्रारभते। "**तज्जयात् प्रज्ञालोकः।**" ( ३/५ ) बुद्धिरलौकिक ज्योतिर्मय द्रष्टासंयुक्ता प्रकाशिता भवति। किन्तु, "**तस्य भूमिषु विनियोगः।**" ( ३/६ )– तं संयमं क्रमश उच्चावच भूमिकासु साधयन् भवत्यग्रेवर्धनम्।

यथा यथा संयमः सिद्ध्यति, क्रमोन्नतानुभूतियां प्राप्यन्ते। किन्त्वेकः स्तरः एतादृशः समायाति यत् "**प्रातिभाद्वा सर्वम्।**" ( ३/३३ )– समुत्पन्ने सति प्रातिभज्ञाने विना कस्यापि संयमस्य प्रयासेन भूतभविष्यवर्तमानां ज्ञानं सहजरूपेण सुलभायते।

परावाणी यदोन्नतायामवस्थायां प्रविशति तदा संयमः सिद्ध्यति। एतादृशो योगी यस्मिन् पले कस्यचिद्वस्तुनः स्मरणं करोति, चित्ते दृश्यं स्फुरति, वृत्तिरेकतार जाता, ध्यानमागतम्, समाधेः स्थितिः संवृत्ता ध्येयमात्रावशेषोयातः, इत्थं तद्वस्तु रहस्यं जानाति।

योगिवर्गेणे तादृश प्रयोगस्योदाहरणं लभ्यते। आदि योगिनो भगवतः शङ्करस्य सन्दर्भे पश्यतु– "**तब संकर देखेउ धरि ध्याना। सती जो कीन्ह चरित सबु जाना।।**" **( मानस, १/५६/४ )** विभूतयः परिणामाः सन्ति,

उपहाराः सन्ति समायातेकाले वृक्षाः पुष्पफलान्विताः भवन्ति। साधके नेषां कामना चिन्ता च न कर्त्तव्या। साधकस्य चिन्ता योगसाधनाविषये, ईश्वरप्रति समर्पणविषये भवेत्। साधकस्य परिपुष्टतावसरे, इमा विभूतयः वसन्त ऋतुवत् यथासमयं प्रकटिता भवन्ति।

## ● बुद्धिः

निर्विचार–समाधेर्भूते सति नितान्त निर्मले योगिने "**अध्यात्म प्रसादः**"– अध्यात्म प्रसादः प्राप्तो भवति, अर्थात् तदा आत्मन आलोक मात्रं शेषायते। एतेनान्यसंस्काराणामन्तो भवति तथा च '**ऋतम्भरा तत्र प्रज्ञा। ( १/४८ )**– तस्मिन् समये योगिनो बुद्धिः, ऋतेनार्थात् सत्येन संयुता भवति। सत्यं मात्रैक परमात्मैवास्ति, सा ऋतम्भरा बुद्धिस्तं परमात्मानं धारयितुं सक्षमा भवति। श्रवणानुमानाश्रवणीयया बुद्धया बुद्धेरस्या विषयो भिन्नोऽस्ति। यतो हीयं विशेषार्थ युताऽस्ति।

बुद्धेः रूपद्वयमस्ति। प्रसङ्गममुं कैवल्यपादस्यैकविंशतितमे सूत्रे पुनः सुस्पष्टं कुर्वन् महर्षिः कथयतिः– **चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च। ( ४/२१ )** चित्तस्यान्तराले यानि दृश्यानि उत्पद्यन्ते, तानि बुद्धौ नैकान् प्रश्नानुत्थापयन्ति। '**अति प्रसंगः**'– अत्यनन्ताः प्रसङ्गा समुतिष्ठन्ति। एतेन '**स्मृति संकरः**'– स्मृतिर्भवति मिश्रिता। स्मृतिः सङ्कल्पश्च एक एव। अनन्त संकल्पानां क्रमारम्भो सम्प्रसज्यते। यद्यप्यसौ चेतनशक्ति पुरुषोऽस्त्यसंगः क्रियारहितोऽस्ति, किन्तु '**तदाकारपत्तौ**' **( ४/२२ )** चित्तं यदा तस्याकारं धारयति तदा '**स्वबुद्धिसंवेदनम्**'– स्थिरबुद्धौ स्वरूपस्य ज्ञानं करोति प्राप्तम्।

सारांशतो महर्षिः पतञ्जलि मतेन बुद्धेरस्ति रूपयुगलम्, एकातु वाह्या बुद्धिः या श्रवणानुमानाभ्यां जायते, एतदपेक्षया ऋतम्भराबुद्धिर्भवति श्रेष्ठा। चित्तेप्रस्फुरितैरनन्तसङ्कल्पैरनन्तनिर्णयैश्च स्मृतिर्भवति मिश्रिता। किन्तु चेतन क्रियाहीना सङ्ग पुरुषस्य जाते तदाकारे '**स्वबुद्धि संवेदनम्**'– बुद्धौ स्वस्वरूपस्य स्वयमित्यस्य संवेदनं प्राप्नोति।

अपर शब्देषु बुद्धेर्भेद द्वयमस्ति, एकातु श्रवणानुमानानुसारिणी सामान्या बुद्धिः। इयमेव बुद्धि विशुद्धे सति योगसाधनैः स्वबुद्धौ स्वस्वरूपस्य प्रतिबिम्ब प्राप्तिकर्त्री बुद्धिः। अतः परं बुद्धिरपि लयं गच्छति।

## ● धर्मः

यत्र चित्तस्य निरोधः, समाधिः, एकाग्रता च परिणामः प्राप्तः पातञ्जल योगसूत्रे तत्रैव धर्म शब्दस्य प्रयोगो बभूव। यथा - अभ्युदयोन्मुख संस्काराणां ह्रासः, निरोधावस्थायाः संस्काराणां प्राकट्यम् अयं चित्तस्य निरोधपरिणामोऽस्ति। एतेन चित्तस्य वृत्तिः शान्त प्रवाहिता सन्तिष्ठते। इत्थमेव सर्वप्रकारक विषयाणां चिन्तनक्रियाशीलायाः वृत्तेः क्षयभवनम्, एकस्यैव ध्येयभूतस्य नाम्नः रूपस्यवा चिन्तनपरायणा, एकाग्रतावस्थायाः समुदयः, चित्तस्य समाधिपरिणामोऽस्ति। यदा शान्तपरा तथा उदयोन्मुखी उभेवृत्ती एकाकारा भवेताम्, समा भवेताम्, अयं चित्तस्यैकाग्रतापरिणामोऽस्ति। एतत् त्रिक माध्यमेनैव इन्द्रियाणां संयमस्तथा रूपरसगन्धशब्दस्पर्शेति पञ्चमहाभूतेषु संभाव्यमान धर्मस्य लक्षणस्य, अवस्थायाश्चापि वर्णनकृतमस्ति। अत्र धर्म शब्दस्य प्रथमप्रयोग दृष्टिपथायते। (३/१३)

कैवल्यपादस्य सप्तमे सूत्रे महर्षिः कथयति यत् योगीनां कर्माणि अशुक्लान्यकृष्णानि भवन्ति। किन्त्वन्येषां कर्मणां त्रयोभेदाः सन्ति। तैः फलानुकूल वासनाना भवत्यभिव्यक्तिः। ताः सर्वाः वासनाः नाना जन्मानन्तरं नाना देशकाल परिवर्त्तनानन्तरं व्यतीते सत्यपि तदापि कर्मजन्यसंस्कारसमुदाये न भवति व्यवधानम्, ते नियत समये भवन्ति प्रकटिताः। तत्र व्यवधानं नायाति यतो हि स्मृति संस्कारयोरेक एव स्वरूपमस्ति। स्मृतिपटले तदेव प्रस्फुरति यत् संस्कारे सन्तिष्ठते। अत उभे स्तः एक एव। स्मृतिसंस्कारयोश्चैक रूपतानादिरस्ति। अतएव '**नित्यत्वात्**' (४/१०) नित्यशाश्वतरूपस्य प्राप्तेरीहा सदा विद्यमाना विलसति। शाश्वतसुखं शाश्वतनिवासं तथामृतमयं स्वरूपं प्राप्तुमभिलाषा मानवे सदैव विद्यते।

एतासां वासनामेषा संस्काराणां कथं भवेद्विनाश? अत्रोच्यते, हेतुफलाश्रयालम्बनैश्चतुर्भिः संस्काराणां वासनानां वा भवति संग्रहः। अत एषां चतुर्णामभावेन वासनां संस्काराणाञ्च सार्वदिकाभावो सुसम्भवा। एतेषां संस्काराणां

हेतव अविद्यादि क्लेशास्तेषां विद्यमानत्वे संभाव्य कर्मणां समुदायोऽस्ति। एषां फलं पुनर्जन्म, आयूंषि, भोगाश्च सन्ति, ये कदाचिदाह्लादकराः, कदाचिद्दुःखप्रदा भवन्ति। एषामाश्रयमस्ति चित्तम्, रूपरसगन्धशब्दस्पर्शादयः सन्त्येषामालम्बनानि। एभिरेमाः वासनाः संगृहीता भवन्ति। एतेषामभावेन सह पूर्वोक्त मूलसंस्काराणां वासनानाञ्च शाश्वतिका भावो सम्पद्यते। एषा वासनानामभावेन सह अत्र धर्म शब्दस्य पुनर्प्रयोगो कृतो विद्यते। '**अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्।।**' (४/१२) धर्मस्य स्थितौ कालस्य भेदेयाते सत्यपि यानि हेतुफलाश्रयालम्बनान्यतीतानि, यान्यनागतानि च अधुना प्रकटितानि, यथा स्वरूपस्य प्राप्त्यादि– तेषु स्वरूपेण धर्मस्य गति सदा विद्यमाना प्राप्यते अर्थात् संस्कारवासनानामन्तकाले स्वरूपस्य प्राप्तिकाले च धर्मस्यास्ति विद्यमानता।

समस्तधर्माणां गतेः प्रवाहो व्यक्तस्थितौ सूक्ष्मस्थितौ च सदैव गुणस्वरूप एवास्ति। गुणानां यादृशं सात्विकं राजसं तामसं मलिनं मध्यमनुन्नतञ्च प्रभावो भवति, तथैव धर्मरूप दृष्टिपथमायाति। किन्तु '**परिणामैकत्वात्**' परिणामस्यैकतया '**वस्तु तत्त्वम्**'– विषयवस्तुत्वेनास्ति योगः, स तत्वरूपेण भवति प्रकटितः। अर्थात् चेतनद्रष्टुस्तत्त्वस्वरूपे विदित भवनं सम्भवमस्ति। अत्र धर्मस्य द्वितीवाररूपेणागतं नाम।

तृतीय वारं धर्मस्यनाम कैवल्यपादस्योत्तरार्द्धेऽस्ति द्रष्टव्यम्– यत् विशेष दर्शीपुरुषस्य चित्तात् किमपि शुभाशुभ निर्माणं न भवति, किन्तूत्तिष्ठन्ति ये वेगास्ते सन्ति किम् ? अत्रास्ति कथनम्– **तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः।।** (४/२७)– तत्समाधेरन्तराले विपरीतवस्तूनां विचाराणां वा स्पुरणम् '**संस्कारेभ्यः**'– संस्कारेभ्यो सम्भवति, संस्काराणां तलान्तरेऽतिसूक्ष्ममस्ति किमपि, तदेव स्फुरति। इमे संस्काराः क्लेशानामिव घातकाः सन्ति। "**हानमेषां क्लेशवदुक्तम्।**" (४/२८)– एषां संस्काराणां विनाशं क्लेशानामिव कर्त्तव्यम्, कुतोह्येषां संस्काराणां मूलं क्लेशाः सन्ति। एषां संस्काराणां नष्टे सति– '**प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः।**' (४/२९) यस्य योगिनो विवेकज्ञानमहिम्न्यपि वैराग्यं भवति, तस्येदं विवेकज्ञानं सर्वथा प्रकाशवत्

स्थित्या तस्यकृते धर्ममेघ समाधिः सुलभायते। चिदाकाशे सर्वत्रैव धर्मधर्म एवास्ति नान्यत् किमपि स्फुरति, यतो हि येऽन्तिमसंस्कारा आसन् तेऽपि विनष्टाः। अस्याः समाधेः प्रभावत् क्लेशेभ्यः कर्मभ्यश्च सार्वदिकावकाशो प्राप्तो भवति। अत्र धर्म शब्दस्तं परमात्मनं धारणकरणावस्थायां प्रयुक्तोऽस्ति।

भगवता श्रीकृष्णेन धर्मस्य परिभाषा परिपोषिता– '**सर्वं धर्मान्परित्यज्य मामेकं शरणं व्रज।' ( गीता, १८/६६ )** समस्तधर्मचिन्तां विहाय मात्रैक शरणं याहि। गोस्वामी तुलसीदासेनाद्घोषितम्–

**सो सुखु करमु धरमु जरि जाऊ। जहँ न राम पद पंकज भाऊ।।**
**जोगु कुजोगु ज्ञान अज्ञानू। जहँ नहि राम प्रेम परधानू।।**
**( रामचरितमानस )**

तस्मिन् धर्माचरणे, तस्मिन् कर्मणि अग्नि लगेत् यत्र रामचरणेषु श्रद्धा न भवेत्। यद्येवं नास्ति तर्हि कर्मापि कुकर्मास्ति, धर्म नहिं अधर्मोऽस्ति, योगो नहिं कुयोगोऽस्ति, ज्ञानं नहिं, अज्ञानमस्ति। तेनैवाशयेनानेन महापुरुषेण वारत्रयं धर्म शब्दस्य प्रयोगः कृतः। चित्तवृत्तिनिरोधेन सह, समाधिपरिणामेन सह, अन्तिम संस्काराणां विलयेन सह धर्मस्य प्रयोगोराराजते।

।। ॐ।।

# एक भक्तस्य प्रश्नः

**प्रश्नः-** महाराजजी! साम्प्रतं वयं विद्यालयेषु योगं पठामः, यस्मिन् योगाध्यापने सर्वविद्यासनानामभ्यासः कार्यते, समये-समये श्रीमद्भगवद्गीतायाः पातञ्जल योगदर्शनस्य च श्लोकाः सूत्रापि च समुद्घोष्यन्ते। किन्तु गीतायां पातञ्जल योगदर्शने चैतेषामासनानां विवरण नोपलभ्यते। कृपयास्या जिज्ञासायाः समाधानं प्रस्तूयताम्।

**उत्तरम्-** अधुना शिक्षा संस्थानेषु सन्महात्ममण्डलान्तराले योगासनस्य पर्याप्ताः प्रचुराः सूचयः समुपलभ्यन्ते, किन्त्वादिम योगशास्त्र गीतायामेवं महर्षि पतञ्जलि प्रणीत योगदर्शने मात्रैकः श्लोकस्तथा मात्रैकं सूत्रं मिलति-

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नाति नीचं चैलाजिनकुशोत्तरम्।। (गीता, ६/११)**

* * *

**स्थिर सुखमासनम्।। (योगदर्शनम्, २/४६)**

योगेश्वरेण भगवता श्रीकृष्णेन प्रतिपादितं यदात्मैवास्ति सत्यम्। आत्मसाक्षात्कारको योगविधिरस्ति यज्ञः। तस्य यज्ञस्य गीतायाश्चतुर्थाध्याये सविस्तरं वर्णनं कृतं विद्यते, किन्तु यज्ञकर्त्तुः कृते स्थानं कीदृशं भवेत्, आसनं किमाकारकं स्यात्, आसने समुपवेशनप्रकारविधिः कः, यज्ञकर्त्ता पालनीया नियमा के, आहारस्य, विहारस्य, शयन जागरणयोश्च का नियमावली, परिश्रमस्य सीमायाः, कर्मणि संलग्नतादीनाञ्च सन्दर्भे योगेश्वरेण श्रीकृष्णेन गीतायाः, षष्ठाध्यायस्य दशमश्लोकादारभ्योनविंशति श्लोकं यावत् सुस्पष्टीकृतम्।

सर्वप्रथमं तेन स्थानासनयोर्विवेचनं कृतम्। गीतायाः षष्ठाध्यायस्य षष्ठेदशमे (६/१०) च समुदङ्कितमस्ति यत् चित्त विजगीषायां संलग्नः योगी मनः, इन्द्रियाणि, शरीरञ्च वशमानीय वासनामुक्तोऽपरिग्रही च भूत्वा रहसि सावधानः, भूमावेकाक्येव चित्तं योगक्रियायां विनियोजयेत्।

योगक्रियार्था कीदृशी भवेद्वसुन्धरा? कीदृशं भवेदासनम् ? षष्ठाध्यायस्यैकादशमेश्लोके (६/११) योगेश्वरो व्याख्याति यच्छुद्धायां भूमौ कुशासनम्, मृगचर्मासनम्, वस्त्रासनम्, काष्ठासनम्, अपरमपि कमपि ग्राह्यासनं विस्तार्य साधको निरीक्षेदासनमत्युच्चैस्तथातिनीचैर्न भवेत् प्रत्युत स्थिरमासनं स्थापयेत्। शुद्धायाः सर्वंसहायस्तात्पर्यं तस्याः कीटकर्कटादि मार्जनेन निर्मलीकरणमस्ति। भूमौ पूर्वोक्तासनेषु किमप्यैकमासनं विस्तारयेत्, कामं मृगचर्म भवेच्चटं कौशं भवेच्चैलनिर्मितं वा यत् किमप्यासनं भवेत् सुलभं तदेव ग्राह्यम्। आसनं कम्पविकम्प विरहितं स्यात्।

पूज्य महाराजा अनुमानतः पञ्चेञ्चाथवापञ्चाङ्गुलोच्छ्रायासनोपरि राराजन्ते स्म। एकदा भावुकाः भक्ता न्यूनातिन्यूनमेकफिटोच्चं द्वादशाङ्गुलोच्चं वा सङ्गमर्मराख्याश्मविनिर्मितं काष्ठतख्ताकारं ग्रावासनमानायितवन्तः। महाराजास्त्वेकस्मिन् दिवसे तदासने समुपविवशुरुचुश्चपुनः, ''नहिं हो! अत्युच्चमासनमिदं बहूच्चैरासनेनोपवेष्टव्यम्। उच्चासनप्रसूतो गर्वः समुदयति, अधोभागेऽपि नोपविशेत् कुतोहि ततो हीनताङ्कुरति। आत्मनः घृणोद्बोधः।'' ते महाराजास्तदासनं तत अपसार्य काननस्थैकोपवने प्रक्षेपयामासुः। तत्र न कदापि महाराजाः गच्छन्ति स्म नेदानीमपरोऽपि कोऽपि याति। एतदासीत् पूज्य परमहंस महाराजानां क्रियात्मकं प्रशिक्षणम्।

षष्ठाध्यायस्य द्वादशे श्लोके (६/१२) व्याख्यातमस्ति, यदासने जाते सुव्यवस्थिते, तदुपरि समुपविश्य मनः समाधाय चित्तेन्द्रियाणां सर्वाः क्रियाः स्वायत्तीकुर्वाणोऽन्तःकरणस्य शुद्ध्यर्थं योगाभ्यासं कुर्वीत्। अत्रासनमुपवेशनार्थं निर्मिता चतुष्पादिका (चौकी) अस्ति।

षष्ठाध्यायस्य त्रयोदशमे श्लोके (६/१३) उपवेशनस्य विधिं वर्णयन् योगेश्वरो निर्दिशति, यच्छरीरग्रीवाशिरांसि ऋज्वीकृत्य, अचलीभूयस्थैर्यं सन्धार्य दृढोभूत्वा समुपविशेत्। नासिकायाः शिखरे न्यसेत् दृष्टिम्। (अत्र नासिकायाः प्रत्यग्रभागस्यावलोकनस्य निर्देशो नास्ति प्रत्युत् सध्रीचीनोपवेशनेन नासिकायाः पुरः सरं यथावधि दृष्टि प्रसरस्तत्र दृष्टेरवस्थानम्। वामदक्षिणयोरवलोकन चाञ्चल्यं विरमेत् नान्यदिक्षु दृष्टिप्रसारः)।

षष्ठाध्यायस्य चतुर्दशाख्ये श्लोके (६/१४) ब्रह्मचर्य व्रते स्थिरो भूत्वा निर्भयश्च सम्यक् शान्तान्तःकरणः, मनः संयम विदधानः, मय्यर्पितचित्तयुतो भूत्वा मयि परायणी भूय स्थितो भवेत्।

षष्ठाध्यायस्य पञ्चदशे (६/१५) श्लोकेऽस्तिनिर्देशः पूर्वोक्त विधिना, आत्मानमजस्रं तच्चिन्तने संयोजयन् संयतमनाः योगी मयि स्थितिरूपां परमपराकाष्ठावर्तीं शान्तिं प्राप्नोति।

अत्रासन पदबोध्यमुपवेशनस्य स्थानमस्ति, आसनवाच्यं वस्त्वस्ति। नासिकायाः शिखरभागं निर्निमेषमवलोकयनचलस्थित्योपवेशनस्य विधिरस्ति। गीतायामपरस्यान्यस्य कस्याप्यासनस्य नास्ति समुल्लेखः। अस्मिन्नेव प्रसङ्गे ब्रूते योगेश्वरो यत् परमानन्दयुतायै शान्त्यै शारीरिक संयमः, युक्ताहारविहारः, कर्मणि समीचीना चेष्टा चास्त्यनिवार्या।

षष्ठाध्यायस्य षोडशतमे श्लोके (६/१६) आह भगवान् श्रीकृष्णः– अयं योगस्तु वह्वाशीनां न सिद्ध्यति न चानशनीनां सिद्ध्यति। नाधिकशयानानां न च बहुजागरणशीलानाञ्च योगोऽयं सिद्ध्यति। दुःखघ्नोऽयं योग उचिताहारविहारवताम्, कर्मणि समुपयुक्तचेष्टावताम्, सन्तुलित शयनजागरण कर्त्तृणामेव भवति परिपूर्णः। अधिकभोजनेनालस्यम्, निद्राः, प्रमादाः संछादयिष्यन्ति, तदा न सम्भवा साधना। भोजनस्य त्यागेन भविष्यन्ति शिथिलानीन्द्रियाणि, अचलस्थिररूपेणोपवेशनस्य क्षमता क्षीणतां गमिष्यति। विहारस्याशयः साधनानुकूलं विचरणम्। स्वल्पं परिश्रमोऽपि करणीयोऽन्यथा रक्तसञ्चारे समागमिष्यति शैथिल्यम्, रोगाक्रमणं भविष्यति। शयन जागरणयोस्तथाहारविहारयोरानुकूल्येप्रातिकूल्ये च सिद्धौ प्रगत्यवनतिश्चानुभूयते। कर्मणि चेष्टाऽर्थादाराधनायां प्रयत्नः परमावश्यकः।

एकोनविंशतितमेविंशतितमे च श्लोके योगेश्वरो ब्रवीति यथा निर्वात स्थले स्थापितो दीपो न भवति चलायमानः शिखोर्ध्वं विलसति याति वा, तस्मिन् न जायते कम्पनम्, इयमेवोपमा चित्तजयी योगिनः कृते प्रदत्ताऽस्ति। कामं वशीकृतं जितं चित्तम्, किन्तु सम्प्रत्यपिजीवति चित्तम्। यस्यामवस्थायां योगाभ्यासेन निरुद्धं चित्तमुपरामतां प्राप्नोति तस्यामवस्थायां योगी 'आत्मना'– स्वात्मनो माध्यमेन 'आत्मानम्'– परमात्मानम् पश्यन् 'आत्मनि एव'– स्वात्मन्येव भवति सन्तुष्टः।

योगी पश्यति तु परमात्मानं किन्तु सन्तुष्टो निजएवात्म भवति, यतोहि प्राप्तिकाले तु परमात्मनः साक्षात्कारो भवति, किन्तु क्षणानन्तरमसौ स्वकीयमात्मामुक्तताभिः शाश्वत विभूतिभिरोतप्रोतमनुभवति। ब्रह्माजरममरं शाश्वतमव्यक्तममृतस्वरूपञ्चास्ति, इतस्त्वात्मापि विद्यत अजरममरं शाश्वतमव्यक्तममृतस्वरूपञ्च। किन्त्वचिन्त्यमप्यस्ति, यदवधौ चित्तं चित्तलहरी वर्त्तेते, तदवधौ तन्नास्ति भवदुपयोगाय। चित्तस्य निरोधे निरुद्ध चित्तस्य विलयकाले भवति परमात्मनः साक्षात्कारः, दर्शनस्य सुतरां द्वितीय क्षणे पूर्वोक्तेश्वरीयगुणधर्मयुतं स्वात्मानं लभते, अत एवासौ निजात्मन्येव सन्तुष्टो भवति। इयमेव योगस्य पराकाष्ठा।

इह शारीरिकव्यायामरूपे प्रचलित वाह्यासनानां योगसाधनायां नास्ति कोऽप्युपयोगः। वाह्यासनानि योगिनां भोगीनां रोगीणां स्वस्थानां सर्वेषां कृते स्वास्थ्यवर्धकानि सन्ति। चेत् क्रीडाविशेषाणां (जिमिनास्टकस्य) विद्यते सम्यगभ्यासस्तदा वाह्यासनानां न भवति काप्यवश्यकता। यतोहि समस्ताङ्गप्रत्यङ्गानां व्यायामः समानरूपेण सुसम्पद्यते। चित्तस्य निरोधस्तु नियतकर्माभ्यासत एव भवति।

**पातञ्जल योगदर्शन**

महर्षि पतञ्जलेरनुसारेण चित्तवृत्तीनां निरोधो योगोऽस्ति। अभ्यास-वैराग्याभ्यामेतासां वृत्तीनां जायते निरोधः। अभ्यासस्याधारौ, ईश्वर शरणागतिः प्रणवश्चास्तः। तपसा, स्वाध्यायेन, ईश्वरप्रणिधानेन च योगक्रियाया भवत्यारम्भः। योगस्य सन्त्यष्टावङ्गानि- यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिश्च। इमाः क्रमोन्नताः स्थितयः सन्ति, यासु तृतीयं स्थानमासनस्यास्ति-

**स्थिर सुखमासनम्।। (योगदर्शनम्, २/४६)**

स्थिररूपेण कम्पनचलनरहितस्य सुखपूर्वकोपवेशनस्य नामास्त्यासनम्। नैतदासनं यत् भूमौकृत भालश्चापवत् कृत कटिभागः, शून्ये प्रसारित चरणौ चेत् कश्चित् स्थितो भवति तत् व्यायामो नत्वासनम्। महर्षेरासनसम्बद्धं तात्पर्यमिदमस्ति यत् सुस्थिरोपवेशनम्। कम्पनं चलनं शरीरे न भवेत्, मनसि

भवति। मनसि सङ्कल्पस्योर्म्यागमन समकालमेव शरीरं क्रियाशीलं भूत्वा इतस्ततः संवर्द्धितुमारभते।

**प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्। ( योगदर्शन, २/४९ )**

अहिसायाः, सत्यस्य, अस्तेयस्य, ब्रह्मचर्यस्य, अपरिग्रहस्य, शौचस्य, सन्तोषस्य, तपसः, स्वाध्यायस्य, ईश्वरप्रणिधानस्य च साधने यः प्रयत्नश्चलति स्म, तत्र शैथिल्यमाव्रजेत्, श्रमो न भवेत्, पूर्वोक्त साधनानि निसर्गतो भवितुं लगेयुः, तथा परमात्मनि मनसो विनियोगेन सिद्ध्यति आसनम्, तदासनं शान्तसमत्वेन सुखपूर्वकोपवेशनक्षमतायुतं भवति।

आसनस्य सिद्धावस्थायां प्राणापानयोर्गतौ विच्छिन्नतोत्पत्तिरेवास्ति प्राणायामः। प्राणायामेन प्रत्याहारः, अथवा विषयेभ्यो मनसः परावर्त्तनस्य क्षमता, तथेन्द्रियाणा परमवश्यता समायाति, सहैव '**धारणासु च योग्यता मनसः।' ( योगदर्शन, २/५३ )** मनसि धारणाधारणस्य क्षमता समाव्रजति। चिन्तने यत् धारणं कृतम् तत्र वृत्तेरेकरस चलनमस्ति ध्यानम्, तथा च '**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिवसमाधिः।' ( योगदर्शन, ३/३ )** केवल लक्ष्यस्यैवाभासोऽवशिष्येत्, चित्तवृत्तेर्निजं स्वरूपं शून्यं भवेत्, तदा तदेव ध्यानं समाधौ परिणतो भवति।

अनेन प्रकारेण योगस्याष्टावङ्गानि यथाक्रममुदीयमानाः सन्त्यवस्थाः। महर्षि पतञ्जलेर्योगदर्शने, आसनस्येतावन्मात्रं विवरणमस्ति, तदपि शान्ते तथैकान्ते समुपविश्य कृताभ्यासेन भवत्युपलब्धः।

गीतायां पातञ्जल योगदर्शने मात्रैतावदन्तरमस्ति, यद् गीतायां प्रागासन वर्णनमस्ति तदनु त्वरितं पश्चात् ब्रह्मचर्य प्रभृति यमस्येश्वरप्रणिधानादेर्नियमेषु बलं प्रदत्तमस्ति, यत्र तु महर्षि पतञ्जलिः पूर्वं यमनियमयोश्च वर्णनं चकार तदनु वर्णितवानासनस्य स्थिरीकरणम्। महर्षेरासनं शरीरापेक्षया मनसः स्थिरतातोऽधिकमस्ति। तस्यः 'आसनम्' अनन्ते परमात्मनि मनसः संयोजनेन सिद्धं भवति।

भगवान् महावीरो गोदोहनासनेनोपविश्य ध्यानं करोति स्म, येन निद्रालस्ये साधनायामवरोधं कर्त्तुं न शेकतुः। भगवान् बुद्धः साधनाया अन्तिमे चरणे

पिप्पलस्यैकस्याधस्तले विराजमान आसीत्। स्वास्ति नामा गोचारकः, एकादशवर्षीयवयास्तं शान्तमुद्रायामुपविष्टं ददर्श। तेनाध्ययनं कृतं यत् चरण युगलं जघ्नयोरूपरि तथा धारितौ तेन यदुभौ पत्तलौ दृष्टिगोचरावास्ताम्। वामहस्ततलोपरि दक्षिणहस्ततलावास्ताम्, नेत्रावर्धोन्मीलितौ, दृष्टिःपुरः प्रसरा। इदमेव तस्य प्रिय पद्मासनामासीत्।

गोस्वामी तुलसीदासस्य रामचरितमानसेऽप्यासनानां प्रचुरमस्त्युल्लेखः, यथा सीतास्वयम्वरावसरे जनकेनोक्तम्–

**तुरत सकल लोगन्ह पहिं जाहू। आसन उचित देहु सबकाहू।।**

यदा वरयात्रिकाः समाजग्मुः–

**सादर सबके पाय पखारे। यथा जोगु पीढ़न्ह बैठारे।।**
**आसन उचित सबहि नृप दीन्हे। बोलि सूपकारी सब लीन्हे।।**
**चारि सिंहासन सहज सुहाये। जनु मनोज निज हाथ बनाये।।**
**पुनि वशिष्ठु मुनि कौशिकु आये। सुभग आसनन्हि मुनि बैठाये।।**

अनया रीत्या नृपतिभ्यः सिंहासनम्, मुनिभ्यः सुन्दरमासनम्, क्वचित् पीठम्, क्वचित् सुखासनम्, क्वचित् कुशासनम्, क्वचिन्मृगचर्म। अत्र तु आसनमुपवेशनार्थ–वस्तुविशेषस्यास्ति नाम। क्वचित् स्थलेषूपवेशन मुद्रायाः संज्ञासनमस्ति–

**कछुक दूरि सजि बान सरासन। जागन लगे बैठि वीरासन।।**

धनुषि सन्धानितं शरः, सततं सावधानः। लक्ष्मणो वीरासनेनोपविष्ट आसीत्। भगवतः शङ्करस्य कृते वर्तते समागतासनचर्चा–

**तहँ पुनि शंभु समुझि पन आपन। बैठे वट तर करि कमलासन।।**

सती त्यागस्य प्रतिज्ञां स्मृत्वा वटवृक्षस्याधस्तले सकमलासनो भजनेसूपविष्टः। अत्र कस्यापि विस्तारितस्यासनस्य नास्ति चर्चा। प्रत्युत् समुपवेशनस्यैकामुद्राश्चर्चा प्रतिभाति।

**सुर लखे राम सुजान पूजे मानसिक आसन दिये।**

विवाहावसरे देवाः श्रीरामं ददृशुस्तदा मानसिकमासनं समर्प्य तस्य पूजनं चक्रुः यदासनं हृदयान्तरालस्थमासीत्। एकान्तसेविनः सिद्धमहात्मजनाः सिद्धासनेनोपविशन्ति। पालथीमावध्य पादमेकं जघने संस्थाप्य तस्य पार्ष्णिभागः कटिं स्पृशेदथवा जघनोपरि कापि धारितो भवेत् इदमेव सिद्धासनं कथ्यते। पूज्य गुरुदेवाः प्रायः अनेनैवासनेन तिष्ठन्ति स्म। महाराजस्य शरणमागते सति पूज्य गुरुदेवं पूर्वोक्त सिद्धासन मुद्रायां स्थितं दृष्ट्वाहमपि जघने तथैव चरणारोहणमकरवम्, गुरोः समक्षं स्थितोऽभवम्। सतीर्थ्याः, अग्रेज भक्ताः संकेतेन मां निषेधिवन्तः कथितवन्तश्च सिद्धासनेन सिद्धपुरुषा एवोपवेष्टुं शक्नुवन्ति। तस्य समक्षं पादावुपरि समुत्थायोपवेशनं तस्यावमाननातथाशिष्टप्रदर्शनमस्ति। सारांशतः समस्तार्षग्रन्थेषु समुपवेशनस्य मुद्रायाः, उपयुक्त स्थले समुपवेशनाय प्रयोगे ग्राह्याणां वस्तूनां नामासनमस्ति।

आधुनिक व्यायामशिक्षका रोगाणां वारणाय विभिन्न शारीरिक मुद्राणामनुसन्धानं कृत्वा योगासन नाम्ना तेषां प्रचारं प्रसारञ्च कुर्वाणाः सन्ति। तथोक्त मुद्राणां सम्पादने गीताश्लोकानां महर्षि पतञ्जले योगसूत्राणामुद्धरणं ददन्ते। अस्तु कदाचिदेतस्मादेव देशे विदेशे भ्रान्तेरेकालहरी दृश्यते व्याप्ता यत् शाश्वत परमात्मन समुपलब्धिकारयिता वास्तविक योगस्वरूपा इमा शारीरिक मुद्राः सन्ति। व्यायामशिक्षकाणामस्ति कर्त्तव्यं यदेषां मुद्राणां समर्थने गीतायाः, योगदर्शनस्य चोद्धरणं न देयम्। सृष्टौ कस्यापि माङ्गलिककार्यारम्भात् पूर्वं धर्मशास्त्राध्ययनं परमोचितमस्ति, किन्तु मुद्रासमूहमिमं योगासन संज्ञया न व्यवहरन्तु।

।। ॐ।।